# शास्त्रसंदेशमाला

दार्शनिक-चर्चा ग्रन्थनिकरौः






१६

# શાસ્ત્રસંદેશમાલા-૧૬

## દાર્શનિક-ચર્ચાગ્રન્થનિકરૌઃ

ભાગ-૧૬


॥ સંકલન ॥

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.



॥ પ્રકાશક ॥

શાસ્ત્રસંદેશમાલા

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,

આરાધના ભવન માર્ગ - ગોપીપુરા, સુરત-૧

◎ શાસ્ત્રસંદેશમાલા - ૧૬
◎ દાર્શનિક-ચર્ચાગ્રન્થનિકરૌઃ
◎ પ્રથમ આવૃત્તિ
◎ આસો વદ-૫, વિ.સ.૨૦૬૧
◎ કિંમત રૂ. ૯૫/-• (પડતર કિંમત)

॥ પ્રમાર્જના - શુદ્ધિ ॥

**પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.**

**પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા.**

**પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ.**

**પંડિતવર્ય શ્રી રતીભાઇ ચીમનલાલ દોશી**

◎ **ટાઇપ સેટીંગઃ** પાયલ પ્રિન્ટર્સ - રાધનપુર
શ્રીજી ગ્રાફીક્સ, પાલડી, અમદાવાદ.

◎ **મુદ્રક** : શિવકૃપા ઓફસેટ પ્રીન્ટર્સ, દૂધેશ્વર, અમદાવાદ-૪

---

વિશેષ નોંધ : શાસ્ત્રસંદેશમાલાના ૧ થી ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેની નોંધ લેવા વિનંતી.

આભાર...! અનુમોદનીય...! અનુકરણીય...!

શાસ્ત્રસંદેશમાલાના સોળમા ભાગના
પ્રકાશનનો સંપૂર્ણ લાભ

પૂ.આ.શ્રી. વિજયજિનચંદ્રસૂરીશ્વરજી
મ.સા.ના શિષ્યરત્ન
પૂ.આ.શ્રી. વિજય સંયમરત્નસૂરીશ્વરજી
મ.સા.ના શિષ્યરત્ન
પૂ.આ.શ્રી વિજય યોગતિલકસૂરીશ્વરજી
મ.સા.ની પ્રેરણાથી

## શ્રી માલવાડા પંચ મહાજન

માલવાડા (રાજસ્થાન)

**તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની**
**નિધિમાંથી લેવામાં આવેલ છે.**
**તેની અમો ભૂરી...ભૂરી...**
**અનુમોદના કરીએ છીએ...!**
**શ્રી સંઘ તથા ટ્રસ્ટીગણના**
**અમો આભારી છીએ ..!**

**- શાસ્ત્રસંદેશમાલા**

# સાધુપણાનું સાર્થકપણું...!

પરાવર્તના સ્વાધ્યાય. ભણેલું યાદ રાખવા માટે 'પરાવર્તના' જોઇએ. વાચના, પૃચ્છના અને પરાવર્તના કરનારને ટાઇમ કેટલો જોઇએ ? એ ત્રણેમાં લાગી જાય તે ભૂત જેવો મટી દેવ જેવો બની જાય. સ્વાધ્યાય વગરનો સાધુ ભૂત જેવો બની બધે ભટક્યા કરે છે. તે સ્વાધ્યાયમાં લાગે તો જ દેવ જેવો બને છે. તમારે ભૂત જેવા બનવું છે કે દેવ જેવા બનવું છે ? મળેલા સાધુપણાને જો સાર્થક કરવું હોય તો સાધુજીવનને સ્વાધ્યાયના રંગે રંગીને દેવ જેવું બનાવવું જોઇએ.

પરાવર્તન બાદ 'અનુપ્રેક્ષા' જોઇએ. જાણેલું, પૂછેલું, પરાવર્તન કરેલ સૂત્ર અને અર્થનું સૂક્ષ્મતાથી ચિંતન, મનન, ઉંડાણથી પરિશીલન કરવું જોઇએ, જેથી એ સૂત્રાર્થ આત્મસ્થ બને. એમ ભણ્યા બાદ, નિઃશંક બન્યા બાદ, પદાર્થને સ્થિર કર્યા બાદ એને આત્મસ્થ બનાવવાની ક્રિયારૂપ સ્વાધ્યાયને અનુપ્રેક્ષા કહેલ છે.

અનુપ્રેક્ષા સ્વાધ્યાયથી જે આત્માને સૂત્રાર્થ પૂરેપૂરા આત્મસ્થ થાય તેને બીજી પણ પુણ્યપ્રકૃતિ વગેરે બાબતો હોય ત્યારે ગુરુ પાસેથી ધર્મકથા કરવાનો અધિકાર મળે છે. ચાર પ્રકારનો સ્વાધ્યાય કર્યા વિના ધર્મકથા કરે એની ધર્મકથામાં ભલીવાર ન આવે. એનાથી સ્વ-પરનું કલ્યાણ થવાના બદલે અકલ્યાણ થાય એવી શક્યતા વધુ હોય છે.

**-પૂ.આ.દેવ.શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા**

# પ્રકાશકીય ......... !

પૂર્વના પૂર્વાચાર્ય - પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય આજે એક નવા સ્વરૂપે આવી રહ્યું છે.

ઉપલબ્ધ ગ્રંથોનું ઉપકારક-ઉપયોગી બનનાર આ એક-અપૂર્વ-અનોખું-અનેરું-અદ્‌ભૂત પ્રકાશનમાં અમો નિમિત્ત બનેલ છીએ તેનો અમોને હર્ષ છે.

છેલ્લા ત્રણ વર્ષથી પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્ય રત્ન પૂ.પંન્યાસશ્રી તપોરત્નવિજયજી મ.સા.ના સંપૂર્ણ માર્ગદર્શન મુજબ પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સાહેબે આ સંકલના તૈયાર કરી આપેલ છે.

શાસ્ત્રસંદેશમાલા દ્વારા પ્રકાશિત થયેલ આ ૨૦ પુસ્તકોમાં પૂ.આ.શ્રી હરિભદ્રસૂરીશ્વરજી મ.સા. તથા પૂ.ઉપા.શ્રી યશોવિજયજી મ.સા. દ્વારા રચાયેલ પદ્ય સાહિત્યના સાત પુસ્તકો છે બાકીના તેર પુસ્તકોમાં અલગ-અલગ કર્તાઓની કૃત્તિઓનો વિષયવાર સમાવેશ કરવામાં આવેલ છે.

શાસ્ત્રસંદેશમાલાના આ પ્રકાશનમાં શુદ્ધિનો વિશેષ ખ્યાલ રાખવામાં આવેલ છે. દરેક પુસ્તકમાં આગળ જણાવેલ પૂજ્યશ્રીઓએ તે પુસ્તકનું પ્રમાર્જન કરી આપેલ છે. તેમાં પૂ.પં.શ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા., પૂ.આ.શ્રી યોગતિલકસૂરીશ્વરજી

મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા. (સંસ્કૃત ગ્રન્થો) તથા પૂ.સા.શ્રી દક્ષાશ્રીજી મ.ના. શિષ્યા પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ. આદિએ વિશેષ કાળજી રાખી શુદ્ધિ કરી આપેલ છે.

જૈન પંડિતોમાં જેમનું આગવું સ્થાન-નામ છે એવા પંડિતવર્યશ્રી રતીભાઇ ચીમનલાલ દોશીએ શાસ્ત્રસંદેશમાલાના આ ૨૦ ભાગનું સમગ્ર મેટર ચેક કરી આપેલ છે. દરરોજ પાંચ-છ કલાક અધ્યયનનું કાર્ય ચાલુ રાખી, અથાગ મહેનત કરી સમયનો જે ભોગ તેઓશ્રીએ આપેલ છે તે પ્રશંસનીય છે.

શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે તથા બીજા અલગ અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યની નિધિમાંથી ઉદારતાપૂર્વક લાભ લઇ આ કાર્યને વેગવંતુ બનાવેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

ટાઇપ સેટીંગ માટે પાયલ પ્રિન્ટર્સ - રાધનપુરના માલિક શ્રી ઇકબાલભાઇ તથા શ્રીજી ગ્રાફીક્સ - અમદાવાદના શ્રી નિકુંજભાઇ પટેલે ઘણી જ ધીરજ અને ખંતથી શ્રી રીઝવાન શેખના સહકારથી આ કાર્યને પૂર્ણતાએ પહોંચાડ્યું છે.

પ્રીન્ટીંગ, ટાઇટલ પ્રીન્ટીંગ તથા બાઇન્ડીંગનું કામ શિવકૃપા ઓફસેટ પ્રીન્ટર્સ-અમદાવાદના ભાવિનભાઇએ વિશેષ કાળજીપૂર્વક કરી આપેલ છે.

**શાસ્ત્રસંદેશમાલા**

# ॥ अनुक्रमणिका ॥


| | | | |
|---|---|---|---|
| | दार्शनिक | | |
| १. | सम्मतिसूत्रम् | १६७ | १-१५ |
| २. | न्यायावतारः | ३२ | १५-१७ |
| ३. | न्यायावतारसूत्रवार्तिकम् | ५७ | १८-२३ |
| ४. | एकविंशतिर्द्वात्रिंशिकाः | ६६३ | २३-८६ |
| ५. | युक्त्यनुशासनम् | ६४ | ८६-९२ |
| ६. | प्रमाणनयतत्त्वालोकालङ्कारः (प्रमाण) | २५० | ९२-११५ |
| ७. | अयोगव्यवच्छेदद्वात्रिंशिका | ३२ | ११५-११८ |
| ८. | अन्ययोगव्यवच्छेदद्वात्रिंशिका | ३२ | ११८-१२१ |
| ९. | उत्पादादिसिद्धिः | ३२ | १२१-१२४ |
| १०. | प्रमाणमीमांसा (प्रमाण) | ७० | १२४-१३० |
| ११. | प्रमाणप्रकाशः | ८३ | १३०-१३९ |
| १२. | षड्दर्शनसमुच्चयः | १८० | १३९-१५४ |
| १३. | स्याद्वादकलिका | ४० | १५५-१५८ |
| १४. | युक्तिप्रकाशः | २८ | १५८-१६० |
| १५. | षड्दर्शनपरिक्रमः | ६६ | १६१-१६६ |
| १६. | अनुमानमातृका | १३ | १६६-१६७ |
| १७. | जैनतत्त्वसारः | ५४७ | १६८-२१६ |
| १८. | नयकर्णिका | २३ | २१६-२१८ |
| १९. | प्रश्नद्वात्रिंशिका | ३२ | २१८-२२१ |

| | | | |
|---|---|---|---|
| २०. | जैनस्याद्वादमुक्तावली | २४८ | २२१–२४८ |
| २१. | स्याद्वादमुक्तावली | ७५ | २४८–२५२ |
| २२. | स्याद्वादभाषा | (प्रमाण) ५० | २५३–२५६ |
| २३. | जल्पकल्पलता | ६६ | २५७–२६६ |
| | चार्चिक | | |
| २४. | सन्देहदोलावली | १५० | २६७–२७९ |
| २५. | गुरुतत्त्वप्रदीपः | २४१ | २७९–३०० |
| २६. | युक्तिप्रबोधः | २५ | ३००–३०२ |
| २७. | केवलिभुक्तिप्रकरणम् | ३७ | ३०३–३०६ |
| २८. | स्त्रीनिर्वाणप्रकरणम् | ५७ | ३०६–३१० |
| २९. | सम्यक्त्वपरीक्षा | १८० | ३११–३२६ |
| ३०. | पौषधषट्त्रिंशिका | ३६ | ३२७–३३० |
| ३१. | ईर्यापथिकीषट्त्रिंशिका | ३६ | ३३०–३३३ |
| ३२. | पर्युषणादशशतकम् | १११ | ३३३–३४२ |
| ३३. | तत्त्वतरङ्गिणी | ६२ | ३४३–३४८ |
| ३४. | पट्टावलीविसुद्धी | १०८ | ३४८–३५७ |
| ३५. | प्रवचनपरीक्षा | ९६१ | ३५८–४४० |
| ३६. | परिशिष्ठ–१ | | १–८ |


संपूर्ण श्लोक संख्या – ४८३३

संपूर्ण पृष्ठ संख्या – ८ + ४४० + ८

पू.आ.श्रीसिद्धसेनदिवाकराचार्यविरचितम्

# ।। सम्मतिसूत्रम् ।।

## नयकंडं

सिद्धं सिद्धत्थाणं ठाणमणोवमसुहं उवगयाणं ।
कुसमयविसासणं सासणं जिणाणं भवजिणाणं ॥ १ ॥

समयपरमत्थवित्थरविहाडजणपज्जुवासणसयण्हो ।
आगममलारहियओ जह होति तमत्थमुन्नेसु ॥ २ ॥

तित्थयरवयणसंगहविसेसपत्थारमूलवागरणी ।
दव्वट्ठिओ अ पज्जवणओ अ सेसा विअप्पा सिं ॥ ३ ॥

दव्वट्ठिअनयपयडी सुद्धा संगहपरूवणाविसओ ।
पडिरूवे पुण वयणत्थनिच्छओ तस्स ववहारो ॥ ४ ॥

मूलनिमेणं पज्जवनयस्स उज्जुसुअवयणविच्छेदो ।
तस्स उ सद्दाईआ साहपसाहा सुहुमभेआ ॥ ५ ॥

नामं ठवणा दविए ति एसु दव्वट्ठिअस्स निक्खेवो ।
भावो उ पज्जवट्ठिअस्स परूवणा एस परमत्थो ॥ ६ ॥

पज्जव णिसामन्नं वयणं दव्वट्ठिअस्स अत्थि त्ति ।
अवसेसो वयणविही पज्जभयणा सपडिवक्खो ॥ ७ ॥

पज्जवनयवोक्कंतं वत्थुं दव्वट्ठिअस्स वयणिज्जं ।
जाव दविओवओगो अपच्छिमविअप्पनिव्वयणो ॥ ८ ॥

दव्वट्ठिओ त्ति तम्हा नत्थि नओ निअमसुद्धजाईओ ।
न य पज्जवट्ठिओ नाम कोइ भयणाय उ विसेसो ॥ ९ ॥

दव्वट्ठिअवत्तव्वं अवत्थु नियमेण होइ पज्जाए ।
तह पज्जववत्थु अवत्थुमेव दव्वट्ठिअनयस्स ॥ १० ॥

उप्पज्जंति वयंति अ भावा निअमेण पज्जवनयस्स ।
दव्वट्ठियस्स सव्वं सया अणुप्पन्नमविणट्ठं ॥ ११ ॥

दव्वं पज्जवविउयं दव्वविउत्ता य पज्जवा नत्थि ।
उप्पायठिईभंगा हंदि दविअलक्खणं एअं ॥ १२ ॥

एए पुण संगहओ पाडिक्कमलक्खणं दुविण्हं पि ।
तम्हा मिच्छद्दिट्ठी पत्तेअं दो वि मूलनया ॥ १३ ॥

ण य तइओ अत्थि नओ न य सम्मत्तं न तेसु पडिपुण्णं ।
जेण दुवे एगंते विभज्जमाणा अणेगंतो ॥ १४ ॥

जह एए तह अन्ने पत्तेयं दुण्णया नया अन्ने ।
हंदि हु मूलनयाणं पन्नवणे वावडा ते वि ॥ १५ ॥

सव्वनयसमूहम्मि वि नत्थि नओ उभयवायपण्णवओ ।
मूलनयाण उ आणं पत्तेअविसेसिअं बिंति ॥ १६ ॥

ण य दव्वट्ठिअपक्खे संसारो णेय पज्जवनयस्स ।
सासयवियत्तिवाई जम्हा उच्छेअवाइआ ॥ १७ ॥

सुहदुक्खसंपओगो न जुज्जई निच्चवायपक्खम्मि ।
एगं तुच्छेअम्मि वि सुहदुक्ख विअप्पणमजुत्तं ॥ १८ ॥

कम्मं जोगनिमित्तं बज्झइ बंधट्ठिई कसायवसा ।
अपरिणउच्छिण्णेसु अ बंधट्ठिई कारणं नत्थि ॥ १९ ॥

बंधम्मि अपूरंते संसारभओहदंसणं मोज्झं ।
बंधं च विणा मोक्खसुहपत्थणा णत्थि मोक्खो य ॥ २० ॥

तम्हा सव्वे वि नया मिच्छद्दिट्ठी सपक्खपडिबद्धा ।
अन्नोन्ननिस्सिआ उण हवंति संमत्तसब्भावा ॥ २१ ॥

जह णेगलक्खणगुणगणवेरुलिआइमणी विसंजुत्ता ।
रयणावलिववएसं न लहंति महग्घमुल्ला वि ॥ २२ ॥

तह निअयवायसुविनिच्छिआ वि अन्नोन्नपक्खनिरवेक्खा ।
सम्मद्दंसणसद्दं सव्वे वि नया न पावंति ॥ २३ ॥

जह पुण ते चेव मणी जहा गुणविसेसभागपडिबद्धा ।
रयणावलि त्ति भन्नइ जहन्ति पाडिक्कसन्नाओ ॥ २४ ॥

तह सव्वे नयवाया जहाणुरूवं वि णिउत्तवत्तव्वा ।
सम्मद्दंसणसद्दं लहंति न वि सेस (स) न्नाओ ॥ २५ ॥

लोइअपरिच्छिअसुहो निच्छयवयणपडिवत्तिमग्गो अ ।
अह पन्नवणाविसओ त्ति तेण वीसत्थमुवणीओ ॥ २६ ॥

इहरा समूह सिद्धो परिणामकउ व्व जो जहिं अत्थो ।
ते तं च ण तं तं चेव व त्तिणिअमेण मिच्छत्तं ॥ २७ ॥

निअयवयणिज्जसच्चा सव्वनया परिविआलणे दोसा ।
ते उण निदिट्ठसमट्ठ विभयइ सच्चे व अलिए वा ॥ २८ ॥

दव्वट्ठिअवत्तव्वं सच्चं सच्चेण निच्चमविअप्पं ।
आरद्धो अ विभागो पज्जववत्तव्वमग्गो अ ॥ २९ ॥

सो पुण समासओ चिअ वंजणनिअओ अ अत्थनिअओ अ ।
अत्थगओ अ अभिन्नो भइअव्वो वंजणविगप्पो ॥ ३० ॥

एगदविअम्मि जे अत्थपज्जवा वयणपज्जवा वा वि ।
तीआणागयभूआ तावइअं तं हवइ दव्वं ॥ ३१ ॥

पुरिसम्मि पुरिससद्दो जम्माईमरणकालपज्जंतो ।
तस्स उ बालाईआ पज्जवजोगा बहुविगप्पा ॥ ३२ ॥

अत्थि त्ति निव्विअप्पं पुरिसं जो भणइ पुरिसकालम्मि ।
सो बालाइविगप्पं न लहइ तुल्लं व पाविज्जा ॥ ३३ ॥

वंजणपज्जायस्स उ पुरिसो पुरिसो त्ति निच्चमविअप्पो ।
बालाइविगप्पं पुण पासइ से अत्थपज्जाओ ॥ ३४ ॥

सविअप्प निव्विअप्पं इअ पुरिसं जो भणिज्ज अविअप्पं ।
सविअप्पमेव वा निच्छएण न य निच्छिओ समए ॥ ३५ ॥

अत्थंतरभूएहि अ निअएहि अ दोहि समयमाईहिं ।
वयणविसेसाईअं दव्वमवत्तव्वयं पडइ ॥ ३६ ॥

अह देसो सब्भावे देसो सब्भावपज्जवे निअओ ।
तं दविअमत्थि नत्थि अ आएसविसेसिअं जम्हा ॥ ३७ ॥

सब्भावे आइट्ठो देसो देसो अ उभयहा जस्स ।
तं अत्थि अवत्तव्वं च होइ दविअं विअप्पवसा ॥ ३८ ॥

आइट्ठोऽ सब्भावे देसो देसो अ उभयहा जस्स ।
तं णत्थि अवत्तव्वं च होइ दविअं विअप्पवसा ॥ ३९ ॥

सब्भावासब्भावे देसो देसो अ उभयहा जस्स ।
तं अत्थि णत्थिअवत्तव्वयं च दविअं विअप्पवसा ॥ ४० ॥

एवं सत्तविअप्पो वयणपहो होइ अत्थपज्जाए ।
वंजणपज्जाए पुण सविअप्पो निव्विअप्पो अ ॥ ४१ ॥

जह दविअमप्पिअं तं तहेव अत्थि त्ति पज्जवनयस्स ।
न य समयपन्नवणा पज्जवनयमेत्तपडिपुण्णा ॥ ४२ ॥

पडिपुण्णजोव्वणगुणो जह लज्जइ बालभावचरिएहिं ।
कुणइ अ गुणपणिहाणं अणागयसुहोवहाणत्थं ॥ ४३ ॥

ण य होइ जोव्वणत्थो बालो अन्नो वि लज्जइ न तेण ।
न वि अ अणागयवयगुणपसाहणं जुज्झइ विभत्ते ॥ ४४ ॥

जाइकुलरूवलक्खणसन्नासंबंधओ अहिगयस्स ।
बालाइभावदिट्ठविगयस्स जह तस्स संबंधो ॥ ४५ ॥

तेहिं अइआणागयदोसगुणदुगंछणऽब्भुवगमेहिं ।
तह बंधमोक्खसुहदुक्खपत्थणा होइ जीवस्स ॥ ४६ ॥

अन्नोन्नाणुगयाणं इमं च तं चत्ति विभयणमजुत्तं ।
जह दुद्धपाणिआणं जावंत विसेसपज्जाया ॥ ४७ ॥

रूवाइपज्जवा जे देहे जीवदविअम्मि सुद्धम्मि ।
ते अन्नोन्नाणुगया पण्णवणिज्जा भवत्थम्मि ॥ ४८ ॥

एवं एगे आया एगे दंडो अ होइ किरिआ य ।
करणविसेसेण य तिविहजोगसिद्धी उ अविरुद्धा ॥ ४९ ॥

नय बाहिरओ भावो अब्भिंतरओ अ अत्थि समयम्मि ।
नोइंदिअं पुण पडुच्च होइ अब्भिंतरो भावो ॥ ५० ॥

दव्वट्ठिअस्स आया बंधइ कम्मं फलं च वेएइ ।
बिइअस्स भावमेत्तं न कुणइ नय को वि वेएइ ॥ ५१ ॥

दव्वट्ठिअस्स जो चेव कुणइ सो चेव वेअई निअमा ।
अन्नो करेइ अन्नो परिभुंजइ पज्जवनयस्स ॥ ५२ ॥

जं वयणिज्जविअप्पा संजुज्जंतेसु होंति एएसु ।
सा ससमयपण्णवणा तित्थयरासायणा अन्ना ॥ ५३ ॥

पुरिसज्जायं तु पडुच्च जाणओ पण्णवेज्ज अण्णयरं ।
परिकम्मणानिमित्तं दाएही सो विसेसं पि ॥ ५४ ॥

## ॥ जीवकंडं ॥

जं सामन्नग्गहणं दंसणमेअं विसेसिअं नाणं ।
दोण्ह वि णयाण एसो पाडेक्कं अत्थपज्जाओ ॥ ५५ ॥

दव्वट्ठिओ वि होउण दंसणे पज्जवट्ठिओ होइ ।
उवसमिआईभावं पडुच्च नाणे उ विवरीअं ॥ ५६ ॥

मणपज्जवनाणंतो नाणस्स य दंसणस्स य विसेसो ।
केवलनाणं पुण दंसणं ति नाणं ति अ समाणं ॥ ५७ ॥

केई भणंति जइआ जाणइ तइआ ण पासइ जिणो त्ति ।
मुत्ति (सुत्त) मवलंबमाणा तित्थयरासायणाभीरू ॥ ५८ ॥

केवलनाणावरणक्खयजायं केवलं जहा नाणं ।
तह दंसणं पि जुज्जइ निअआवरणक्खय स्संते ॥ ५९ ॥

भन्नइ खीणावरणे जइ (ह) मइनाणं जिणे न संभवइ ।
तह खीणावरणिज्जे विसेसओ दंसणं नत्थि ॥ ६० ॥

सुत्तम्मि चेव साई अवज्जवसिअं ति केवलं भणिअं ।
सुत्तासायणभीरुहिं तं पि दट्ठव्वियं होइ ॥ ६१ ॥

संतम्मि केवले दंसणम्मि नाणस्स संभवो नत्थि ।
केवलनाणम्मि अ दंसणस्स तम्हा सणिहणाइं ॥ ६२ ॥

दंसणनाणावरणक्खए समाणम्मि कस्स पुव्वयरं ।
होज्ज समं उप्पाओ हंदि दुवे नत्थि उवओगा ॥ ६३ ॥

जइ सव्वं सायारं जाणाइ सव्वसमएण सव्वन्नू ।
जुज्जइ सया वि एवं अहवा सव्वं न याणाइ ॥ ६४ ॥

परिसुद्धं सागारं अविअत्तं दंसणं अणागारं ।
नय खीणावरणिज्जे जुज्जइ सविअत्तमविअत्तं ॥ ६५ ॥

अद्दिट्ठं अन्नायं केवली एव भासइ सया वि ।
एगसमएण हंदी वयणविअप्पो न संभवइ ॥ ६६ ॥

अन्नायं पासंतो अदिट्ठं च अरहा विआणंतो ।
किं जाणइ किं पासइ कह सव्वण्णु त्ति वा होइ ॥ ६७ ॥

केवलनाणमणंतं जहेव तह दंसणं पि पण्णत्तं ।
सागारग्गहणाहिअ निअमपरित्तं अणागारं ॥ ६८ ॥

भण्णइ जह चउनाणी जुज्जइ निअमा तहेव एअं पि ।
भण्णइ न पंचनाणी जहेव अरहा तहेअं पि ॥ ६९ ॥

पण्णवणिज्जा भावा समत्तसुअनाणदंसणा विसओ ।
ओहिमणपज्जवाण उ अन्नोन्नविलक्खणो विसओ ॥ ७० ॥

तम्हा चउव्विभागो जुज्जइ न उ नाणदंसणजिणाणं ।
सयलमणावरणमणंतमक्खयं केवलं नाणं ॥ ७१ ॥

परवत्तव्वयपक्खा अविसिट्ठा तेसु तेसु सुत्तेसु ।
अत्थगई य उ तेसिं विअंजणं जाणओ कुणई ॥ ७२ ॥

जेण मणोविसयगयाण दंसणं नत्थि दव्वजायाणं ।
तो मणपज्जवनाणं निअमा नाणं तु निद्दिट्ठं ॥ ७३ ॥

चक्खुअचक्खुअवहिकेवलाण समयम्मि दंसणविगप्पा ।
परिपढिआ केवलनाणदंसणा तेण ते अन्ना ॥ ७४ ॥

दंसणमोग्गहमेत्तं घटो त्ति निव्वण्णणा हवइ नाणं ।
जह एत्थ केवलाणं विसेसणं एत्तिअं चेव ॥ ७५ ॥

दंसणपुव्वं नाणं नाणनिमित्तं तु दंसणं नत्थि ।
तेण सुविणिच्छिआमो दंसणनाणा ण अण्णत्तं ॥ ७६ ॥

जइ उग्गहमित्तं दंसणमिति मन्नसि विसेसिअं नाणं ।
मइनाणमेव दंसणमेवं सइ होइ निप्फण्णं ॥ ७७ ॥

एवं सेसिंदिअदंसणेसु नियमेण होइ न य जुत्तं ।
अह तत्थ नाणमेत्तं घिप्पइ चक्खुम्मि वि तहेव ॥ ७८ ॥

नाणं अप्पुट्ठे अविसए अ अत्थम्मि दंसणं होइ ।
मोत्तूण लिंगओ जं अणागयाईअविसएसु ॥ ७९ ॥

मणपज्जवनाणं दंसणं ति तेणेव होइ नय जुत्तं ।
भन्नइ नाणं नोइंदिअं ति न घडादओ जम्हा ॥ ८० ॥

मइसुअनाणनिमित्तो छउमत्थे होइ अत्थउवलंभो ।
एगयरम्मि वि तेसिं न दंसणं दंसणं कत्तो ॥ ८१ ॥

जं पच्चक्खग्गहणं ण इन्ति सुअनाणसंसिआ अत्था ।
तम्हा दंसणसद्दो न होइ सयलो वि सुअनाणे ॥ ८२ ॥

जं अप्पुट्ठा भावा ओहीनाणस्स हुंति पच्चक्खा ।
तम्हा ओहीनाणे दंसणसद्दो वि उवउत्तो ॥ ८३ ॥

जं अप्पुट्ठे भावे जाणइ पासइ अ केवली निअमा ।
तम्हा तं नाणं दंसणं च अविसेसओ सिद्धं ॥ ८४ ॥

साईअपज्जवसिअं ति दो वि ते ससमयओ हवइ एवं ।
परतित्थिअवत्तव्वं च एगसमयंतरुप्पाओ ॥ ८५ ॥

एवं जिणपन्नत्ते सद्दहमाणस्स भावओ भावे ।
पुरिसस्साभिणिबोहे दंसणसद्दो हवइ जुत्तो ॥ ८६ ॥

सम्मन्नाणे निअमेण दंसणं दंसणे उ भइअव्वं ।
सम्मण्णाणं च इमं ति अत्थओ होइ उववण्णं ॥ ८७ ॥

केवलनाणं साई अपज्जवसिअं ति दाइअं समए ।
तेत्तिअमेत्तो तूणा केइ विसेसं न इच्छंति ॥ ८८ ॥

जे संघयणाईआ भवत्थकेवलिविसेसपज्जाया ।
ते सिज्झमाणसमयम्मि होंति विगइं तओ होइ ॥ ८९ ॥

सिद्धत्तणेण य पुणो उप्पन्नो एस अत्थपज्जाओ ।
केवलभावं तु पडुच्च केवलं दाइअं समए ॥ ९० ॥

जीवो अणाइनिहणो केवलनाणं तु साइअमणंतं ।
इअ थोरम्मि विसेसे कह जीवो केवलं होइ ॥ ९१ ॥

तम्हा अन्नो जीवो अन्ने नाणाइपज्जवा तस्स ।
उवसमिआईलक्खणविसेसओ के वि इच्छंति ॥ ९२ ॥

अह पुण पुव्वपउत्तो अत्थो एगंतपक्खपडिसेहे ।
तह वि उदाहरणमिणं ति हेउपडिजोअणं वोच्छं ॥ ९३ ॥

जह कोइ सट्ठिवरिसो तीसइवरिसो नराहिवो जाँउओ ।
उभयत्थ जायसद्दो वासविभागं विसेसेइ ॥ ९४ ॥

एवं जीवद्दविअं अणाइनिहणमविसेसिअं जम्हा ।
रायसरिसो उ केवलि पज्जाओ तस्स सविसेसो ॥ ९५ ॥

जीवो अणाइनिहणो जीव त्ति अ निअमओ न वत्तव्वो ।
जं पुरिसाउअ जीवो देवाउअ जीविअविसिट्ठो ॥ ९६ ॥

संखिज्जमसंखिज्जं अणंतकप्पं च केवलं नाणं ।
तह रागदोसमोहा अन्ने वि अ जीवपज्जाया ॥ ९७ ॥

## ॥ दव्वकंडं ॥

सामण्णम्मि विसेसो विसेसपक्खे अ वयणविण्णासो ।
दव्वपरिणाममण्णं दाएइ तयं व निअमेइ ॥ ९८ ॥

एगंतनिव्विसेसं एगंतविसेसियं च वयमाणो ।
दव्वस्स पज्जवे पज्जवा हि दविअं निअत्तेइ ॥ ९९ ॥

पच्चुप्पन्नं भावं विगयभविस्सेहिं जं समाणेइ ।
एअं पडुच्च वयणं दव्वंतरनिस्सिअं जं च ॥ १०० ॥

दव्वं जहा परिणयं तहेव अत्थि त्ति तम्मि समयम्मि ।
विगयभविस्सेहि उ पज्जवेहिं भयणा विभयणा वा ॥ १०१ ॥

परपज्जवेहिं असरिसगमेहिं निअमेण निच्चमवि नत्थि ।
सरिसेहि वि वंजणओ अत्थी ण पुण अत्थ पज्जाए ॥ १०२ ॥

पच्चुप्पन्नम्मि वि पज्जयम्मि भयणागइं पडइ दव्वं ।
जं एगगुणाईया अणंतकप्पा गुणविसेसा ॥ १०३ ॥

कोवं उप्पायंतो पुरिसो जीवस्स कारओ होइ ।
तत्तो विभएअव्वो परम्मि सयमेव भइअव्वो ॥ १०४ ॥

रूवरसगंधफासा असमाणग्गहणलक्खणा जम्हा ।
तम्हा दव्वाणुगया गुण त्ति ते केइ इच्छंति ॥ १०५ ॥

दूरे ता अन्नत्तं गुणसद्दे चेव ताव पारिच्छं ।
जं पज्जावाहि(इ)ओ होज्ज पज्जवे चेव गुणसन्ना ॥ १०६ ॥

दो पुण नया भगवया दव्वट्ठिअपज्जवट्ठिआ निअया ।
एत्तो अ गुणविसेसे गुणट्ठिअनओ वि जुज्जंतो ॥ १०७ ॥

जं च पुण अरहया तेसु तेसु सुत्तेसु गोअमाईणं ।
पज्जवसण्णा निअमा वागरिआ तेण पज्जाया ॥ १०८ ॥

परिगमणं पज्जाओ अणेगकरणं गुणो त्ति एगत्था ।
तह वि न गुणो त्ति भन्नइ पज्जवन्नयदेसण्णा जम्हा ॥ १०९ ॥

जंपंति अत्थि समए एगगुणो दसगुणो अणंतगुणो ।
रूवाईपरिणामो भन्नइ तम्हा गुणविसेसो ॥ ११० ॥

गुणसद्दमंतरेणावि तं तु पज्जवविसेससंखाणं ।
सिज्झइ नवरं संखा न सत्थधम्मो तइ गुणोत्ति ॥ १११ ॥

जह दससु दसगुणम्मि एगम्मि दसत्तणं समं चेव ।
अहिअम्मि वि गुणसद्दे तहेव एअं पि दट्ठव्वं ॥ ११२ ॥

एगंतपक्खवाओ जो पुण दव्वगुणजाइभेयणम्मि ।
अह पुव्वं पडिकुट्ठो उ आहरणमेत्तमेयं ति ॥ ११३ ॥

पिअपुत्तमित्तभज्जयभाऊणं एगपुरिससंबंधो ।
न य सो एगस्स पिउ त्ति सेसयाणं पिआ होइ ॥ ११४ ॥

जह संबंधविसिट्ठो सो पुरिसो पुरिसभावनिरइसओ ।
तह दव्वमिंदिअगयं रूवाइविसेसणं लहइ ॥ ११५ ॥

होज्जाहि दुगुणमहुरं अणंतगुणकालयं च जं दव्वं ।
न हु डहरओ महल्लो व होइ संबंधओ पुरिसो ॥ ११६ ॥

भन्नइ संबंधवसा जइ संबंधित्तणं अनुमयं ते ।
णणु संबंधविसेसं संबंधिविसेसणं सिद्धं ॥ ११७ ॥

जुज्जइ संबंधवसा संबंधिविसेसणं न पुण एअं ।
नयणाइविसेसगओ रूवाइविसेसपरिणामो ॥ ११८ ॥

भन्नइ विसमपरिणयं कह एअं होहिइत्ति उवणीअं ।
तं होइ परनिमित्तं न वत्ति एत्थत्थि एगंतो ॥ ११९ ॥

दव्वस्स ठिई जम्म विगमा य गुणलाक्खणं तु वत्तव्वं ।
एअं सइ केवलिणो जुज्जइ तं नो उ दविअस्स ॥ १२० ॥

दव्वत्थंतरभूआ मुत्ता ऽमुत्ता व ते गुणा होज्जा ।
जइ मुत्ता परमाणू नत्थि अमुत्तेसु अग्गहणं ॥ १२१ ॥

सीसमईवित्थारणमित्तत्थोयं कओ समुल्लावो ।
इहरा कहामुहं चेव नत्थि एवं ससमयम्मि ॥ १२२ ॥

न वि अत्थि अन्नवाओ न वि तव्वाओ जिणोवएसम्मि ।
तं चेव य मन्नंता अवमण्णंता न याणंति ॥ १२३ ॥

भयणा वि हु भइअव्वा जह भयणा भयइ सव्वदव्वाइं ।
एवं भयणानिअमो अ होइ समयाविरोहेणं ॥ १२४ ॥

निअमेण सद्दहंतो छक्काए भावओ न सद्दहइ ।
हंदी अपज्जवेसु वि सद्दहणा होइ अविभत्ता ॥ १२५ ॥

गइपरिणयं गई चेव केइ निअमेण दविअमिच्छंति ।
तं पि अ उड्ढगईअं तहा गई अन्नहा अगई ॥ १२६ ॥

गुणनिव्वत्तियसन्ना एवं दहणादओ वि दट्ठव्वा ।
जं तु तहा पडिसिद्धं दव्वमदव्वं तहा होइ ॥ १२७ ॥

कुंभो न जीवदविअं जीवो वि न होइ कुंभदविअं ति ।
तम्हा दो वि अदविअं अन्नोन्नविसेसिआ होंति ॥ १२८ ॥

उप्पाओ दुविगप्पो पओगजणिओ अ विस्ससा चेव ।
तत्थ उ पओगजणिओ समुदयजणिओ अ परिसुद्धो ॥ १२९ ॥

साभाविओ समुदयकउ व्व एगंतिओ व्व होज्जाहि ।
आगासाईआणं तिण्हं परपच्चओ निअमा ॥ १३० ॥

विगमस्स वि एस विही समुदयजणिअम्मि सो उ दुविगप्पो ।
समुदयविभागमेत्तं अत्थंतरभावगमणं च ॥ १३१ ॥

तिन्नि व उप्पायाई अभिन्नकाला य भिन्नकाला य ।
अत्थंतरं अणत्थंतरं च दविआहिं नायव्वा ॥ १३२ ॥

जो आकुंचणकालो सो चेव पसारिअस्स नो जुत्तो ।
तेसुं पडिवत्ती विगमे कालंतरं नत्थि ॥ १३३ ॥

उप्पज्जमाणकालं उप्पन्नं ति विगयं विगच्छंतं ।
दविअं पण्णवयंतो तिकालविसयं विसेसेइ ॥ १३४ ॥

दव्वंतरसंजोआहिं के वि दविअस्स दिंति (बिंति) उप्पायं ।
उप्पायत्थाकुसला विभागजाइं न इच्छंति ॥ १३५ ॥

अणुदुअणुएहिं आरद्धे दव्वे तिअणुअं ति निद्देसो ।
तत्तो अ पुण विभत्ते अणुत्ति जाओ अणू होइ ॥ १३६ ॥

बहुआण एगसद्दे जइ संजोगाहि होइ उप्पाओ ।
नणु एगविभागम्मि वि जुज्जइ बहुआण उप्पाओ ॥ १३७ ॥

एगसमयम्मि एगदविअस्स बहुआ वि हुंति उप्पाया ।
उप्पायसमा विगमा ठिईओ उस्सग्गओ निअमा ॥ १३८ ॥

कायमणवयणकिरिआरूवाइगईविसेसओ होइ ।
संजोअभेअओ जाणणा वि दविअस्स उप्पाओ ॥ १३९ ॥

दुविहो धम्मावाओ अहेउवाओ अ हेउवाओ अ ।
तत्थ उ अहेउवाओ भविआभविआदओ भावा ॥ १४० ॥

भविओ सम्मद्दंसणनाणचरित्तपडिवत्तिसंपन्नो ।
निअमा दुक्खंतविअत्तिलक्खणं हेउवायस्स ॥ १४१ ॥

जो हेउवायपक्खम्मि होइउ (हेउओ) आगमे अ आगमिओ ।
सो समए पण्णत्तो सिद्धंतविराहओ अन्नो ॥ १४२ ॥

परिसुद्धो नयवाओ आगममेत्तत्थसाहओ भणिओ ।
सो चेव् दुन्नयिणो दोणि वि पक्खे विहम्मे वि ॥ १४३ ॥

जावइआ वयणपहा तावइआ चेव हुंति नयवाया ।
जावइआ नयवाया तावइया चेव परसमया ॥ १४४ ॥

जं काविलं दरिसणं एयं दव्वट्ठिअस्स वत्तव्वं ।
सुद्धोअणतणयस्स उ परिसुद्धो पज्जवविगप्पो ॥ १४५ ॥

दोहिं वि नएहिं नीअं सत्थमलूएण तह वि मिच्छत्तं ।
जं सविसयपहाणत्तणेण अन्नोन्ननिरविक्खा ॥ १४६ ॥

जे संतवायदोसे सक्कोलुआ वयंति संखाणं ।
संखा य असव्वाए तेसिं सव्वे वि ते सच्चा ॥ १४७ ॥

ते उ भयणोवणीआ सम्मद्दंसणमणुत्तरं होंति ।
जं भवदुक्ख (स) विमुक्खं दो वि न पूरंति पाडिक्कं ॥ १४८ ॥

नत्थि पुढवीविसिट्ठो घडो त्ति जं तेण जुज्जइ अणन्नो ।
जं सु ण (पुण) घडो त्ति पुव्वं न आसि पुढवी तओ अन्नो॥ १४९ ॥

कालो सहावनिअओ(इ) पुव्वगयं पुरिसकारणेगंता ।
मिच्छत्तं तं चेव उ समासओ होंति सम्मत्तं ॥ १५० ॥

नत्थि न निच्चो न कुणइ कयं न वेएइ नत्थि निव्वाणं ।
णत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥ १५१ ॥

अत्थि अविणासधम्मा करेइ वेएइ अत्थि निव्वाणं ।
अत्थि य मोक्खोवाओ छ संमत्तस्स ठाणाइं ॥ १५२ ॥

साहंमओ व्व अत्थं साहिज्ज परो विहम्मओ वा वि ।
अन्नोन्नं पडिकुट्ठा दोण्णि वि एए असव्वाया ॥ १५३ ॥

दव्वट्ठिअवत्तव्वं सामन्नं पज्जवस्स य विसेसो ।
एए समोवणीआ विभज्जवायं विसेसेंति ॥ १५४ ॥

हेउविसओवणीअं जह वयणिज्जं परो निअत्तेई ।
जइ तं तहा पुरिल्लो दायंतो केण जिप्पंतो ॥ १५५ ॥

एगांतासब्भूअं सब्भूअं अणिच्छिअं च वयमाणो ।
लोइअपरिच्छयाणं वयणिज्जपहे पडइ वाई ॥ १५६ ॥

दव्वं खेत्तं कालं भावं पज्जायदेससंजोगे ।
भेअं च पडुच्च समा भावाणं पण्णवर्णपज्जा ॥ १५७ ॥

पाडेक्कनय पहगयं सुत्तं सुत्तधरसद्दसंतुट्ठा ।
अविकोविअसामत्था जहागमविभागपडिवत्ती ॥ १५८ ॥

सम्मद्दंसणमिणमो सयल समत्तवयणिज्जनिद्दोसं ।
अत्तुक्कोसविणट्ठा सलाहमाणा विणासंति ॥ १५९ ॥

न हु सासणभत्तीमेत्तएण सिद्धंतजाणओ होइ ।
न वि जाणओ अ निअमा पन्नवणानिच्छिओ नामं ॥ १६० ॥

सुत्तं अत्थनिमेणं न सुत्तमित्तेण अत्थपडिवत्ती ।
अत्थगई वि अ नयवायगहणलीणा दुरहिगम्मा ॥ १६१ ॥

तम्हा अहिगयसुत्तेण अत्थसंपायणम्मि जइअव्वं ।
आयरिअधीरहत्था हंदि पहाणं विलंबंति ॥ १६२ ॥

जह जह बहुस्सुओ सम्मओ अ सीसगणसंपरिवुडो अ ।
अविणिच्छओ अ समए तह तह सिद्धंतपडिणीओ ॥ १६३ ॥

चरणकरणप्पहाणा ससमयपरसमयमुक्कवावारा ।
चरणकरणस्स सारं निच्छयसुद्धं न याणंति ॥ १६४ ॥

नाणं किरिआरहिअं किरिआमित्तं च दो वि एगंता ।
असमत्था दाएउं जम्ममरणदुक्खमाभाइ ॥ १६५ ॥

जेण विणा लोगस्स वि ववहारो सव्वहा न निव्वडइ ।
तस्स भुवणेक्कगुरुणो नमो अणेगंतवायस्स ॥ १६६ ॥

भद्दं मिच्छदंसणसमूहमइअस्स अमयसायस्स ।
जिणवयणस्स भगवओ संविग्गसुहाहिगम्मस्स ॥ १६७ ॥

## ॥ न्यायावतारः ॥

प्रमाणं स्वपराभासि ज्ञानं बाधविवर्ज्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥ १ ॥

प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥ २ ॥

प्रसिद्धानां प्रमाणानां लक्षणोक्तौ प्रयोजनम् ।
तद्व्यामोहनिवृत्तिः स्याद् व्यामूढमनसामिह ॥ ३ ॥

अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्षमितरद् ज्ञेयं परोक्षं ग्रहणेक्षया ॥ ४ ॥

साध्याविनाभुनो(वो) लिङ्गात् साध्यनिश्चायकं स्मृतम् ।
अनुमानं तदभ्रान्तं प्रमाणत्वात् समक्षवत् ॥ ५ ॥

न प्रत्यक्षमपि भ्रान्तं प्रमाणत्वविनिश्चयात् ।
भ्रान्तं प्रमाणमित्येतद् विरुद्धवचनं यतः ॥ ६ ॥

सकलप्रतिभासस्य भ्रान्तत्वासिद्धितः स्फुटम् ।
प्रमाणं स्वान्यनिश्चायि द्वयसिद्धौ प्रसिद्ध्यति ॥ ७ ॥

दृष्टेष्टाव्याहताद्वाक्यात् परमार्थाभिधायिनः ।
तत्त्वग्राहितयोत्पन्नं मानं शाब्दं प्रकीर्त्तितम् ॥ ८ ॥

आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् ।
तत्त्वोपदेशकृत् सार्वं शास्त्रं कापथघट्टनम् ॥ ९ ॥

स्वनिश्चयवदन्येषां निश्चयोत्पादनं बुधैः ।
परार्थं मानमाख्यातं वाक्यं तदुपचारतः ॥ १० ॥

प्रत्यक्षेणानुमानेन प्रसिद्धार्थप्रकाशनात् ।
परस्य तदुपायत्वात् परार्थत्वं द्वयोरपि ॥ ११ ॥

प्रत्यक्षप्रतिपन्नार्थप्रतिपादि च यद्वचः ।
प्रत्यक्षं प्रतिभासस्य निमित्तत्वात्तदुच्यते ॥ १२ ॥

साध्याविनाभुवो हेतोर्वचो यत् प्रतिपादकम् ।
परार्थमनुमानं तत् पक्षादिवचनात्मकम् ॥ १३ ॥

साध्याभ्युपगमः पक्षः प्रत्यक्षाद्यनिराकृतः ।
तत्प्रयोगोऽत्र कर्त्तव्यो हेतोर्गोचरदीपकः ॥ १४ ॥

अन्यथा वाद्यभिप्रेतहेतुगोचरमोहितः ।
प्रत्याय्यस्य भवेद्धेतुर्विरुद्धारेकितो यथा ॥ १५ ॥

धानुष्कगुणसंप्रेक्षिजनस्य परिविध्यतः ।
धानुष्कस्य विना लक्ष्यनिर्देशेन गुणेतरौ ॥ १६ ॥

हेतोस्तथोपपत्त्या वा स्यात् प्रयोगोऽन्यथापि वा ।
द्विविधोऽन्यतरेणापि साध्यसिद्धिर्भवेदिति ॥ १७ ॥

साध्यसाधनयोर्व्याप्तिर्यत्र निश्चीयतेतराम् ।
साधर्म्म्येण स दृष्टान्तः सम्बन्धस्मरणान्मतः ॥ १८ ॥

साध्ये निवर्त्तमाने तु साधनस्याप्यसम्भवः ।
ख्याप्यते यत्र दृष्टान्तो वैधर्म्म्येणेति स स्मृतः ॥ १९ ॥

अन्तर्व्याप्त्यैव साध्यस्य सिद्धेर्बहिरुदाहृतिः ।
व्यर्था स्यात्तदसद्भावेऽप्येवं न्यायविदो विदुः ॥ २० ॥

प्रतिपाद्यस्य यः सिद्धः पक्षाभासोऽस्ति लिङ्गतः ।
लोकस्ववचनाभ्यां च बाधितोऽनेकधा मतः ॥ २१ ॥

अन्यथानुपपन्नत्वं हेतोर्लक्षणमीरितम् ।
तदप्रतीतिसन्देहविपर्य्यासैस्तदाभता ॥ २२ ॥

असिद्धस्त्वप्रतीतो यो योऽन्यथैवोपपद्यते ।
विरुद्धो योऽन्यथाप्यत्र युक्तोऽनैकान्तिकः स तु ॥ २३ ॥

साधर्म्म्येणात्र दृष्टान्तदोषा न्यायविदीरिताः ।
अपलक्षणहेतूत्थाः साध्यादिविकलादयः ॥ २४ ॥

वैधर्म्म्येणात्र दृष्टान्तदोषा न्यायविदीरिताः ।
साध्यसाधनयुग्मानामनिवृत्तेश्च संशयात् ॥ २५ ॥

वाद्युक्ते साधने प्रोक्तदोषाणामुदभावनम् ।
दूषणं निरवद्ये तु दूषणाभासनामकम् ॥ २६ ॥

सकलावरणमुक्तात्म केवलं यत् प्रकाशते ।
प्रत्यक्षं सकलार्थात्मसततप्रतिभासनम् ॥ २७ ॥

प्रमाणस्य फलं साक्षादज्ञानविनिवर्त्तनम् ।
केवलस्य सुखोपेक्षे शेषस्यादानहानधीः ॥ २८ ॥

अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ।
एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः ॥ २९ ॥

नयानामेकनिष्ठानां प्रवृत्तेः श्रुतवर्त्मनि ।
सम्पूर्णार्थविनिश्चायि स्याद्वादश्रुतमुच्यते ॥ ३० ॥

प्रमाता स्वान्यनिर्भासी कर्ता भोक्ता विवृत्तिमान् ।
स्वसंवेदनसंसिद्धो जीवः क्षित्याद्यनात्मकः ॥ ३१ ॥

प्रमाणादिव्यवस्थेयमनादिनिधनात्मिका ।
सर्वसंव्यवहतृणां प्रसिद्धापि प्रकीर्त्तिता ॥ ३२ ॥

श्रीशान्त्याचार्यविरचितम्

# ॥ न्यायावतारसूत्रवार्तिकम् ॥

## १. सामान्यलक्षणपरिच्छेदः ।

हिताहितार्थसंप्राप्ति-त्यागयोर्यन्निबन्धनम् ।
तत् प्रमाणं प्रवक्ष्यामि सिद्धसेनार्कसूत्रितम् ॥ १ ॥

प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥ २ ॥

सन्निकर्षादिकं नैव प्रमाणं तदसंभवात् ।
अवभासो व्यवसायो न तु ग्रहणमात्रकम् ॥ ३ ॥

दीपवन्नोपपद्येत बाह्यवस्तुप्रकाशकम् ।
अनात्मवेदने ज्ञाने जगदान्ध्यं प्रसंज्यते ॥ ४ ॥

प्रत्यक्षं च परोक्षं च ग्राहकं नोपपत्तिमत् ।
बाधनात् संशयाद्यासे सूक्तं सामान्यलक्षणम् ॥ ५ ॥

वेदेश्वरादयो नैव प्रमाणं बाधसंभवात् ।
प्रमाणं बाधवैकल्यादर्हंस्तत्त्वार्थवेदनः ॥ ६ ॥

वचसोऽपौरुषेयत्वं नाऽविशेषात् पटादिवत् ।
स्वरूपेण विशेषेण न सिद्धं भूधरादिषु ॥ ७ ॥

विरुद्धं चेष्टघातेन न कार्यं कर्तृसाधनम् ।
प्रकृतेरन्तरज्ञानं पुंसो नित्यमथाऽन्यथा ॥ ८ ॥

नित्यत्वे सर्वदा मोक्षोऽनित्यत्वे न तदुद्भवः ।
कालवैपुल्ययोग्यत्वकुशलाभ्याससंभवे ॥ ९ ॥

आवृतिप्रक्षयाज्ज्ञानं सार्वज्ञ्यमुपजायते ।
सदहेतुकमस्तीह सदैव क्ष्मादितत्त्ववत् ॥ १० ॥

आहारासक्तिचैतन्यं जन्मादौ मध्यवत्तथा ।
अन्त्यसामग्र्यवद्धेतुः संपूर्णः कार्यकृत्सदा ॥ ११ ॥

ज्योतिः साक्षात्कृतिः कश्चित् संपूर्णस्तत्त्ववेदने ।
ज्ञात्रपेक्षं प्रमेयस्य द्वैविध्यं न तु वास्तवम् ॥ १२ ॥

## २. प्रत्यक्षपरिच्छेदः ।

दूरासन्नादिभेदेन प्रतिभासं भिनत्ति यत् ।
तत् प्रत्यक्षं परोक्षं तु ततोऽन्यद् वस्तु कीर्तितम् ॥ १३ ॥

तन्निमित्तं द्विधा मानं न त्रिधा नैकधा ततः ।
सादृश्यं चेत् प्रमेयं स्यात् वैलक्षण्यं न किं तथा ॥ १४ ॥

अर्थापत्तेर्न मानत्वं नियमेन विना कृतम् ।
प्रमाणपञ्चकाभावेऽभावोऽभावेन गम्यते ॥ १५ ॥

न, नास्तीति यतो ज्ञानं नाध्यक्षाद्भिन्नगोचरम् ।
अभावोऽपि च नैवास्ति प्रमेयो वस्तुनः पृथक् ॥ १६ ॥

प्रत्यक्षं विशदं ज्ञानं त्रिधेन्द्रियमनिन्द्रियम् ।
योगजं चेति वैशद्यमिदन्त्वेनावभासनम् ॥ १७ ॥

जीवांशात् कर्मनिर्मुक्तादिन्द्रियाण्यधितिष्ठतः ।
जातमिन्द्रियजं ज्ञानं विनेन्द्रियमनिन्द्रियम् ॥ १८ ॥

स्मृत्यूहादिकमित्येके प्रातिभं च तथाऽपरे ।
स्वप्नविज्ञानमित्यन्ये स्वसंवेदनमेव नः ॥ १९ ॥

मनःसंज्ञस्य जीवस्य ज्ञानावृतिशमक्षयौ ।
यतश्चित्रौ ततो ज्ञानयौगपद्यं न दुष्यति ॥ २० ॥

जिनस्यांशेषु सर्वेषु कर्मणः प्रक्षयेऽक्रमम् ।
ज्ञानदर्शनमन्येषां न तथेत्यागमावधः ॥ २१ ॥

तत्रेन्द्रियजमध्यक्षमेकांशव्यवसायकम् ।
वेदनं च परोक्षं च योगजं तु तदन्यथा ॥ २२ ॥

द्रव्यपर्यायसामान्यविशेषास्तस्य गोचराः ।
अविस्पष्टास्तयेव स्युरनध्यक्षस्य गोचराः ॥ २३ ॥

न जडस्यावभासोऽस्ति भेदाभेदविकल्पनात् ।
न भिन्नविषयं ज्ञानं शून्यं वा यदि वा ततः ॥ २४ ॥

ज्ञानशून्यवतो नास्ति निरासेऽर्थस्य साधनम् ।
संवित्सिद्धप्रतिक्षेपे कथं स्यात् तद्व्यवस्थितिः ॥ २५ ॥

पर्ययस्यन्ति पर्याया द्रव्यं द्रवति सर्वदा ।
सदृशः परिणामो यः तत् सामान्यं द्विधा स्थितम् ॥ २६ ॥

विपरीतो विशेषश्च तान्युगपद् व्यवस्यति ।
तेन तत्कल्पनाज्ञानं न तु शब्दार्थयोजनात् ॥ २७ ॥

निरंशपरमाणूनामभासे स्थौल्यवेदने ।
प्रत्यक्षं कल्पनायुक्तं प्रत्यक्षेणैव सिध्यति ॥ २८ ॥

नासंयुक्तैर्न संयुक्तैर्निरंशैः क्रियते महत् ।
अयोगे प्रतिभासोऽपि संयोगेऽप्यणुमात्रकम् ॥ २९ ॥

भिन्नदेशस्वरूपाणामणूनामग्रहे सति ।
तत्स्थौल्यं यदि कल्पेत नावभासेत किंचन ॥ ३० ॥

नैतदस्ति यतो नास्ति स्थौल्यमेकान्ततस्ततः ।
भिन्नमस्ति समानं तु रूपमंशेन केनचित् ॥ ३१ ॥

अथास्तु युगपद्भासो द्रव्य-पर्याययोः स्फुटम् ।
तथापि कल्पना नैषा शब्दोल्लेखविवर्जिता ॥ ३२ ॥

चकास्ति योजितं यत्र सोपाधिकमनेकधा ।
वस्तु तत् कल्पनाज्ञानं निरंशाप्रतिभासने ॥ ३३ ॥

भेदज्ञानात् प्रतीयन्ते यथा भेदाः परिस्फुटम् ।
तथैवाभेदविज्ञानादभेदस्य व्यवस्थितिः ॥ ३४ ॥

घटमौलिसुवर्णेषु बुद्धिर्भेदावभासिनी ।
संविन्निष्ठा हि भावानां स्थितिः काऽत्र विरुद्धता ॥ ३५ ॥

प्रतीतेस्तु फलं नान्यत् प्रमाणं न ततः परम् ।
अताद्रूप्येऽपि योग्यत्वान्नियतार्थस्य वेदकम् ॥ ३६ ॥

## ३. अनुमानपरिच्छेदः ।

पूर्वमेव परोक्षस्य विषयः प्रतिपादितः ।
प्रमाणफलसद्भावो ज्ञेयः प्रत्यक्षवद् बुधैः ॥ ३७ ॥

परोक्षं द्विविधं प्राहुर्लिङ्ग-शब्दसमुद्भवम् ।
लैङ्गिकात् प्रत्यभिज्ञादि भिन्नमन्ये प्रचक्षते ॥ ३८ ॥

परोपदेशजं श्रौतं मतिं शेषं जगुर्जिनाः ।
परोक्षं प्रत्यभिज्ञादि त्रिधा श्रौतं न युक्तिमत् ॥ ३९ ॥

अन्यथेहादिकं सर्वं श्रौतमेवं प्रसज्यते ।
यच्चोक्तं नागमापेक्षं मानं तज्जाड्यजृम्भितम् ॥ ४० ॥

लिङ्गाल्लिङ्गिनि यज् ज्ञानमनुमानं तदेकधा ।
प्रत्येति हि यथा वादी प्रतिवाद्यपि तत् तथा ॥ ४१ ॥

उपचारेण चेत् तत् स्यादनवस्था प्रसज्यते ।
अन्यस्यासाधनादाह लक्षणे हेतु-साध्ययोः ॥ ४२ ॥

अन्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम् ।
नान्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥ ४३ ॥

कार्यकारणसद्भावस्तादात्म्यं चेत् प्रतीयते ।
प्रत्यक्षपूर्वकात् तर्कात् कथं नानुपपन्नता ॥ ४४ ॥

व्यतिरेकाऽनुपपत्तिश्चेदन्वयनिबन्धनम् ।
कथं सत्त्वं विना तेन क्षणिकत्वप्रसाधकम् ॥ ४५ ॥

विनाप्यन्वयमात्मादौ प्राणादिः साधनं यदा ।
तदा स्यान्नान्वयापेक्षा हेतोः साध्यस्य साधने ॥ ४६ ॥

संबन्धिभ्यां विभिन्नश्चेत् संबन्धः स्यान्न लोष्टवत् ।
अनवस्था प्रसज्येत तदन्यपरिकल्पने ॥ ४७ ॥

कृत्तिकोदयपूरादेः कालादिपरिकल्पनात् ।
यदि स्यात् पक्षधर्मत्वं चाक्षुषत्वं न किं ध्वनौ ॥ ४८ ॥

समानपरिणामस्य द्वयस्य नियमग्रहे ।
नाशक्तिर्न च वैफल्यं साधनस्य प्रसज्यते ॥ ४९ ॥

इष्टं साधयितुं शक्यं वादिना साध्यमन्यथा ।
साध्याभासमशक्यत्वात् साधनागोचरत्वतः ॥ ५० ॥

यथा सर्वगमध्यक्षं बहिरन्तरनात्मकम् ।
नित्यमेकान्ततः सत्त्वात् धर्मः प्रेत्यासुखप्रदः ॥ ५१ ॥

रूपाद्यसिद्धितोऽसिद्धो विरुद्धोऽनुपपत्तिमान् ।
साध्याभावं विना हेतुः व्यभिचारी विपक्षगः ॥ ५२ ॥

असिद्धः सिद्धसेनस्य विरुद्धो मल्लवादिनः ।
द्वेधा समन्तभद्रस्य हेतुरेकान्तसाधने ॥ ५३ ॥

## ४. आगमपरिच्छेदः ।

ताप-च्छेद-कषैः शुद्धं वचनं त्वागमं विदुः ।
तापो ह्याप्तप्रणीतत्वमाप्तो रागादिसंक्षयात् ॥ ५४ ॥

कषः पूर्वापराघातश्छेदो मानसमन्वयः ॥ ५५ ॥

विधिनियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकवचोवत् ।
जैनादन्यच्छासनमनृतं भवतीति वैधर्म्यम् ॥ ५६ ॥

सूत्रं सूत्रकृता कृतं मुकुलितं सद्भूरिबीजैर्घनम् ,
तद्वाचः किल वार्तिकं मृदु मया प्रोक्तं शिशूनां कृते ।
भानोर्यत्किरणैर्विकासि कमलं नेन्दोः करैस्तत् तथा,
यद्वेन्दूदयतो विकासि जलजं भानोर्न तस्मिन् गतिः ॥ ५७ ॥

पू.आ.श्रीसिद्धसेनदिवाकरविरचिताः

# ॥ एकविंशतिर्द्वात्रिंशिकाः ॥

## प्रथमा द्वात्रिंशिका

स्वयंभुवं भूतसहस्रनेत्रमनेकमेकाक्षरभावलिङ्गम् ।
अव्यक्तमव्याहतविश्वलोकमनादिमध्यान्तमपुण्यपापम् ॥ १ ॥

समन्तसर्वाक्षगुणं निरक्षं स्वयंप्रभं सर्वगतावभासम् ।
अतीतसंख्यानमनन्तकल्पमचिन्त्यमाहात्म्यमलोकलोकम् ॥ २ ॥

कुहेतुतर्कोपरतप्रपञ्चसद्भावशुद्धाप्रतिवादवादम् ।
प्रणम्य सच्छासनवर्धमानं स्तोष्ये यतीन्द्रं जिनवर्धमानम् ॥ ३ ॥

न काव्यशक्तेर्न परस्परेर्ष्यया न वीरकीर्तिप्रतिबोधनेच्छया ।
न केवलं श्राद्धतयैव नूयसे गुणज्ञपूज्योऽसि यतोऽयमादरः ॥ ४ ॥

परस्पराक्षेपविलुप्तचेतसः स्ववादपूर्वापरमूढनिश्चयान् ।
समीक्ष्य तत्त्वोत्पथिकान् कुवादिनः कथं पुमान् स्याच्छिथिलादरस्त्वयि

वदन्ति यानेव गुणान्धचेतसः समेत्य दोषान् किल ते स्वविद्विषः ।
त एव विज्ञानपथागताः सतां त्वदीयसूक्तप्रतिपत्तिहेतवः ॥ ६ ॥

कृपां वहन्तः कृपणेषु जन्तुषु स्वमांसदानेष्वपि मुक्तचेतसः ।
त्वदीयमप्राप्य कृतार्थकौशलं स्वतः कृपां संजनयन्त्यमेधसः ॥ ७ ॥

जनोऽयमन्यः करुणात्मकैरपि स्वनिष्ठितक्लेशविनाशकाहलैः ।
विकुत्सयंस्त्वद्वचनामृतौषधं न शान्तिमाप्नोति भवार्तिविक्लवः॥ ८ ॥

प्रपञ्चितक्षुल्लकतर्कशासनैः परप्रणेयाल्पमतिर्भवासनैः ।
त्वदीयसन्मार्गविलोमचेष्टितः कथं नु न स्यात्सुचिरं जनोऽजनः॥ ९ ॥

परस्परं क्षुद्रजनः प्रतीपगानिहैव दण्डेन युनक्ति वा न वा ।
निरागसस्त्वत्प्रति कूलवादिनो दहन्त्यमुत्रेह च जाल्मवादिनः ॥ १० ॥

अविद्यया चेद्युगपद्विलक्षणं क्षणादि कृत्स्नं न विलोक्यते जगत् ।
ध्रुवं भवद्वाक्यविलोमदुर्नयांश्चिरानुगांस्तानुपगूह्य शेरते ॥ ११ ॥

समृद्धपत्रा अपि सच्छिखण्डिनो यथा न गच्छन्ति गतं गरुत्मतः ।
सुनिश्चितज्ञेयविनिश्चयास्तथा न ते मतं यातुमलं प्रवादिनः ॥ १२ ॥

य एष षड्जीवनिकायविस्तरः परैरनालीढपथस्त्वयोदितः ।
अनेन सर्वज्ञपरीक्षणक्षमास्त्वयि प्रसादोदयसोत्सवाः स्थिताः ॥ १३ ॥

वपुः स्वभावस्थमरक्तशोणितं परानुकम्पासफलं च भाषितम् ।
न यस्य सर्वज्ञविनिश्चयस्त्वयि द्वयं करोत्येतदसौ न मानुषः ॥ १४ ॥

अलब्धनिष्ठाः प्रसमिद्धचेतसस्तव प्रशिष्याः प्रथयन्ति यद्यशः ।
न तावदप्येकसमूहसंहताः प्रकाशयेयुः परवादिपार्थिवाः ॥ १५ ॥

यदा न संसारविकारसंस्थितिर्विगाह्यते त्वत्प्रतिघातनोन्मुखैः ।
शठैस्तदा सज्जनवल्लभोत्सवो न किंचिदस्तीत्यभयैः प्रबोधितः॥ १६ ॥

स्वपक्ष एव प्रतिबद्धमत्सरा यथान्यशिष्याः स्वरुचिप्रलापिनः ।
निरुक्तसूत्रस्य यथार्थवादिनो न तत्तथा यत्तव कोऽत्र विस्मयः॥ १७ ॥

नयप्रसङ्गापरिमेयविस्तरैरनेकभङ्गाभिगमार्थपेशलैः ।
अकृत्रिमस्वादुपदैर्जनं जनं जिनेन्द्र ! साक्षादिव पासि भाषितैः॥ १८ ॥

विलक्षणानामविलक्षणा सती त्वदीयमाहात्म्यविशेषसंभली ।
मनांसि वाचामपि मोहपिच्छलान्युपेत्य तेऽत्यद्भुत भाति भारती॥ १९ ॥

असत्सदेवेति परस्परद्विषः प्रवादिनः कारणकार्यतर्किणः ।
तुदन्ति यान् वाग्विषकण्टकान्न तैर्भवाननेकान्तशिवोक्तिरर्यत ॥ २० ॥

निसर्गनित्यक्षणिकार्थवादिनः तथा महत्सूक्ष्मशरीरदर्शिनः ।
यथा न सम्यङ् मतयस्तथा मुने ! भवाननेकान्तविनीतमुक्तवान्॥ २१ ॥

मुखं जगद्धर्मविविक्ततां परे वदन्ति तेष्वेव च यान्ति गौरवम् ।
त्वया तु येनैव मुखेन भाषितं तथैव ते वीर ! गतं सुतैरपि ॥ २२ ॥

तपोभिरेकान्तशरीरपीडनैर्व्रतानुबन्धैः श्रुतसंपदापि वा ।
त्वदीयवाक्यप्रतिबोधपेलवैरवाप्यते नैव शिवं चिरादपि ॥ २३ ॥

न रागनिर्भर्त्सनयन्त्रमीदृशं त्वदन्यदृग्भिश्चलितं विगाहितम् ।
यथेयमन्तःकरणोपयुक्तता बहिश्च चित्रं कलिलासनं तपः ॥ २४ ॥

विरागहेतुप्रभवं न चेत्सुखं न नाम तत्किंचिदिति स्थिता वयम् ।
स चेन्निमित्तं स्फुटमेव नास्ति न त्वदन्यतः स त्वयि येन केवलः॥२५॥

न कर्म कर्तारमतीत्य वर्तते य एव कर्ता स फलान्युपाश्नुते ।
तदष्टधा पुद्गलमूर्तिकर्मजं यथात्थ नैवं भुवि कश्चनापरः ॥ २६ ॥

न मानसं कर्म न देहवाङ्मयं शुभाशुभज्येष्ठफलं विभागशः ।
यदात्थ तेनैव समीक्ष्यकारिणः शरण्य ! सन्तस्त्वयि नाथबुद्धयः॥२७॥

यदा न कोपादिवियुक्तलक्षणं न चापि कोपादिसमस्तलक्षणम् ।
त्वमात्थ सत्त्वं परिणामलक्षणं तदेव ते वीर ! विबुद्धलक्षणम्॥ २८ ॥

क्रियां च संज्ञानवियोगनिष्फलां क्रियाविहीनां च विबोधसंपदम् ।
निरस्यता क्लेशसमूहशान्तये त्वया शिवायालिखितेव पद्धतिः ॥२९॥

सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तसंपदः ।
तवैव ताः पूर्वमहार्णवोत्थिता जगत्प्रमाणं जिन ! वाक्यविप्रुषः॥ ३० ॥

शताध्वराद्या लवसप्तमोत्तमाः सुरर्षभा दृष्टपरापरास्त्वया ।
त्वदीययोगागममुग्धशक्तयस्त्यजन्ति मानं सुरलोकजन्मजम् ॥ ३१ ॥

जगन्नैकावस्थं युगपदखिलानन्तविषयं
यदेतत्प्रत्यक्षं तव न च भवान् कस्यचिदपि ।
अनेनैवाचिन्त्यप्रकृतिरससिद्धेस्तु विदुषां,
समीक्ष्यैतद्द्वारं तव गुणकथोत्का वयमपि ॥ ३२ ॥

## ॥ द्वितीया द्वात्रिंशिका ॥

व्यक्तं निरञ्जनमसंस्कृतमेकविद्यं विद्यामहेश्वरमयाचितलोकपालम् ।
ब्रह्माक्षरं परमयोगिनमादिसांख्यं यस्त्वां न वेद न स वीर ! हितानि वेद

दुःखार्दितेषु न च नाम घृणामुखोऽसि न प्रार्थितार्थसखिषूपनतप्रसादः ।
न श्रेयसा च न युनक्षि हितानुरक्तान्नार्थं प्रवृत्त्यतिशयस्त्वदनिर्गतोयम् २

कृत्वा नवं सुरवधूभयरोमहर्षं दैत्याधिपः शतमुखभ्रकुटीवितानः ।
त्वत्पादशान्तिगृहसंश्रयलब्धचेता लज्जातनुद्युतिहरेः कुलिशं चकार ३

पीतामृतेष्वपि महेन्द्रपुरःसरेषु मृत्युः स्वतन्त्रसुखदुर्ललितः सुरेषु ।
वाक्यामृतं तव पुनर्विधिनोपयुज्य शूराभिमानमवशस्य पिबन्ति मृत्योः ४

अप्येव नाम दहनक्षतमूलजाला लक्ष्मीकटाक्षसुभगास्तरवः पुनः स्युः ।
न त्वेव नाथ ! जननक्लममूलपादास्त्वद्दर्शनानलहताः पुनरुद्भवन्ति ५

उत्त्रासयन्ति पुरुषं भवतो वचांसि,
विश्वासयन्ति परवादिसुभाषितानि ।
दुःखं यथैव हि भवानवदत्तथात
त्तत्संभवे च मतिमान् किमिवाभयः स्यात् ॥ ६ ॥

स्थाने जनस्य परवादिषु नाथबुद्धिर्द्वेषश्च यस्त्वयि गुणप्रणतो हि लोकः ।
ते पालयन्ति समुपाश्रितजीवितानि त्वामाश्रितस्य हि कुतश्चिरमेष भावः

चित्रं किमत्र यदि निर्वचनं विवादा
न प्राप्नुवन्ति ननु शास्तरि युक्तमेतत् ।
उक्तं च नाम भवता बहुनैकमार्गं
निर्विग्रहं च किमतः परमद्भुतं स्यात् ॥ ८ ॥

मां प्रत्यसौ न मनुजप्रकृतिर्जिनोऽभूत् शङ्के च नातिगुणदोषविनिश्चयज्ञः
यत्त्वां जिन ! त्रिभुवनातिशयं समीक्ष्य नोन्मादमाप न भवज्वरमुन्ममाथ ९

अन्येऽपि मोहविजयाय निपीड्यकक्षा
मभ्युत्थितास्त्वयि विरूढसमानमानाः ।
अप्राप्य ते तव गतिं कृपणावसाना
स्त्वामेव वीर ! शरणं ययुरुद्वहन्तः ॥ १० ॥

तावद्वितर्करचनापटुभिर्वचोभि
र्मेधाविनःकृतमिति स्मयमुद्वहन्ति ।
यावन्न ते जिन ! वचःस्वभिचापलास्ते
सिंहानने हरिणबालकवत् स्खलन्ति ॥ ११ ॥

त्वद्भाषितान्यविनयस्मितकुञ्चिताक्षाः स्वग्राहरक्तमनसः परिभूय बालाः ।
नैवोद्भवन्ति तमसः स्मरणीयसौख्याः पातालीनशिखरा इव लोध्रवृक्षाः १२

सद्धर्मबीजवपनानघकौशलस्य यल्लोकबान्धव ! तवापि खिलान्यभूवन् ।
तन्नाद्भुतं खगकुलेष्विह तामसेषु सूर्यांशवो मधुकरीचरणावदाताः॥ १३ ॥

त्वच्छासनाधिगममूढदिशां नराणामाशास्महे पुरुषमप्यनुपत्तमेव ।
उन्मार्गयायिषु हि शीघ्रगतिर्य एव नश्यत्यसौ लघुतरं न मृदुप्रयातः॥१४॥

तिष्ठन्तु तावदतिसूक्ष्मगभीरगाधाः संसारसंस्थितिभिदः श्रुतवाक्यमुद्राः ।
पर्याप्तमेकमुपपत्तिसचेतनस्य रागार्चिषः शमयितुं तव रूपमेव॥ १५ ॥

वैराग्यकाहलमुखा विषयस्पृहान्धा ज्ञातुं स्वमप्यन(नु)धिया हृदयप्रचारम् ।
नातः परं भव इति व्यसनोपकण्ठ विश्वासयन्त्युपनतांस्त्वयि मूढसंज्ञाः ॥ १६

सत्त्वोपघातनिरनुग्रहराक्षसानि
वक्तृप्रमाणरचितान्यहितानि पीत्वा ।
अद्वारकं जिन ! तमस्तमसो विशन्ति
येषां न भान्ति तव वाग्द्युतयो मनस्सु ॥ १७ ॥

दग्धेन्धनः पुनरुपैति भवं प्रमथ्य निर्वाणमप्यनवधारितभीरुनिष्ठम् ।
मुक्तः स्वयं कृतभवश्च परार्थशूरस्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् १८

पापं न वाञ्छति जनो न च वेत्ति पापं
पुण्योन्मुखश्च न च पुण्यपथः प्रतीतः ।
निःसंशयं स्फुटहिताहितनिर्णयस्तु
त्वं पापवत्सुगतपुण्यमपि व्यधाक्षीः ॥ १९ ॥

सत्कारलाभपरिपङ्क्तिशठैर्वचोभिर्दुःखद्विषं जनमनुप्रविशन्ति तीर्थ्याः ।
लोकप्रपञ्चविपरीतमधीरदुर्गं श्रेयःपथं त्वमविदूरसुखं चकर्ष ॥ २० ॥

दैत्याङ्गनातिलकनिष्ठुरवज्रदीप्तौ शक्रे सुरौघमुकुटार्चितपादपीठे ।
तिर्यक्षु च स्वकृतकर्मफलेश्वरेषु तद्वाक्यपूतमनसां न विकल्पखेदः॥ २१ ॥

यैरेव हेतुभिरनिश्चयवत्सलानां सत्त्वेष्वनर्थविदुषां करुणापदेशः ।
तैरेव ते जिन ! वचःस्वपरोक्षतत्त्वा माध्यस्थ्यशुद्धमनसः शिवमाप्नुवन्ति

*एकान्तनिर्गुण ! भवन्तमुपेत्य सन्तो यत्नार्जितानपि गुणाञ्जहति क्षणेन ।*
क्लीवादरस्त्वयि पुनर्व्यसनोल्बणानि भुक्तं चिरं गुणफलानि हि तापनष्टः

कुर्वन्न मारमुपयाति न चाप्यकुर्वन्नास्यात्मनः शिवमहद्व्यबलं निधानम् ।
वेदं तमेवमवसादितवेदमत्त्वाद्भूयो न दुःखगहनेषु वनेषु शेते ॥ २४ ॥

कर्ता न कर्मफलभुग्न च कर्मनाशः
कर्त्रन्तरेऽपि च न कर्मफलोदयोऽस्ति ।
कर्ता च कर्मफलमेव स चाप्यनाद्य
स्त्वद्वाक्यनीतिरियमप्रगतान्यतीर्थ्यैः ॥ २५ ॥

भीरोः सततस्तव कथं त्वमरेश्वरोऽसौ वीरोऽयमि- त्यनवधाय चकार नाम
मृत्योर्न हस्तपथमेत्य बिभेति वीरस्त्वं तस्य गोचरमपि व्यतियाय लीनः

नादित्यगर्वजमहस्तव किंचिदस्ति
नापि क्षपा शशिमयूखशुचिप्रहासा ।
रात्रिंदिनान्यथ च पश्यसि तुल्यकालं
कालत्रयोत्पथगतोऽप्यनतीतकालः ॥ २७ ॥

चन्द्रांशवः कमलगर्भविषक्तमुग्धाः सूर्योऽप्यजातकिरणः कुमुदोदरेषु ।
वीर ! त्वमेव तु जगत्यसपत्नवीर-स्त्रैलोक्यभूतचरिताप्रतिघप्रकाशः २८

यश्चाम्बुदोदरनिरङ्कुशदीप्तिरर्कस्तारा-पतिश्च कुमुदद्युतिगौरपादः ।
ताभ्यां तमो गुपिलमन्यदिव प्रकाश्यं कस्तं प्रकाशविभवं तव मातुमर्हः

नार्थान् विवित्ससि न वेत्स्यसि नाप्यवेत्सी
र्न ज्ञातवानसि न तेऽच्युत वेद्यमस्ति ।
त्रैलोक्यनित्यविषमं युगपच्च विश्वं
पश्यस्यचिन्त्यचरिताय नमोऽस्तु तुभ्यम् ॥ ३० ॥

शब्दादयः क्षणसमुद्भवभङ्गशीलाः संसारतीरमपि नास्त्यपरं परं वा ।
तुल्यं च तत्तव तयोरपरोक्षगाप्सु त्वय्यद्भुतोऽप्ययमनद्भुत एष भावः॥ ३१ ॥

अनन्यमतिरीश्वरोऽपि गुणवाक् समाः शाश्वती-
र्यदा न गुणलोकपारमनुमातुमीशस्तव ।
पृथग्जनलघुस्मृतिर्जिन ! किमेव वक्ष्याम्यहं
मनोरथविनोदचापलमिदं तु नः सिद्धये ॥ ३२ ॥

## ॥ तृतीया द्वात्रिंशिका ॥

अनन्यपुरुषोत्तमस्य पुरुषोत्तमस्य क्षिता-
वचिन्त्यगुणसात्मनः प्रभवविक्रियावर्त्मनः ।

प्रसादविजितस्मृतिर्गणयितुं मतिप्रोद्गमं
स्तवं किल विवक्षुरस्मि पुरुहूतगीतात्मनः ॥ १ ॥

व्यलीकपथनायकैर्हतपरिश्रमच्छद्मभि-
र्निरागसि सुखोन्मुखे जगति यातनानिष्ठुरैः ।
अहो चिरमपाकृताः स्म शठवादिभिर्वादिभि-
स्त्वदाश्रयकृतादरास्तु वयमद्य वीर! स्थिताः ॥ २ ॥

अनादिनिधनः क्वचित्क्वचिदनादिरुच्छेदवान्
प्रतिस्वमविशेषजन्मनिधनादिवृत्तः पुनः ।
भवव्यसनपञ्जरोयमुदितस्त्वया नो यथा
तथायमभवो भवश्च जिन! गम्यते नान्यथा ॥ ३ ॥

जगत्यनुनयन्यया‍भ्युदयविक्रियावन्ति च
स्वतन्त्रगुणदोषसाम्यविषमाणि भोज्यान्यपि ।
क्रियाफलविचित्रता च नियता यथा भोगिनां
तथा त्वमिदमुक्तवानिह यथा परे शेरते ॥ ४ ॥

अतीत्य नियतव्यथौ स्थितिविनाशमिथ्यापथौ
निसर्गशिवमात्थ मार्गमुदयाय यं मध्यमम् ।
स एव दुरुनिष्ठितोऽयमभिधानरूक्षाशया
त्मधाविव महोरगो दशभिदुर्गृहीतोद्धतः ॥ ५ ॥

जगद्धितमनोरथाः स्वयमनावृतप्रीतयः
कृतार्थनिवृतादराश्च विवृतोग्रदुःखे जने ।
गुणज्ञ! परिमृग्यमाणलघवः स्वनीतः परे
त्वमेव तु यथार्थवादसु(शु)चिरर्थविद्भिर्वृतः ॥ ६ ॥

प्रवृत्त्यपनयक्षतं जगदशान्तजन्मव्यथं
विरामलघुलक्षणस्त्वमकरोस्तदन्तःक्षणम् ।

जनानुमुखचाटवस्तरुणसत्कृतप्रातिभाः
प्रवृत्तिपरमार्थमेव परमार्थमाहुः परे ॥ ७ ॥

क्वचिन्नियतिपक्षपातगुरु गम्यते ते वचः
स्वभावनियताः प्रजाः समयतन्त्रवृत्ताः क्वचित् ।
स्वयं कृतभुजः क्वचित् परकृतोपभोगाः पुन
र्न वा विशदवाददोषमलिनोऽस्यहो विस्मयः ॥ ८ ॥

परस्परविलक्षणाश्च न च नामरूपादयः
क्रियापि च न तानतीत्य न च ते क्रियैकान्ततः ।
निरोधगतयस्त एव न च विक्रियानिश्चया
निमीलितविलोचनं जगदिदं त्वयोन्मीलितम् ॥ ९ ॥

न कश्चिदपि जायते न च परत्वमापद्यते
प्रतिक्षणनिरोधजन्मनियताश्च सर्वाः प्रजाः ।
य एव च समुद्भवः सविलयः प्रतिस्वं च तौ
तदा परमिदं मनःस्वनलसैर्निखातं वचः ॥ १० ॥

पृथङ् न भवहेतुरस्ति न च भोक्तुरन्यो भवः
प्रसूतिरपि जायमानमति(पि)नास्ति नान्या न च ।
स्थितिर्गमनमुन्नतिर्व्यसनमिष्टयो बुद्धयस्-
तथेत्यनवबद्धपूर्वमपरैः प्रबद्धं त्वया ॥ ११ ॥

स्वभावनियतस्त्वया जिन न कश्चिदात्मोदितस्
त्वमेवच परं ललामपरमार्थतत्त्वार्थिनाम् ।
असंभवमनाशमेकममितक्षयस्थानिनं
यथैनमवदत्तथैव परमात्मताऽस्यात्मनः ॥ १२ ॥

पृथङ् न चयनादयो न च परस्परैकात्मका(ता)न
बुद्धिरपि तामतीत्य न च तद्गता बुद्धयः ।

अतीत्य न च चेतनास्ति सुखदुःखमोहोदया
न युक्तमिव नाम ते जिन ! विगाहधीरं वचः ॥ १३ ॥

क्षमैव पुरुषं रुषंश्च न विजातिरभ्युन्नतिर्न
नाम मतिमार्दवं न निकृतिर्न नामार्जवम् ।
ऋतं वितथमेव गुप्तिरथवा तपः किल्बिषम्
विमुक्तिमपि बन्धमाच्छ न च तत्तथा नान्यथा ॥ १४ ॥

न कश्चन करोति नापि परिभुज्यते केनचिन्
न वेद्यमपि किंचिदस्ति न च न क्रियाभूतयः ।
भवन्न च भवान्तरं वज्रति कश्चिदभ्येति वा
गतिं न च विना भवोऽस्त्यभव ! निश्चितं ते वचः ॥ १५ ॥

वियोजयति चासुभिर्न च विधेर्न (वधेन) संयुज्यते
शिवं च न परोपमर्दपुरुषस्मृतेर्विद्यते ।
वधाय नयमभ्युपैति च परान्न निघ्नन्नपि
त्वयायमतिदुर्गमः प्रथमहेतुरुद्योतितः ॥ १६ ॥

अपुण्यपथभीरवो वचनसत्य सत्यादराः
पतन्त्यशिवमेव सत्यवचनार्थमूढा जनाः ।
परप्रियहितैषिणश्च बहुयातनाः पाणयः
समन्तशिवसौष्ठवं तव न ये वचः संनताः ॥ १७ ॥

य एव रतिहेतवः समफलास्त एवार्थतो
न च प्रशमहेतुरेव मतिविभ्रमोत्पादकः ।
य एव च समुद्भवः सविलयः प्रतिस्वं च तौ
तवामृतमिदं वचः प्रतिहतैर्गदः पीयते ॥ १८ ॥

ममाहमिति चैष यावदभिमानदाहज्वरः
कृतान्तमुखमेव तावदिति न प्रशान्त्युन्नयः ।

यशःसुखपिपासितैरयमसावनर्थोत्तरैः
परैरपशदः कुतोऽपि कथमप्यपाकृष्यते ॥ १९ ॥

न दुःखसुखकल्पनामलिनमानसः सिध्यति
न चागमसदादरो न च पदार्थभक्तीश्वरः ।
न शून्यघटितस्मृतिर्न शयनोदरस्थो न वा
यथात्थ न ततः परं हितपरीक्षकैर्मन्यते ॥ २० ॥

त्वमेव परमास्तिकः परमशून्यवादी भवान्
त्वमुज्ज्वलविनिर्णयोऽप्यवचनीयवादः पुनः ।
परस्परविरुद्धतत्त्वसमयश्च सुश्लिष्टवाक्
त्वमेव भगवन्नकम्प्यसु (मु)नयो यथा कस्तथा ॥ २१ ॥

न किंचिदुपलक्ष्यते गगनकाष्ठयोरन्तरं
न चापि न पृथक् तयोस्तदुपलक्षितं लक्षणम् ।
न चास्ति नियमो दिशां न च हितोचितैषा स्थिति
स्त्वदीयमिव शासनं सुनयनिष्प्रकम्पाः स्थिताः ॥ २२ ॥

व्ययोऽपि पुनरुद्भवे भवति कर्मणां कारणं
कारणं व्ययोऽपि च परं ललाम भवनिर्जराबोधने ।
करोति मलमर्जयन्नपि च निष्कृतिं कर्मणां
न वा क्व तव तीर्णसङ्गनिकषे परीक्षा क्षमा ॥ २३ ॥

न कर्म फलगौरवाद् व्रजति नाप्यकर्मा क्वचिन्
न चापि मरणादपेत्य न च सर्वथैवामृतः ।
न चेन्द्रियगणं विहाय न तनुं न चैवान्यथा
मतं तव निरञ्जनं विशति भव्यधीरञ्जनम् ॥ २४ ॥

चराचरविशेषितं जगदनेकदुःखान्तिकम्
अनादिभवहेतुगूढदृढशृङ्खलाबन्धनम् ।

उदाहृतमिदं जिनेन्द्र ! सविपर्ययं यत्त्वया
ह्यनेन भवशासनं तव सृता बुधाः शासनम् ॥ २५ ॥

क्रिया भवति कस्यचिन्न च विनिष्पतत्याश्रयात्
स्वयं च गतिमान् व्रजत्यथ च हेतुमाकाङ्क्षते ।
गुणोऽपि गुणवच्छ्रितो न च तदन्तरं विद्यते
त्वयैष भजनोर्जितः सुगद ! सिंहनादः कृतः ॥ २६ ॥

न जातु मरकं नरो व्रजति सांगसोऽप्यन्तसो(शो)
न चापि नरकादपायमन(त)वेत्य संवेद्यते ।
कदाचिदिह वैरमाप्य नरकोपगं मुच्यते
न चापि तव वीर ! वाक्यमतिपेशलं दोषलम् ॥ २७ ॥

शयानमतिजागरूकमतिशायिनं जागरं
ससंज्ञमपि वीतसंज्ञमथ मोमुहं संज्ञिनम् ।
विकत्थनमभाषिणं वचनमूकमाभाषिणं
दुरुक्तमिव मन्यते न तव यो मतं मन्यते ॥ २८ ॥

न मोहमतिवृत्य बन्ध उदितस्त्वया कर्मणां
न चैकमपि बन्धनं प्रकृतिबन्धभावो महान् ।
अनादिभवहेतुरेष न च बध्यते नासकृत्
त्वयातिकुटिला गतिः कुशल ! कर्मणां दर्शिता ॥ २९ ॥

इहैव परिपाकमेति विहितं परे वा भवो (वे)
भवोऽपि न भवेऽस्ति नैव न भवत्यसौ प्रागपि ।
क्वचिच्च कृतमन्यथा फलति सर्वथैवान्यथा
अवन्ध्यमिह चोदितं सुकृतमष्टसंख्यं त्वया ॥ ३० ॥

कृपाकृश इवोक्तवान् यदसि वीर ! घोरं तपो
भवार्तिपरिविक्लवैस्तदतिशान्तये सेव्यसे ।

असारभवबुद्धयस्तु भवरोगशान्तौ परे
निदानमिव दृष्टिदोषमवधीरितास्तत्सुतैः ॥ ३१ ॥

अविदितगुण ! स्तोतुं कः स्यात् प्रमेयगुणानपि
त्रिभुवनगुरुः किं त्वेवाहं तव स्तवचापलः ।
नतु (नु) गणयितुं चान्यापातं नयस्व हितैषिणं
त्वयि समुदितानन्दं चेतो मयेत्यनुवर्तितुम् ॥ ३२ ॥

## ॥ चतुर्थी द्वात्रिंशिका ॥

परिचिन्त्य जगत्स्तवाश्रया न विरोधस्तिमितेन चेतसा ।
परुषं प्रतिभाति मे वचस्त्वदृते वीर ! यतोऽयमुद्यमः ॥ १ ॥

यदिवा कुशलोच्चलं मनो यदि वा दुःखनिपातकातरम् ।
न भवन्तमतीत्य रंस्यते गुणभक्तो हि न वञ्च्यते जनः ॥ २ ॥

कुलिशेन सहस्रलोचनः सविता चांशुसहस्रलोचनः ।
न विदारयितुं यदीश्वरो जगतस्तद्भवता हतं तमः ॥ ३ ॥

निरवग्रहमुक्तमानसो विषयाशाकलुषस्मृतिर्जनः ।
त्वयि किं प्रतितोषमेष्यति द्विरदः स्तम्भ इवाचिरग्रहः ॥ ४ ॥

हितयुक्तमनोरथोऽपि संस्त्वयि न प्रीतिमुपैति यत्पुमान् ।
अतिभूमिविदारका(दा)रुणं तदिदं मानकलेर्विजृम्भितम् ॥ ५ ॥

भवमूलहरामशक्नुवंस्तव विद्यामधिगन्तुमञ्जसा ।
भवतेऽयमसूयते जनो भिषजे मूर्ख इवेश्वरातुरः ॥ ६ ॥

न सदःसु वदन्नशिक्षितो लभते वक्तृविशेषगौरवम् ।
अनुपास्य गुरुं त्वया पुनर्जगदाचार्यकमेव निर्जितम् ॥ ७ ॥

वितथं कृपणः सु(स्व)गौरवाद्वदति स्वं च न तेऽस्ति किंचन ।
वितथानि सहस्रशश्च ते जगतश्चाप्रतिमोऽसि नायकः ॥ ८ ॥

भयमेव यदा न बुध्यते स कथं नाम भयाद्विमोक्ष्यते ।
अभये भयशङ्किनः परे यदयं त्वद्गुणभूतिमत्सरः ॥ ९ ॥

बलसाध्यमलं न दुर्बलः प्रतिषेद्धुं विनियोक्तुमेव वा ।
नियतेयमृषेर्व्यवस्थितिस्तव लोकस्य च नात्मवैरिणः ॥ १० ॥

यदि येन सुखेन रज्यते कुरुते रक्तमनाश्च यत्स्वयम् ।
प्रविचिन्त्य जनस्तदाचरेत्प्रतिघातेन रमेत कस्त्वयि ॥ ११ ॥

अविकल्पमनःस्विदं वचस्तव यैरेव मनःसु संभृतम् ।
समतीतविकल्पगोचराः सुखिनो नाथतथैव ते जनाः ॥ १२ ॥

परिवृद्धिमुपैति यद्यथा नियतोस्यापचयस्ततोऽन्यथा ।
तमसा परिचीयते भवस्त्वदनाथेषु कथं न वर्त्स्यति ॥ १३ ॥

यदि नाम जिगीषयापि ते निपतेयुर्वचनेषु वादिनः ।
चिरसंगतमन्यसंशयं क्षिणुयुर्मानमनर्थसंचयम् ॥ १४ ॥

उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि सर्वदृष्टयः ।
न च तासु भवानुदीक्ष्यते प्रविभक्तासु सरित्स्विवोदधिः ॥ १५ ॥

वचनैर्विवदन्ति वादिनो भवता नोभयथापि तैर्भवान् ।
महता विपरीतदर्शनो वितथग्राहहतो विरुध्यते ॥ १६ ॥

स्वयमेव मनुष्यवृत्तयः कथमन्यान् गमयेयुरुन्नतिम् ।
अनुकूलहतस्तु बालिशः स्खलति त्वय्यसमानचक्षुषि ॥ १७ ॥

अविकल्पसुखं सुखेष्विति ब्रुवते केवलमल्पमेधसः ।
त्वयि तत्तु यथार्थदर्शनात्सकलं वीर ! यथार्थदर्शनम् ॥ १८ ॥

न महत्यणुता न चाप्यणौ विभुता संभवतीह वादीनाम् ।
भवतस्तु तथा च तत्र च प्रतिबोधावहितैर्विनिश्चितम् ॥ १९ ॥

सुखदुःखविवेकसाधनं विहितं तीर्थमिदं जिन ! त्वया ।
न च सोऽस्त्यपयाति यस्तयोरथवास्य प्रतिषिद्धशासनम् ॥ २० ॥

तमसश्च न केवलस्य च प्रतिसंसर्गमुशन्ति सूरयः ।
त्वयि सर्वकषायदोषले जिन ! कैवल्यमचिन्त्यमुद्गतम् ॥ २१ ॥

पुरुषस्य न केवलोदयः पशवश्चाप्यनिवृत्तकेवलाः ।
न च सत्यपि केवले प्रभुस्तव चिन्त्येयमचिन्त्यवद्गतिः ॥ २२ ॥

वपुषो न बहिर्मनःक्रिया मनसो नापि बहिर्वपुःक्रिया ।
न च तेन पृथग्न चैकधा द्विषतां तेऽयमदृष्टिगोचरः ॥ २३ ॥

न च दुःखमिदं स्वयं कृतं न परैर्नोभयजं न चाकृतम् ।
नियतं च न चाक्षरात्मकं विदुषामित्युपपादितं त्वया ॥ २४ ॥

न परोऽस्ति न चापरस्त्वयि प्रतिबुद्धप्रतिभस्य कश्चन ।
न च तावविभज्य पश्यति प्रतिसंख्यानपदातिपूरुषः ॥ २५ ॥

गतिमानथ चाक्रियः पुमान् कुरुते कर्म फलैर्न युज्यते ।
फलभुक्च न चार्जनक्षमो विदितो यैर्विदितोऽसि तैर्मुने ! ॥ २६ ॥

स्वत एव भवः प्रवर्तते स्वत एव प्रविलीयतेऽपि च ।
स्वत एव च मुच्यते भवादिति पश्यंस्त्वमिवाभवो भवेत् ॥ २७ ॥

असमीक्षितवाङ् महात्मसु प्रचयं नैति पुमान् महात्मसु ।
असमीक्ष्य च नाम भाषसे परमश्चासि गुरुर्महात्मनाम् ॥ २८ ॥

भवबीजमनन्तमुज्झितं विमलज्ञानमनन्तमर्जितम् ।
न च हीनकलोऽसि नाधिकः समतां चाप्यनिवृत्य वर्तसे ॥ २९ ॥

सति चक्षुषि तत्प्रयोजनं न करोषीत्यभिशप्यते पुमान् ।
भवतस्त्वलमेष संस्तवो विदुषामन्यपथान्निवृत्तये ॥ ३० ॥

जननं च यथा महद्भयं तदभावश्च यथोत्तमोऽभयम् ।
विमृशन्ति विनीतचक्षुषो यदि पश्यन्त्यनुपास्य ते वचः ॥ ३१ ॥

स्तवमहमभिधातुमीश्वरः क इव यथा तव वक्तुमीश्वरः ।
त्वयि तु भवसहस्रदुर्लभे परिचय एव यथा तथास्तु नः ॥ ३२ ॥

## ॥ पञ्चमी द्वात्रिंशिका ॥

आराध्यसे त्वं न च नाम वीरः स्तवैः सतां चैष हिताभ्युपायः ।
त्वन्नामसंकीर्तनपूतयत्नः सद्भिर्गतं मार्गमनुप्रपत्स्ये ॥ १ ॥

जाने यथास्मद्विधविप्रलापः क्षेपः स्तवो वेति विचारणीयम् ।
भक्त्या स्वतन्त्रस्तु तथापि विद्वन् ! क्षमावकाशानुपपादयिष्ये ॥ २ ॥

गम्भीरमम्भोनिधिनाचलैः स्थितं शरद्दिवानिर्मलमिष्टमिन्दुना ।
भुवा विशालं द्युतिमद्विवस्वता बलप्रकर्षः पवनेन वर्ण्यते ॥ ३ ॥

गुणोपमानं न तवात्र किंचिदमेयमाहात्म्यसमञ्जसं यत् ।
समेन हि स्यादुपमाभिधानं न्यूनोऽपि तेनास्ति कुतः समानः ॥ ४ ॥

अमोहयत्तां वसुधावधूं यन्मानानुरोधेन पितुश्चकर्ष ।
ज्ञानत्रयोन्मीलितसत्पथोऽपि तत्कारणं कोऽच्युत ! मन्तुमीशः ॥ ५ ॥

अनेकजन्मान्तरभग्नमानः स्मरो यशोदाप्रिय ! यत्पुरस्ते ।
चचार निह्रीकशरस्तमर्थं त्वमेव विद्यासु नयज्ञ ! कोऽन्यः ॥ ६ ॥

अबुद्धखेदोपनतैरनेकैरसाध्यरागा विषमोपचारैः ।
नरेश्वरैरात्महितानुरक्तैश्चूडामणिर्व्यापृतपादरेणुः ॥ ७ ॥

स्वयंप्रभूतैर्निधिभिर्निवृत्तैः प्रत्येकमम्भोनिचयप्रसूतैः ।
आशासनं सर्वजनोपभोग्यैर्धनेश्वरः प्रीतिकरः प्रजानाम् ॥ ८ ॥

दिक्पालभुक्त्या वसुधां नियच्छन् प्रबोधितो नाम सुरैः समायः ।
लक्ष्म्या निसर्गोचितसंगतायाः सितातपत्रप्रणयं व्यनौत्सीत् ॥ ९ ॥

अपूर्वशोकोपनतक्लमानि नेत्रोदकक्लिन्नविशेषकाणि ।
विविक्तशोभान्यबलाननानि विलापदाक्षिण्यपरायणानि ॥ १० ॥

मुग्धोन्मुखाक्षाण्युपदीष्टवाक्यसंदिग्धजल्पानि पुरःसराणि ।
बालानि मार्गाचरणक्रियाणि प्रलम्बवस्त्रान्तविकर्षणानि ॥ ११ ॥

अकृत्रिमस्नेहमयप्रदीर्घदीनेक्षणाः साश्रुमुखाश्च पौराः ।
संसारसात्म्यज्ञजनैकबन्धो ! न भावशुद्धं जगृहुर्मनस्ते ॥ १२ ॥

सुरासुरैर्विस्मृतदीर्घवैरैः परस्परप्रीतिविषक्तनेत्रैः ।
त्वद्यानधूः सद्यवहैर्बभासे संदिग्धसूर्यप्रभमन्तरिक्षम् ॥ १३ ॥

संकीर्णदैत्यामरपौरवर्गमत्यद्भुतं तन्महिमानमीक्ष्य ।
भवाभवाभ्युत्थितचेतसस्ते यद्विस्मयो नाम स विस्मयोऽयम् ॥ १४ ॥

प्रतीच्छतस्ते सुरपस्य (सुर पश्य) केशान् क्षीरार्णवोपायनलब्धबुद्धेः ।
प्रसादसायामतरं तदाभूदक्ष्णां यथार्थानिमिषां सहस्रम् ॥ १५ ॥

अज्ञातचर्यामनुवर्तमानो यद्दुर्जनाधृष्यवपुस्त्वमासीः ।
नानाश(स)नोच्चावचलक्षणाङ्कमूर्तेस्तदत्यद्भुतमीहितं मे ॥ १६ ॥

शिवाशिवव्याहृतनिष्ठुरायां रक्षःपिशाचोपवनान्तभूमौ ।
समाधिगुप्तः समजागरूकः कायं समुत्सृज्य विनायकेभ्यः ॥ १७ ॥

वन्ध्याभिमानं कृतवानसि ह्रीसंसर्गपात्रं जिन ! संगमं यत् ।
प्रीतित्रिनेत्रार्चितनृत्तपुष्पैस्तेनासि लोकत्रयवीर ! वीरः ॥ १८ ॥

आनन्दनृत्तप्रचलाचला भूः प्रत्युद्धतोद्वेलजलः समुद्रः ।
सौम्योऽनिलः स्पर्शसुखेऽभिजातः शुभाभिधाना मृगपक्षिणश्च॥ १९ ॥

सर्वावतारः सुरदैत्यनागगरुत्मतां प्रोषितमत्सराणाम् ।
बभूवुरन्यानि च तेऽद्भुतानि त्रैलोक्यविघ्नेश्वरमोहशान्तौ ॥ २० ॥

उत्साहशौण्डीर्यविधानगुर्वी मूढा जगद्व्युष्टिकरी प्रतिज्ञा ।
अनन्तमेकं युगपत्त्रिकालं शब्दादिभिर्निप्रतिघातवृत्तिः ॥ २१ ॥

दुरापमाप्तं यदचिन्त्यभूतिज्ञानं त्वया जन्मजरान्तकर्तृ ।
तेनासि लोकानभिभूय सर्वान् सर्वज्ञ ! लोकोत्तमतामुपेतः ॥ २२ ॥

अन्ये जगत्संकथिका विदग्धा सर्वज्ञवादान् प्रवदन्ति तीर्थ्याः ।
यथार्थनामा तु तवैव वीर ! सर्वज्ञता सत्यमिदं न रागः ॥ २३ ॥

रविः पयोदोदररुद्धरश्मिः प्रबुद्धहासैरनुमीयते ज्ञैः ।
भवानुदारातिशयप्रवादः प्रणेतृवीर्योच्छिखरः प्रयत्नैः ॥ २४ ॥

नाथ ! त्वया देशितसत्पथस्थाः स्त्रीचेतसोऽप्याशु जयन्ति मोहम् ।
नैवान्यथा शीघ्रगतिर्यथा गां प्राचीं यियासुर्विपरीतयायी ॥ २५ ॥

अपेतगुह्यावचनीयशाठ्यं सत्त्वानुकम्पासकलप्रतिज्ञम् ।
शमाभिजातार्थमनर्थघाति सच्छासनं ते त्वमिवाप्रधृष्यम् ॥ २६ ॥

यथापरे लोकमुखप्रियाणि शास्त्राणि कृत्वा लघुतामुपेताः ।
शिष्यैरनुज्ञामलिनोपचारैर्वक्तृत्वदोषास्त्वयि ते न सन्ति ॥ २७ ॥

यथा भवांस्तेऽपि किलापवर्गमार्गं पुरस्कृत्य तथा प्रयाताः ।
स्वैरेव तु व्याकुलविप्रलापैरस्वादुनिष्ठैर्गमिता लघुत्वम् ॥ २८ ॥

रागात्मनां कोपपराजितानां मानोन्नतिस्वीकृतमानसानाम् ।
तमोजलानां स्मृतिशोभितां(नां) च प्रत्येकभद्रान्वित यानवोचः॥ २९ ॥

वाद्यम्बुशेवालकणाशिनोऽन्ये धर्मार्थमुग्राणि तपांसि तप्ताः ।
त्वया पुनः क्लेशचमूविनाशभक्तोऽपि धर्मो विजिताश दग्धः॥ ३० ॥

नानाशास्त्रप्रगममहतीं रूपिणीं तां नियच्छन्
शक्रस्तावत्तव गुणकथाव्यापृतः खेदमेति ।
कोऽन्यो योग्यस्तव गुणनिधिर्वक्तुमुक्त्वा नयेन
त्यक्ता लज्जास्वहितगणनानिर्विशङ्कं मयैवम् ॥ ३१ ॥

इति निरुपमयोगसिद्धसेनः प्रबलतमोरिपुनिर्जयेषु वीरः ।
दिशतु सुरपुरुष्टुतस्तुतो नः सततविशिष्टशिवाधिकारि धाम ॥ ३२ ॥

## ॥ षष्ठी द्वात्रिंशिका ॥

यदशिक्षितपण्डितो जनो विदुषामिच्छति वक्तुमग्रतः ।
न च तत्क्षणमेव शीर्यते जगतः किं प्रभवन्ति देवताः ॥ १ ॥

पुरातनैर्या नियता व्यवस्थितिस्तत्रैव सा किं परिचिन्त्य सेत्स्यति ।
तथेति वक्तुं मृतरूढगौरवादहन्न जातः प्रथयन्तु विद्विषः ॥ २ ॥

न खल्विदं सर्वमचिन्त्यदारुणं विभाव्यते निम्नजलस्थलान्तरम् ।
अचिन्त्यमेतत्त्वभिगृह्य चिन्तयेच्छुचः परं नापरमन्यदा क्रिया ॥ ३ ॥

बहुप्रकाराः स्थितयः परस्परं विरोधरूक्षाः कथमाशु निश्चयः ।
विशेषसिद्धानि यमेव नेति वा पुरातनप्रेमजलस्य युज्यते ॥ ४ ॥

जनोऽयमन्यस्य मृतः पुरातनः पुरातनैरेव समो भविष्यति ।
पुरातनेष्वित्यनवस्थितेषु कः पुरातनोक्तान्यपरीक्ष्य रोचयेत् ॥ ५ ॥

विनिश्चयं नैति यथा यथालसस्तथा तथा निश्चितवत्प्रसीदति ।
अवन्ध्यवाक्ये गुरवोऽहमल्पधीरिति व्यवस्यन् स्ववधाय धावति ॥६॥

मनुष्यवृत्तानि मनुष्यलक्षणैर्मनुष्यहेतोर्नियतानि तैः स्वयम् ।
अलब्धपाराण्यलसेषु कर्णवानगाधपाराणि कथं गृहीष्यति ॥ ७ ॥

यदेव किंचिद्विषमप्रकल्पितं पुरातनैरुक्तमिति प्रशस्यते ।
विनिश्चिताप्यद्य मनुष्यवाक्कृतिर्न पाठ्यते यत्स्मृतिमोह एव सः ॥ ८ ॥

न विस्मयस्तावदयं यदल्पतामवेत्य भूयो विदितं प्रशंसति ।
परोक्षमेतत्त्वधिरुह्य साहसं प्रशंसतः पश्यत किं नु भेषजम् ॥ ९ ॥

परीक्षितुं जातु गुणौघ ! शक्यते विशिष्य ते तर्कपथोद्धतो जनः ।
यदेव यस्याभिमतं तदेव तच्छिवाय मूढैरिति मोहितं जगत् ॥ १० ॥

परस्परान्वर्थितया तु साधुभिः कृतानि शास्त्राण्यविरोधदर्शिभिः ।
विरोधशीलस्त्वबहुश्रुतो जनो न पश्यतीत्येतदपि प्रशस्यते ॥ ११ ॥

यदग्निसाध्यं न तदम्भसा भवेत् प्रयोगयोग्येषु किमेव चेतसा ।
समेष्वरागोऽस्य विशेषतो नु किं विमृश्यतां वादिषु साधुशीलता १२॥

यथैव दृष्टं तपसा तथा कृतं न युक्तिवादोऽयमृषेरिदं वचः ।
सुबुद्धमेवेति विशेषतो नु किं प्रशंसति क्षेपकथा किलेतरा ॥ १३ ॥

कथं नु लोके न समानचक्षुषो यथा न पश्यन्ति वदन्ति तत्तथा ।
अहो न लोकस्य न चात्मनः क्षमां पुरातनैर्मानहतैरुपेक्षितम् ॥ १४ ॥

वृथा नृपैर्भर्तृमदः समुह्यते धिगस्तु धर्मं कलिरेव दीप्यते ।
यदेतदेवं कृपणं जगच्छ ? रितस्ततोऽनैर्थमुखैर्विलुप्यते ॥ १५ ॥

यदा न शक्नोति विगृह्य भाषितुं परं च विद्वत्कृतशोभमीक्षितुम् ।
अथाप्तसंपादितगौरवो जनः परीक्षकक्षेपमुखो निवर्तते ॥ १६ ॥

त्वमेव लोकेऽद्य मनुष्य ! पण्डितः खलोऽयमन्यो गुरुवत्सलो जनः ।
स्मृतिं लभस्वारम नेति शोभसे दृढश्रुतैरुच्छ्वसितुं न लभ्यते ॥ १७ ॥

परेऽद्य जातस्य किलाद्य युक्तिमत् पुरातनानां किल दोषवद्वचः ।
किमेव जाल्मः कृत इत्युपेक्षितुं प्रपञ्चनायास्य जनस्य सेत्स्यति ॥१८॥

त्रयः पृथिव्यामविपन्नचेतसो न सन्ति वाक्यार्थपरीक्षणक्षमाः ।
यदा पुनः स्युर्बृहदेतदुच्यते न मामतीत्यं त्रितयं भविष्यति ॥ १९ ॥

पुरातनैर्यानि वितर्कगर्वितैः कृतानि सर्वज्ञयशःपिपासुभिः ।
घृणा न चेत्स्यान्मयि न व्यपत्रपा तथाहमद्यैव न चेद्धिगस्तु माम्॥२०॥

कृतं च यत्किंचिदपि प्रतर्कतः स्थितं च तेषामिव तं न(न्न)संशयः ।
कृतेषु सत्स्वेव हि लोकवत्सलैःकृतानि शास्त्राणि गतानि चोन्नतिम् २१

जघन्यमध्योत्तमबुद्धयो जना महत्त्वमानाभिनिविष्टचेतसः ।
वृथैव तावद्विवदेयुरुच्छ्रिता दिशन्तु लब्धा यदि कोऽत्र विस्मयः॥२२॥

अवश्यमेषां कतमोऽपि सर्वविज्जगद्धितैकान्तविशालशासनः ।
स एष मृग्यः स्मृतिसूक्ष्मचक्षुषा तमेत्य शेषैः किमनर्थपण्डितैः॥ २३ ॥

यथा ममाप्तस्य विनिश्चितं वचस्तथा परेषामपि तत्र का कथा ।
परीक्ष्यमेषां त्वनिविष्टचेतसा परीक्ष्यमित्यर्थरुचिर्न वञ्च्यते ॥ २४ ॥

मयेदमभ्यूहितमित्यदोषलं न शास्तुरेतन्मतमित्यपोह्यते ।
तथापि तच्छिष्यतयैव रम्यते कृतज्ञतैषा जलताल्पसत्त्वता ॥ २५ ॥

इदं परेषामुपपत्तिदुर्बलं कथंचिदेतन्मम युक्तमीक्षितुम् ।
अथात्मरन्ध्राणि च सन्निगूहते हिनस्ति चान्यान् कथमेतदक्षमम्।। २६ ।।

दुरुक्तमस्यैतदहं किमातुरो ममैष कः किं कुशलोच्छ्रिता वयम् ।
गुणोत्तरो योऽत्र स नोऽनुशासिता मनोरथोऽप्येष कुतोऽल्पचेतसाम्२७

न गौरवाक्रान्तमतिर्विगाहते किमत्र युक्तं किमयुक्तमर्थतः ।
गुणावबोधप्रभवं हि गौरवं कुलाङ्गनावृत्तमतोऽन्यथा भवेत् ।। २८ ।।

न गम्यते किं प्रकृतं किमुत्तरं किमुक्तमेवं किमतोऽन्यथा भवेत् ।
सदस्सु चोच्चैरभिनीय कथ्यते किमस्ति तेषामजितं महात्मनाम्।।२९।।

समानधर्मोपहितं विशेषतो विशेषतश्चेति कथा निवर्तते ।
अतोऽन्यथा न प्रतरन्ति वादिनस्तथा च सर्वं व्यभिचारवद्वचः।। ३० ।।

यथाधर्मं यस्तु साध्यं विभज्य गमयेद्वादी तस्य कुतोऽवसादः ।
यदेव साध्येनोच्यते विद्यमानं तदेवान्यत्र विजयं संदधाति ।। ३१ ।।

मया तावद्विधिनानेन शास्ता जिनः स्वयं निश्चितो वर्धमानः ।
यः संधास्यत्याप्तवत्प्रातिभानि स नो जाड्यं मंस्यते पाटवं चेति।।३२।।

## ।। सप्तमी वादोपनिषद् द्वात्रिंशिका ।।

धर्मार्थकीर्त्यधिकृतान्यपि शासनानि न ह्यानमात्रनियमात् प्रतिभान्ति लक्ष्म्या
संपादयेन्नृपसभासु विगृह्य तानि येनाध्वना तमभिधातुमविघ्नमस्तु।।१।।

साध्यादृते न विजयः सुलभः सदःसु पार्श्वस्थितेषु हि जयश्च पराजयश्च ।
तस्मादविक्लवमनुल्बणसाधुकारं सामप्रवीणगणनासमयेषु योज्यम् २

प्राक् तावदीश्वरमनः सदसश्च चक्षुर्मन्तव्यमात्मनि परत्र च किंप्रकारम् ।
यद्यात्मनो हि परिहासजयोत्तरं स्यादुक्तोपचारचतुरः प्रतिभोऽन्यथा तु ३

सौम्यप्रभुर्यदि विपक्षमुखाः सदस्यास्तत्साधुरेव गमयेत् परिभूय शेषान्
तस्मिन् सुभद्रचरितेऽप्युचितः प्रसादः सत्कृत्य विग्रहवचस्तिमितं निहन्यात्

आभाष्य भावमधुरार्पितया कृतास्त्रां दृष्ट्यावसाद्य च निवर्तितया विनेयान्
ब्रूयात्प्रतीतसुखशब्दमुपस्थितार्थं नोच्चैर्न मन्दमभिभूय मनः परस्य ५

वादास्पदं प्रतिवचश्च यथोपनीतमारोप्य यः स्मृतिपथः प्रतिसंविधत्ते ।
वैलक्ष्यविस्मृतमदा द्विषतः स सूक्तैः प्रत्यानयन् परिजनीकुरुते सदस्यान्

पूर्वं स्वपक्षरचना रभसः परस्य वक्तव्यमार्गमनियम्य विजृम्भते यः ।
आपीड्यमानसमयः कृतपौरुषोऽपि नोच्चैःशिरः स वदति प्रतिभानवत्सु

नावैमि किं वदसि कस्य कृतान्त एष सिद्धान्तयुक्तमभिधत्स्व कुहैतदुक्तम्
ग्रन्थोऽयमर्थमवधारय नैष पन्थाः क्षेपोऽयमित्यविशदागमतुण्डबन्धः८

किंचित् कथंचिदिति साध्यनिगूढवाचः सिद्धान्तदुर्गमवतार्य विनोदनीयाः
धीरस्मितैः प्रतिकथागुणदर्शनैश्च छद्मानवस्थितकथा हि पिबन्ति तेजः९

दुर्नीतमुन्नयति सूक्तमपक्षपातैर्निस्तर्जयञ्छठविदग्धमलं करोति ।
भग्नाभिसन्धिरपि यानि कथान्तराणि प्रश्नच्छलप्रहरणोऽयमवन्ध्यविघ्नः

उक्तं यथाक्षरपदं प्रतियोजयन्ति प्रत्युद्वहन्त्यपि जनाचरणैर्वचोभिः ।
सद्भावरिक्तमनसश्च सुविस्मितस्तां वाक्यप्रयोजनजडानभिसंदधीत ११

मूर्खव्रजेष्वनुमतिप्रतिभाविकारान् विद्वत्सदस्सु निरपेक्ष्य हताभिमानाः ।
उक्त्वा चिरं मदसमुच्छ्रयगर्वितानि नाम्नापि तस्य भयकुञ्चितमुच्छ्वसन्ति

लोकप्रसिद्धमतयः श्रुतगूढवादैःसाध्याःश्रुतैकरुचयस्त्वपि(यि) लोकचित्रैः
सामान्यदुर्बलविनिश्चितसंकथाभिर्मानप्रवासनमुदारमतेर्विधेयम्॥ १३ ॥

आस्फालयन् दुरितसूचनधीरहस्तैर्वाक्यान्तरेषु विकिरन् पुरुषः स्फुलिङ्गैः
स्वच्छभ्रुवा कृतकरूपितविस्मयेन छिन्नस्मितैरविनयोत्तर एव कार्यः

भूयिष्ठमुन्नदति यस्य कृतान्तदोषान्यं वा जिगीषति तमुत्सहतेऽपि वा यः
ये चाप्यनेन मुकुलप्रतिभाः कदाचित्तेष्वस्य वाक्यमवतीर्य विनोदनीयम्

कृत्येषु नादरविषक्तविलोचनः स्यात्तत्संकथाप्रणिहितोपहतास्तु साध्याः
युक्तोपनीतपरिहासमुखांश्च कुर्वन् पक्षद्विषा परुषयेत्सदसि प्रधानम् १६

उद्भूतवाग्मियशसा जनसंप्रियेण पूर्वं विसृष्टवचनप्रतिभागुणेन ।
वाच्यं सह प्रतिहतोऽपि हि तेन भाति जित्वा पुनस्तमतिकीर्तिफलानि भुङ्क्ते

वीरोत्तरं परमशक्यमवेत्य कार्यं क्षेपं प्रमोहविकथासु परः प्रयत्नः ।
अन्यो हि धीरितकथाविधुरस्य शब्दः संदिग्धतुल्यगुणदोषपथस्य चान्यः

शिष्येषु वाक्यखनयः प्रतिबोधनीयाः सिद्धिस्तथा हि नियता नयवाददोषः
अभ्युद्गतस्य हि कथाविषमाहिरोहि तेजः सकृत्प्रतिहतं च न चास्ति भूयः

सिद्धयन्तरं न महतः परिभूय वादान् स्यादा(द)जितस्तु विजयोऽप्यपवाद एव
तस्मान्न वादगहनान्यभिलक्षितस्य युक्तं विगाहितुमनुत्रसतः परेभ्यः २०

आम्नायमार्गसुकुमारकृताभियोगा क्रूरोत्तरैरभिहतस्य विलीयते धीः ।
नीराजितस्य तु सभाभटसंकटेषु शुद्धप्रहारविभवा रिपवः स्वपन्ति २१

ग्रन्थाभिचारनिपुणे बहु न प्रयोज्यं मत्वा विशेज्जनमनांसि सतामतीव ।
आशङ्कितानपि दिशः पुरुषस्य यातुः कीर्त्यक्षमां परिहरेदिति तत्प्रसक्तः

एकान्वयोत्तरगतिः परिदृष्टपन्थाः प्रत्याहतश्च चतुरस्रमपाहतश्च ।
तस्मात्परोत्तरगतौ प्रणिधानवान् स्यान्नानामुखप्रहरणश्च पते(यते)द्विषत्सु

शास्त्रोच्छ्रितान्परिभवः खलतामुपैति तान्येव तु स्मितगभीरमुपालभेत ।
अस्मद्गुरुं स हसतीति विदह्यमानं व्युत्पादयन्ति हि यशांस्यत एव भूयः

अङ्गाभिधानमफलं प्रकृतोपशान्तौ वक्तारमन्ववसिता न हि शास्त्रदोषाः
सत्यं तु लाघवमनेन पथाभ्युपैति तच्चेदवासमरतिश्रुतिभिः किमत्र २५

किं मर्म नाम रिपुषु स्थिरसाहसस्य मर्मस्वपि प्रहरति स्ववधाय मन्दः ।
आशीविषो हि दशनैः सहजोग्रवीर्यैः क्रीडन्नपि स्पृशति यत्र तदेव मर्म

मन्दोऽप्यहार्यवचनः प्रशमानुयातः स्फीतागमोऽप्यनिभृतः स्मितवस्तु पुंसाम्
तस्मात्प्रवेष्टुमुदितेन सभामनांसि यत्नः श्रुताच्छतगुणः सम एव कार्यः

आक्षिप्य यः स्वसमयं परिनिष्ठुराक्षः पश्यत्यनाहतमनाश्च परप्रवादान् ।
आक्रम्य पार्थिवसभाः स विरोचमानः शोकप्रजागरकृशान् द्विषतं करोति

किं गर्जितेन रिपुषु त्वभितोमुखेषु किं त्वेव निर्दयविरूपितपौरुषेषु ।
वाग्दीपितं तृणकृशानुवलं हि तेजः कल्पात्ययस्थिरविभूतिपराक्रमोत्थम्

किंचित्सुनीतमपि दुर्नयवद्विनेयं दुर्नीतमप्यतिशयोक्तमिव प्रशस्यम् ।
सर्वत्र हि प्रतिनिविष्टमुखोत्तरस्य सूक्तं च दुर्विगणितं च समं समेन ३०

तिर्यग्विलोकयति साध्वसविप्लुताक्षं श्लिष्टाक्षरं वदति वाक्यमसंभृतार्थम्
दृष्ट्वा हतः स्खलति विश्रुतकक्षसेकं कण्ठं मुहुः कषति चापि कथाभ्यरिष्टः

परिचितनयः स्फीतार्थोऽपि श्रियं परिसंगतां,
न नृपतिरलं भोक्तुं कृत्स्नां कृशोपनिषद्बलः ।
विदितसमयोऽप्येवं वाग्मी विनोपनिषत्क्रियां,
न तपति यथा विज्ञातारस्तथा कृतविग्रहाः ॥ ३२ ॥

## ॥ अष्टमी वादद्वात्रिंशिका ॥

ग्रामान्तरोपगतयोरेकामिषसङ्गजातमत्सरयोः ।
स्यात् सौख्यमपि शुनोर्भ्रात्रोरपि वादिनोर्न स्यात् ॥ १ ॥

क्व च तत्त्वाभिनिवेशः क्व च संरम्भातुरेक्षणं वदनम् ।
क्व च सा दीक्षा विश्वसनीयरूपतामृजुर्वादः ॥ २ ॥

तावद्बकमुग्धमुखस्तिष्ठति यावन्न रङ्गमवतरति ।
रङ्गावतारमत्तः काकोद्धतनिष्ठुरो भवति ॥ ३ ॥

क्रीडनकमीश्वराणां कुर्कुटलावकसमानबालेभ्यः ।
शास्त्राण्यपि हास्यकथां लघुतां वा क्षुल्लको नयति ॥ ४ ॥

अन्यैः स्वेच्छरचितानर्थविशेषान् श्रमेण विज्ञाय ।
कृत्स्नं वाङ्मयमित इति खादत्यङ्गानि दर्पेण ॥ ५ ॥

दृष्ट्वा गुरवः स्वयमपि परीक्षितं निश्चितं पुनरिदं नः ।
वादिनि चपले मुग्धे च तादृगेवान्तरं गच्छेत् ॥ ६ ॥

अन्यत एव श्रेयांस्यन्यत एव विचरन्ति वादिवृषाः।
वाक्संरम्भः क्वचिदपि न जगाद मुनिः शिवोपायम् ॥ ७ ॥

यद्यकलहाभिजातं वाक्छलरङ्गावतारनिर्वाच्यम्।
स्वच्छमनोभिस्तत्त्वं परिमीमांसेत्र दोषः स्यात् ॥ ८ ॥

साधयति पक्षमेकोऽपि हि विद्वान् शास्त्रवित्प्रशमयुक्तः।
न तु कलहकोटिकोट्योऽपि समेता (संगता) वाक्यलालभुजः ॥ ९ ॥

आर्तध्यानोपगतो वादी प्रतिवादिनस्तथा स्वस्य।
चिन्तयति पक्षनयहेतुशास्त्रवाग्बाणसामर्थ्यम् ॥ १० ॥

हेतुविदसौ न शब्दः (शाब्द) शाब्दोऽसौ न तु विदग्धहेतुकथः।
उभयज्ञो भावपटुःपटुरन्योऽसौ स्वमतिहीनः ॥ ११ ॥

सा नः कथा भवित्री तत्रैता जातयो मया योज्याः।
इति रागविगतनिद्रो वाग्मुखयोग्यां निशि करोति ॥ १२ ॥

अशुभवितर्कधूमितहृदयः कृत्स्नां क्षपामपि न शेते।
कुण्ठितदर्पः परिषदि वृथात्मसंभावनोपहतः ॥ १३ ॥

प्राश्निकचाटुप्रणतः प्रतिवक्तरि मत्सरोक्त(ष्ण)बद्धाक्षः।
ईश्वररचिताकुम्भो भरतक्षेत्रोत्सवं कुरुते ॥ १४ ॥

यदि विजयते कथंचित्ततोऽपि परितोषभग्नमर्यादः।
स्वगुणविकत्थनदूषिकस्त्रीर्नपि लोकान् खलीकुरुते ॥ १५ ॥

उत जीयते कथंचित् परिषत्परिवादिनं स कोपान्धः।
गलगर्जनाक्रामन् वैलक्ष्यविनोदनं कुरुते ॥ १६ ॥

वादकथां न क्षमते दीर्घं निःश्वसिति मानभङ्गोष्णम्।
रम्येऽप्यरतिज्वरितः सुहृत्स्वपि वज्रीकरणवाक्यः ॥ १७ ॥

दुःखमहंकारप्रभवमित्ययं सर्वतन्त्रसिद्धान्तः।
अथ च तमेवारूढस्तत्त्वपरीक्षां किल करोति ॥ १८ ॥

ज्ञेयः परसिद्धान्तः स्वपक्षबलनिश्चयोपलब्ध्यर्थम् ।
परपक्षक्षोभणमभ्युपेत्य तु सतामनाचारः ॥ १९ ॥

स्वहितायैवोत्थेयं को नानामतिविचेतनं लोकम् ।
यः सर्वज्ञैर्न कृतः शक्ष्यति तं कर्तुमेकमतम् ॥ २० ॥

सर्वज्ञविषयसंस्थांश्छद्मस्थो न प्रकाशयत्यर्थान् ।
नाश्चर्यमेतदत्यद्भुतं तु यत्किंचिदपि वेत्ति ॥ २१ ॥

अविनिर्णयगम्भीरं पृष्टः पुरुषोत्तरो भवति वादी ।
परिचितगुणवात्सल्यः प्रीत्युत्सवमुन्नतिं कुरुते ॥ २२ ॥

विनयमधुरोक्तिनिर्ममसारमपि वाक्यमास्पदं लभते ।
सारमपि गर्वदृष्टं वचनमपि मुनेर्वहति वायुः ॥ २३ ॥

पुरुषवचनोद्यतमुखैः काहलजनचित्तविभ्रमपिशाचैः ।
धूर्तैः कलहस्य कृतो मीमांसा नाम परिवर्तः ॥ २४ ॥

परिनिग्रहाध्यवसितश्चित्तैकाग्र्यमुपयाति तद्वादी ।
यदि तत्स्याद्वैराग्येण चिरेण शिवं पदमुपयातु ॥ २५ ॥

एकमपि सर्वपर्ययनिर्वचनीयं यदा न वेत्त्यर्थम् ।
मां प्रत्यहमिति गर्वः स्वस्थस्य न युक्त इह पुंसः ॥ २६ ॥

## ॥ नवमी वेदवाद द्वात्रिंशिका ॥

अजः पतङ्गः शबलो विश्वमयो धत्ते गर्भमचरं चरं च ।
योऽस्याध्यक्षमकलं सर्वधान्यं वेदातीतं वेदवेद्यं स वेद ॥ १ ॥

स एवैतद्विश्वमधितिष्ठत्येकस्तमेवैतं विश्वमधितिष्ठत्येकम् ।
स एवैतद्वेद यदिहास्ति वेद्यं तमेवैतद्वेद यदिहास्ति वेद्यम् ॥ २ ॥

स एवैतद्भुवनं सृजति विश्वरूपस्तमेवैतत्सृजति भुवनं विश्वरूपम् ।
न चैवैनं सृजति कश्चिन्नित्यजातं न चासौ सृजति भुवनं नित्यजातम्॥३॥

एकायनशतात्मानमेकं विश्वात्मानममृतं जायमानम् ।
यस्तं न वेद किंमृचा करिष्यति यस्तं न वेद किमृचा करिष्यति॥ ४ ॥

सर्वद्वारा निभृतमृत्युपाशैः स्वयंप्रभानेकसहस्रपर्वा ।
यस्यां वेदाः शेरते यज्ञगर्भाः सैषा गुहा गूहते सर्वमेतत् ॥ ५ ॥

भावाभावो निःस्वतत्त्वो (वितत्त्वो) निरञ्जनो (रञ्जनो) यः प्रकारः ।
गुणात्मको निर्गुणो निष्प्रभावो विश्वेश्वरः सर्वमयो न सर्वः ॥ ६ ॥

सृष्ट्वा सृष्ट्वा स्वयमेवोपभुङ्क्ते सर्वश्चायं भूतसर्गो यतश्च ।
न चास्यान्यत्कारणं सर्गसिद्धौ न चात्मानं सृजते नापि चान्यान्॥ ७ ॥

निरिन्द्रियश्चक्षुषा वेत्ति शब्दान् श्रोत्रेण रूपं जिघ्रति जिह्वया च ।
पादैर्ब्रवीति शिरसा याति तिष्ठन् सर्वेण सर्वं कुरुते मन्यते च ॥ ८ ॥

शब्दातीतः कथ्यते वावदूकैर्ज्ञानातीतो ज्ञायते ज्ञानविद्भिः ।
बन्धातीतो बध्यते क्लेशपाशैर्मोक्षातीतो मुच्यते निर्विकल्पः ॥ ९ ॥

नायं ब्रह्मा न कपर्दी न विष्णुर्ब्रह्मा चायं शंकरश्चाच्युतश्च ।
अस्मिन्मूढाः प्रतिमाः कल्पयन्तो ज्ञातश्चायं न च भूयो नमोस्ति ॥१०॥

आपो वह्निर्मातरिश्वा हुताशः सत्यं मिथ्या वसुधा मेघयानम् ।
ब्रह्मा कीटः शंकरस्तार्क्ष्यकेतुः सर्वः सर्वं सर्वथा सर्वतोऽयम् ॥ ११ ॥

स एवायं निभृता येन सत्त्वाः शश्वद्दुःखादुःखमेवापि यन्ति ।
स एवायमृषयो यं विदित्वा व्यतीत्य नाकममृतं स्वादयन्ति ॥ १२ ॥

विद्याविद्ये यत्र नो संभवेते यन्नासन्नं नो दवीयो न गम्यम् ।
यस्मिन्मृत्युर्नेहते नोतुकामा स सोऽक्षरः परमं ब्रह्मवेद्यम् ॥ १३ ॥

ओतप्रोताः पशवो येन सर्वे ओतः प्रोतः पशुभिश्चैष सर्वैः ।
सर्वे चेमे पशवस्तस्य होम्यं तेषां चायमीश्वरः संवरेण्यः ॥ १४ ॥

तस्यैवैता रश्मयः कामधेनोर्याः पाप्मानमदुहानाः क्षरन्ति ।
येनाध्याताः पञ्च जनाः स्वपन्ति (प्रोद्बुद्धास्ते) स्वं परिवर्तमानाः॥१५॥

तमेवाश्वत्थमृषयो वामनन्ति हिरण्मयं व्यस्तसहस्रशीर्षम् ।
मनःशयं शतशाखप्रशाखं यस्मिन् बीजं विश्वमोतं प्रजानाम् ॥ १६ ॥

स गीयते वीयते चाध्वरेषु मन्त्रान्तरात्मा ऋग्यजुःसामशाखः ।
अधःशयो विततांङ्गो गुहाध्यक्षः स विश्वयोनिः पुरुषो नैकवर्णः॥१७॥

तेनैवैतद्विततं ब्रह्मजालं दुराचरं दृष्ट्युपसर्गपासम् ।
अस्मिन्मग्ना माननामा (नं) शल्यैर्विवेष्यन्ते पशवो जायमानाः ॥१८॥

अयमेवान्तश्चरति देवतानामस्मिन् देवा अधि विश्वे निषेदुः ।
अयमुद्दण्डः प्राणभुक् प्रेतयानैरेष त्रिधा बद्धो वृषभो रोरवीति॥ १९ ॥

अपां गर्भः सविता वह्निरेष हिरण्मयश्चान्तरात्मानसो देवयानः ।
एतेन स्तम्भिता सुभगा द्यौर्नभश्च गुर्वी चोर्वी सप्त च भीमयादसः ॥२०॥

मनः सोमः सविता चक्षुरस्य घ्राणं प्राणो मुखमस्याद्यपिवं दिशः ।
श्रोत्रनाभिरन्ध्राभादयानं पादाविलाः सुरसाः सर्वमाप ॥ २१ ॥

विष्णुर्बीजमम्भोजगर्भः शम्भुश्चायं कारणं लोकसृष्टौ ।
नैनं देवा विद्रते नो मनुष्या देवाश्चैनं विदुरितरेतराश्च ॥ २२ ॥

अस्मिन्नुदेति सविता लोकचक्षुरस्मिन्नस्तं गच्छति चांशुगर्भः ।
एषोऽजस्त्रं वर्तते कालचक्रमेतेनायं जीवते जीवलोकः ॥ २३ ॥

अस्मिन् प्राणाः प्रतिबद्धाः प्रजानामस्मिन्नस्ता रथनाभा विचाराः।
अस्मिन् प्रीते शीर्णमूलाः पतन्ति प्राणाशंसाफलमिव मुक्तवृन्तम् २४

अस्मिन्नेकशतं निहितं मस्तकानामस्मिन् सर्वा भूतयश्चेतयश्च ।
महान्तमेनं पुरुषवेदवेद्यं आदित्यवर्णं तमसः परस्तात् ॥ २५ ॥

विद्वानज्ञश्चेतनोऽचेतनो वा स्रष्टा निरीहः स हि पुमानात्मतन्त्रः ।
क्षराकारः सततं चाक्षरात्मा विशीर्यन्ते वाचो युक्तयोऽस्मिन् ॥ २६ ॥

बुद्धिबोद्धा बोधनीयोऽन्तरात्मा बाह्यश्चायं स परात्मा दुरात्मा ।
नासावेकं नापृथग् नाभितोभौ सर्वं चैतत्पशवो यं द्विषन्ति ॥ २७ ॥

सर्वात्मकं सर्वगतं परीतमनादिमध्यान्तमपुण्यपापौ ।
बालं कुमारमजरं च वृद्धं य एनं विदुरमृतास्ते भवन्ति ॥ २८ ॥

नास्मिन् ज्ञाते ब्रह्मणि ब्रह्मचर्यं नय्याजापः स्वस्तयो नो पवित्रम् ।
नाहं नान्यो नो महान्नो कनीयान्निःसामान्यो जायते निर्विशेषः ॥ २९ ॥

नैनं मत्वा शोचते नाभ्युपैति नाप्याशास्ते म्रियते जायते वा ।
नास्मिंल्लोके गृह्यते नो परस्मिंल्लोकातीतो वर्तते लोक एव ॥ ३० ॥

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ ३१ ॥

नानाकल्पं पश्यतो जीवलोकं नित्यासक्त व्याधयश्चाधयश्च ।
यस्मिन्नेवं सर्वतः सर्वतत्त्वे दृष्टे देवे नो पुनस्तापमेति ॥ ३२ ॥

## ॥ दशमी द्वात्रिंशिका ॥

अविग्रहमनाशंसमपरः प्रत्ययात्मकम् ।
यः प्रोवाचामृतं तस्मै वीराय मुनये नमः ॥ १ ॥

स्वशरीरमनोऽवस्थाः पश्यतः स्वेन चक्षुषा ।
यथैवायं भवस्तद्वदतीतानागतावपि ॥ २ ॥

किमन्नाहं किमनहं किमनेकः किमेकधा ।
विदुषा चोद्यतं चक्षुरत्रैव च विनिश्चयः ॥ ३ ॥

मोहोऽहमस्मीत्याबन्धः शरीरज्ञानभक्तिषु ।
ममत्वविषयास्वादद्वेषात्तस्मात्तु कर्मणः ॥ ४ ॥

जन्मकर्मविशेषेभ्यो दुःखापातस्तदेव वा ।
आजस्रिकमपश्याना नानात्मव्यक्तचक्षुषाम् ॥ ५ ॥

पिपासाभ्युदयः सर्वो भवोपादानसाधनः ।
प्रदोषापायगमनादार्तरौद्रे तु ते मते ॥ ६ ॥

आलम्बनपरीणामविशेषोद्भवभक्तय: ।
निमित्तमनयोराद्यं परिणामस्तु कारणम् ॥ ७ ॥

भव: प्रमादचिन्तादिप्रवृत्तिद्वारसंग्रह: ।
हिंसादिभेदोपचय: संवरैकपराभव: ॥ ८ ॥

परस्परसमुत्थानां विषयेन्द्रियसंविद: ।
पित्रादिवदभिन्नास्तु विषया भिन्नवृत्तय: ॥ ९ ॥

एकस्मिन् प्रत्ययेऽष्टाङ्गकर्मसामर्थ्यसंभवात् ।
नानात्वैकपरीणामसिद्धिरष्टौ तु शङ्कित: ॥ १० ॥

नाहमस्मीत्यसद्भावे दु:खोद्वेगहितैषिता ।
न नित्यानित्यनानैक्यं कर्त्राद्येकान्तपक्षत: ॥ ११ ॥

उत्पत्तेरेव नित्यत्वमनित्यत्वं च मन्यते ।
प्रतीत्य संविद्भावस्तु कारकेषूपनीयते ॥ १२ ॥

जातिलिङ्गपरीमाणकालव्यक्तिप्रयोजना: ।
संज्ञा मिथ्यापरा दृष्टा: परिक्षिण्वन्त्यचेतस: ॥ १३ ॥

यथार्थं वा स्यात् संबन्ध: शब्दादीन्द्रियचेतसाम् ।
तदस्य जगत: सत्त्वमात्मप्रत्ययलक्षणम् ॥ १४ ॥

द्रव्यपर्यायसंकल्पश्चेतस्तद्व्यञ्जकं वच: ।
तद्यथा यच्च यावच्च निरवद्येति योजना ॥ १५ ॥

निषेकादिजरापाकपर्यन्तं पौरुषं यथा ।
सम्यग्दर्शनभावादिरप्रमादविधिस्तथा ॥ १६ ॥

शब्दादिषु यथा लोकश्चित्रावस्थ: प्रवर्तते ।
तद्वृत्तमात्मप्रत्यक्षं त्याज्यमित्युभयो नय: ॥ १७ ॥

घृणानुकम्पा पारुष्यं कार्पण्यं परिशुद्धये ।
व्रतोपव्रतयुक्तस्तु स्मृतिस्थैर्योपपत्तये ॥ १८ ॥

उपधानविधिश्चित्रशेषाशयविशोधनः ।
न्याय्यो वातादिवैषम्यविशेषौषधकल्पवत् ॥ १९ ॥

न विधिः प्रतिषेधो वा कुशलस्य प्रवर्तितुम् ।
तदेव वृत्तमात्मस्थं कषायपरिपक्तये ॥ २० ॥

न दोषदर्शनाच्छुद्धं वैराग्यं विषयात्मसु ।
मृदुप्रवृत्त्युपायोऽयं तत्त्वज्ञानं परं हितम् ॥ २१ ॥

श्रद्धावान् विदितापायः परिक्रान्तपरीषहः ।
भव्यो गुरुभिरादिष्टो योगाचारमुपाचरत् ॥ २२ ॥

शुचौ निष्कण्टके देशे समप्राणवपुर्मनाः ।
स्वस्तिकाद्यासनजयं कुर्यादेकाग्रसिद्धये ॥ २३ ॥

प्राणायामो वपुश्चित्रजाड्यदोषविशोधनः ।
शक्त्युत्कृष्टकलत्कार्यः प्रायेणैश्वर्यसत्तमः ॥ २४ ॥

क्रूरक्लिष्टवितर्कात्मा निमित्तामयकण्टकात् ।
उद्धरेद् गतिशब्दादि वपुःस्वाभाव्यदर्शनात् ॥ २५ ॥

चरस्थिरमहत्सूक्ष्मसंज्ञाज्ञानार्थसंगतिः ।
यथासुखजयोपायमिति यायाज्जितं जिनम् ॥ २६ ॥

इत्याश्रवनिरोधोऽयं कषायस्तम्भलक्षणः ।
तद्धर्म्यमस्माच्छुक्लं तु तमःशेषक्षयात्मकम् ॥ २७ ॥

नेहारम्भणचारोऽस्ति केवलोदीरणव्यये ।
अनन्तैश्वर्यसामर्थ्यात् स्वयं योगी प्रपद्यते ॥ २८ ॥

तत्क्षीयमाणं क्षीणं तु चरमाभ्युदयक्षणे ।
कैवल्यकारणं पङ्ककलालाम्बुप्रसादवत् ॥ २९ ॥

चक्षुर्वद्विषयाख्यातिरवधिज्ञानकेवले ।
शेषवृत्तिविशेषात्तु ते मते ज्ञानदर्शने ॥ ३० ॥

जगत्स्थितिवशादायुस्तुल्यं वेद्यादपि त्रयम् ।
करोत्यात्मसमुद्घाताद्योगशान्तिरतः परम् ॥ ३१ ॥

सर्वप्रपञ्चोपरतः शिवोऽनन्त्यपरायणः ।
सद्भावमात्रप्रज्ञप्तिनिरुपाख्योऽथ निर्वृतः ॥ ३२ ॥

प्रदीपध्यानवद्ध्यानं चेतनावद्विचेष्टितम् ।
ते विकल्पवशाद्भिन्ने भवनिर्वाणवर्त्मनि ॥ ३३ ॥

जिनोपदेशदिङ्मात्रमितीदमुपदर्शितम् ।
यदवेत्य स्मृतिमतां विस्तरार्थो भविष्यति ॥ ३४ ॥

## ॥ एकादशी गुणवचनद्वात्रिंशिका ॥

समानपुरुषस्य तावदपवादयन् कीदृशः
किमेव तु महात्मनामपरतन्त्रधीचक्षुषाम् ।
अपास्य विनयस्मृती भुवि यशः स्वयं कुर्वता
त्वयातिगुणवत्सलेन गुरवः परं व्यंसिताः ॥ १ ॥

श्रीराश्रितेषु विनयाभ्युदयः सुतेषु
बुद्धिर्नयेषु रिपुवासगृहेषु तेजः ।
वक्तुं यथायमुदितप्रतिभो जनस्ते
कीर्तिं तथा वदतु तावदिहेति कश्चित् ॥ २ ॥

एकां दिशं व्रजति यद्गतिमद्गतं च
तत्रस्थमेव च विभाति दिगन्तरेषु ।
यातं कथं दशदिगन्तविभक्तमूर्ति
युज्येत वक्तुमुत वा न गतं यशस्ते ॥ ३ ॥

सत्यं गुणेषु पुरुषस्य मनोरथोऽपि
श्लाघ्यःसतां ननु यथा व्यसनं तथैतत् ।

यत्पश्यतः समुदितैरबलो व्युपास्ता
कीर्तिस्तथा श्रुतिमुखानि वनानि याता ॥ ४ ॥

एतद्भो बृहदुच्यते हसतु मां कामं जनो दक्षिणः
स्वार्थारम्भपटुः परार्थविमुखो लज्जानपेक्षो भवान् ।
योऽन्यक्लेशसमर्जितान्यपि यशांस्युत्सार्य लक्ष्मीपथा
कीर्त्येकार्णववर्षिणापि यशसा नाद्यापि संतुष्यसे ॥ ५ ॥

चाटुप्रीतेन मुक्ता यदियमगणिता दीयते राजलक्ष्मी
रन्योऽन्येभ्यो नृपेभ्यस्त्वदुरसि नृपते ! यापि विश्रम्भलीना ।
मा भूदेष प्रसङ्गो निरनुनयमतेरस्य मय्यप्यतस्ते
कीर्तिस्तेनाप्रमेया न विनयचकिता सागरानप्यतीता ॥ ६ ॥

अवश्यं कर्तव्यः श्रियमभिलषता पक्षपातो गुणेषु
प्रसन्नायां तस्यां कथमिव च न ते लालनीया भवेयुः ।
किमेषा वृत्तान्तं न वहसि नृपते लालनीया त्वदाज्ञा
महेन्द्रादीनां यद्गुणपरितुलनादुर्विनीता गुणास्ते ॥ ७ ॥

अन्येषां पार्थिवानां भ्रमति दश दिशः कीर्तिरिन्दुप्रभावात्
त्वत्कीर्तेर्नास्ति शक्तिः पदमपि चलितुं किं भयात्सौकुमार्यात् ।
आ ज्ञातं नैतदेवं श्रुतिपथचकिता तेन गच्छत्यजस्रं
कीर्तिस्तेषां नृपाणां तव नु नरपते ! नास्ति कीर्तेरयातम् ॥ ८ ॥

अन्येऽप्यस्मिन्नरपतिकुले पार्थिवा भूतपूर्वा
स्तैरप्येवं प्रणतसुमुखैरुद्धृता राजवंशाः ।
न त्वेवं तैर्गुरुपरिभवः स्पृष्टपूर्वो यथाऽयं
श्रीस्ते राजन्नुरसि रमते सत्यभामासपत्नी ॥ ९ ॥

अगतिविधुरैर्लक्ष्मीं दृष्ट्वा चिरस्य सहोषितां
यदि किल परैरेकीभूतैर्गुणैस्त्वमुपाश्रितः ।

इति गुणजितं लोकं मत्वा नरेन्द्र ! सुरायसे
वदतु गुणवान् बुद्ध्यादीनां गुणः कतमस्तव ॥ १० ॥

गन्धद्विपो मधुकरानिव पङ्कजेभ्यो
दानेन यो रिपुगणान् हरसि प्रवीरान् ।
चित्रं किमत्र यदि तस्य तवैव राज
न्नाज्ञां वहन्ति वसुधाधिपमौलिमालाः ॥ ११ ॥

एकेयं वसुधा बहूनि दिवसान्यासीद्बहूनां प्रिया
वस्यान्योऽन्यसुखाः कथं नरपते ! ते भद्रशीला नृपाः ।
ईर्ष्यामत्सरितेन साद्यभवतैवात्माङ्कमारोपिता
शेषैस्त्वत्परितोषभावितगुणैर्गोपालवत् पाल्यते ॥ १२ ॥

गुहाध्यक्षाः सिंहाः प्रमदवनचरा द्वीपिशार्दूलपोताः
कराग्रैः सिच्यन्ते वनगजकलभैर्दीर्घिकातीरवृक्षाः ।
पुरद्वाररक्षा दिशि दिशि महिषा यूथगुल्माग्रशूरा
रुषानुध्यातानामतिललितमिदं जायते विद्विषां ते ॥ १३ ॥

निर्मूलोच्छिन्नमूला भुजपरिघपरिस्पन्ददृप्तैर्नरेन्द्रैः
संक्षिप्तश्रीविताना मृगपतिपतिभिः शत्रुदेशाः क्रियन्ते ।
किं त्वेतदाजवृत्तं स्वरुचिपरिचयः शक्तिसंपन्नतेयं
भङ्क्त्वा यच्छत्रुवंशानुचितशतगुणान् राष्ट्रलक्ष्म्या करोषि ॥ १४ ॥

सर्वेऽप्येकमुखा गुणा गुणपतिं मानं विना निर्गुणा
इत्येवं गुणवत्सलैर्नृपतिभिर्मानः परित्यज्यते ।
नान्यश्चैव तवापि किं च भवता लब्धास्पदस्तेष्वसौ
मत्तेनेव गजेन कोमलतरुर्निर्मूलमुत्खन्यते ॥ १५ ॥

यत्प्राप्नोति यशस्तव क्षितिपते भ्रूभेदमुत्पादयन्-
किं तत्त्वच्चरणोपसन्नमुकुटः प्राप्नोति कश्चिन्नृपः ।

इत्येवं कुरुते स वल्लभयशास्त्वच्छासनातिक्रमं
दर्पासूचितसन्मुखो न हि मृगः सिंहस्य न ख्याप्यते ॥ १६ ॥

प्रसादयति निम्नगाः कलुषिताम्भसः प्रावृषा
पुनर्नवसुखं करोति कुमुदैः सरःसंगमम् ।
विघाटयति दिङ्मुखान्यवपुनाति चन्द्रप्रभां
तथापि च दुरात्मनां शरदरोचकस्तद्द्विषाम् ॥ १७ ॥

न वेद्मि कथमप्ययं सुररहस्यभेदः कृतस्त्वया
युधि हतः परं पदमुपैति विष्णोर्यथाता ।
अतः प्रणयसंसृतामविगणय्य लक्ष्मीमसौ
करोति तव सायकः क्षममुरः सिषित्सुर्नृप ! ॥ १८ ॥

अन्योऽन्यावेक्षया स्त्री भवति गुणवती प्रायशो विष्णुता वा
लोकप्रत्यक्षमेतत्क्षितिविषमतया चञ्चला श्रीर्यथासीत् ।
सैवान्यप्रीतिदानात्तव भुजवलयान्तःपुरप्राप्तमाना
मुर्वी दृष्ट्वा दयावत्स लघुसुचरिताहारसंख्यं करोति ॥ १९ ॥

प्रसूतानां वृद्धिः परिणमति निःसंशयकला
पुरावादश्चैष स्थितिरियमजेयेति नियमः ।
जगद्वृत्तान्तेऽस्मिन् विवदति तवेयं नरपते !
कथं वृद्धा च श्रीर्न च पर्युषितो यौवनगुणः ॥ २० ॥

अन्तर्गूढसहस्रलोचनधरं भ्रूभेदवज्रायुधं
कस्त्वा मानुषविग्रहं हरिरिति ज्ञातुं समर्थो नरः ।
यद्येते मघवं जगद्धिततरास्त्वा वल्लभः स्वामिन-
स्त्वद्भूदेश पटुप्रकीर्णसलिला न ख्यापयेयुर्धनाः ॥ २१ ॥

महीपालोऽसीति स्तुतिवचनमेतन्न गुणजं
महीपालः खिन्नामवनिमुरसा धारयति यः ।

यदा तावद्गर्भे त्वमथ सकलश्रीर्वसुमति
किमेयायुष्मांस्ते नव शिवमिमां पश्यति महीम् ॥२२॥

शतेष्वेकः शूरो यदि भवति कश्चिन्नयपटु
स्तथा दीर्घापेक्षी रिपुविजयनिःसाध्वसपरः ।
तदेतत्संपूर्णं द्वितयमपि येनाद्यपुरुषे
श्रुतं वा दृष्टं वा स वदतु यदि त्वा न वदति ॥ २३ ॥

अयनविषमा भानोर्दीप्तिर्दिनक्षयपेलवा
परिभवसुखं मत्तैर्मत्तैर्घनैश्च विलुप्यते ।
सततसकला निर्व्यासङ्गं समाश्रितशीतला
तव नरपते ! दीप्तिः साम्यं तया कथमेष्यति ॥ २४ ॥

को नामैष करोति नाशयति वा भाग्येष्वधीनं जगत्
स्वातन्त्र्ये कथमीश्वरस्य न वशः स्रष्टुं विशिष्टाः प्रजाः ।
लब्धं वक्तृयशः सभास्विति चिरं तापोऽद्य तेजस्विना
मिच्छामात्रसुखं यथा तव जगत्स्यादीश्वरोऽपीदृशः ॥ २५ ॥

गण्डेष्वेव समाप्यते विवदतां यद्वारणानां मदो
यद्वा भूमिषु यन्मनोरथशतैस्तुष्यन्ति तेजस्विनः ।
यत्कान्तावदनेषु पत्ररचना सङ्गश्च ते मन्त्रीणां
तत्सर्वं द्विषतां मनोऽनुगतया कीर्त्यापराद्धं तव ॥ २६ ॥

क्रमोपगतमप्यपास्य युगभागधेयं कले
रपर्वणि य एष ते कृतयुगावतारः कृतः ।
भवेदपि महेश्वरस्त्रिभुवनेश्वरो वाच्युतो
विधातुरपि नूनमद्य जगदुद्भवे संशयः ॥ २७ ॥

गुणो नाम द्रव्यं भवति गुणतश्च प्रभवति
गुणापेक्षं कर्माप्यनुशयमनारम्भविषमम् ।

विभुः स्यात् किं द्रव्यं गुणजमुत वान्यः पदविधि
र्यशो दिक्पर्यन्तं तव किमिति शक्यं गमयितुम् ॥ २८ ॥

## ॥ द्वादशी न्यायद्वात्रिंशिका ॥

दैवखातं च वदनं आत्मायत्तं च वाङ्मयम् ।
श्रोतारः सन्ति चोक्तस्य निर्लज्जः को न पण्डितः ॥ १ ॥

अभिष्टुवन्ति यत्स्वैरं नृपगोष्ठ्यां नृपुङ्गवाः ।
असत्संदिग्धमुक्तानि कृषास्तेन कृपात्मकाः ॥ २ ॥

प्रगद्वृत्तान्तगहनाद्विश्लिष्य प्रहता गिरः ।
योजयत्यर्थगम्या यः शब्दब्रह्म भुनक्ति सः ॥ ३ ॥

प्रसिद्धशब्दार्थगतिर्ज्ञानं जात्यन्धयश्च यः ।
न स स्वयं प्रवक्तारमुपास्ते तन्त्रयुक्तिषु ॥ ४ ॥

दुरुक्तानि निवर्तन्ते सूक्ते नास्ति विचारणा ।
पुरुषो ब्राह्मणो विप्रः पुरुषोऽवेति वा यथा ॥ ५ ॥

न सामान्यविशेषाभ्यामृतेऽन्याहेतु जायते ।
तद्विशेषविघाताभ्यां हेत्वाभासोपजातयः ॥ ६ ॥

द्वितीयपक्षप्रतिघाः सर्व एव कथापथाः ।
अभिधानार्थविभ्रान्तैरन्योऽन्यं विप्रलप्यते ॥ ७ ॥

समं संशय्यते यत्र सामान्यमलिनं धिया ।
विचारं पुनरुक्तार्थं विशेषाय स संशयः ॥ ८ ॥

प्रतिज्ञा निर्णयो हेतुर्दृष्टान्तं बुद्धिकारणम् ।
प्रमाणहेतुदृष्टान्तजातितर्कास्तदुक्तयः ॥ ९ ॥

लोकधर्मोऽभ्यनुज्ञातः सिद्धान्तो वाग्नियामकः ।
अङ्गधर्मविकल्पाभ्यां प्रमेयोपचयाचयौ ॥ १० ॥

अविद्यार्थानवगमो विरूपाप्रतिपत्तितः ।
हेत्वाभासश्च निर्वादेष्वियमेव तु भूयसी ॥ ११ ॥

किंचित्सामान्यवैशेष्यादयुक्तार्थोपपदानम् ।
छलं तदिति वैस्पष्ट्याद्वाच्याभिप्रायभेदतः ॥ १२ ॥

व्यभिचारात् परं नास्ति परपक्षप्रदूषणम् ।
हेतुपर्यन्तयोगाच्च तस्मात्पक्षोत्तरो भवेत् ॥ १३ ॥

संशयप्रतिदृष्टान्तविरोधापत्तिहानयः ।
प्रतिपक्षविकल्पौ च व्यभिचारार्थपर्ययाः ॥ १४ ॥

अकारणत्वान्निर्देशः साध्यत्वात्त्वनुयोगजाः ।
हेत्वन्तराभ्युपगमः पुनरुक्तान्यतः परम् ॥ १५ ॥

एकपक्षहता बुद्धिर्जल्पवाग्यन्त्रपीडिता ।
श्रुतसंभावनावैरी वैरस्यं प्रतिपद्यते' ॥ १६ ॥

तानुपेत्य वितण्डास्ति नयस्येति विचारणा ।
सैव जल्पे विपर्यासो वितण्डैवेति लक्ष्यते ॥ १७ ॥

न सिद्धान्ताभ्युपगमादितरः सार्वतन्त्रिकः ।
यस्येत्युक्तमनेकान्तादितरं नानुषज्यते ॥ १८ ॥

विनिर्णयान्न संदेहः सर्वथोत्तरसंभवात् ।
स एव हेतुश्चक्षुर्वन्नानिष्टप्रतिपत्तितः ॥ १९ ॥

दृष्टान्तदूषणामोहोहानि पक्षाप्रसिद्धयः ।
वाचोयुक्त्युपपत्तिभ्यामत एव विपर्ययः ॥ २० ॥

अनभ्युपगमो लोकशास्त्रधर्मविकल्पितः ।
सामान्याभ्युपपत्तिभ्यां न समोऽनिष्ठकल्पनात् ॥ २१ ॥

अन्योऽन्योभयसामान्यसर्वसङ्गविशेषतः ।
सामान्यघाततः सिद्धशास्त्रं लोकोपपत्तितः ॥ २२ ॥

अन्यथेति च वैधर्म्यमापत्तिव्यभिचारतः ।
प्रतिपत्तिविकल्पाच्च तत्सिद्धिः कृतसंभवात् ॥ २३ ॥

पुनरुक्तमसंबद्धात् साम्यः सामर्थ्यदर्शनात् ।
मन्त्रवच्चेति नापार्थ्यं प्रसङ्गानिष्टसिद्धयः ॥ २४ ॥

पुनरुक्तवदायोज्यं हेतुवादान्तरोक्तये ।
समानीसङ्गसंकल्पं प्रश्नाकारणसिद्धयः ॥ २५ ॥

तदभावात्प्रतिज्ञादि प्रत्येकं चानुपक्रमात् ।
कालप्राप्तिविकल्पाभ्यां सर्वसिद्धेश्च नार्थवत् ॥ २६ ॥

क्वचित् किंचित् कथंचिच्चेत्यनुषङ्गात्स लोपगः ।
कृताकृतविकल्पाभ्यां संशयप्रतिरूपतः ॥ २७ ॥

ननाम दृढमेवेति दुर्बलं चोपपत्तितः ।
वक्तृशक्तिविशेषात्तु तत्तद्भवति वा न वा ॥ २८ ॥

तुल्यसामाद्युपायासु शक्त्या युक्तो विशेष्यते ।
विजिगीषुर्यथा वाग्मी तथाभूयं श्रुतादपि ॥ २९ ॥

सर्वपक्षकणैस्तुल्यं वादिनः सत्यतां विना ।
समानाभ्युपपत्तिं च जिह्मरौक्षायुधा ह्यमी ॥ ३० ॥

प्राश्निकेश्वरसौमुख्यं धारणाक्षेपकौशलम् ।
सहिष्णुता परं धार्ष्ट्यमिति वादच्छलानि षट् ॥ ३१ ॥

किं परीक्ष्यं कृतार्थस्य किमेवेति च चक्षुषः ।
परानुग्रहसाधोस्तु कौशलं वक्तृकौशलम् ॥ ३२ ॥

## ॥ त्रयोदशी सांख्यप्रबोधद्वात्रिंशिका ॥

सन्नित्यकर्तृनानात्वप्रतिपक्षोभयात्मकम् ।
गुणधर्ममृषिर्नाना पश्यन्नेवात्मनो भवम् ॥ १ ॥

स्वपरानुग्रहद्वारमतिरासुरये स्वयम् ।
तमुमावसुदेवाय तन्त्रार्थव्याससूरये ॥ २ ॥

सत्त्वादिसाम्यं प्रकृतिर्वैषम्यं महदादयः ।
परस्परात्मकेनोपद्रवकार्कश्यवृत्तिवत् ॥ ३ ॥

लाघवख्यातिसौख्यानि सत्त्वं दुःखक्रिये रजः ।
तमोऽन्यद्बहिरन्तश्च तद्विकल्पोऽनिलादिवत् ॥ ४ ॥

श्रोत्रादिवृत्तिः प्रत्यक्षमनुमानमनुस्मृतिः ।
कृत्स्नार्थसिद्धेर्नातोऽन्यच्छाब्दमात्मविशेषतः ॥ ५ ॥

आदिशब्दात्प्रवृत्तीनामर्थवत्त्वादनुग्रहात् ।
परिणामविशेषाच्च गुणचैतन्यवृत्तयः ॥ ६ ॥

गुणौदासीन्यमन्योऽन्यं चैतन्यादधिकारतः ।
अभोक्तृत्वाच्च कर्तृत्वमङ्गाङ्गिपरिणामतः ॥ ७ ॥

ऐक्यादकर्ता पुरुषः कर्ताधिष्ठानशक्तितः ।
स्वातन्त्र्यादुपलब्धेश्च कार्यस्तु गुणभोजनात् ॥ ८ ॥

वैषम्यमात्रात्महतः कारणग्रामसंभवः ।
शब्दादयश्च व्योमादिविशेषास्तद्गुणात्मकाः ॥ ९ ॥

शब्दाद्या लोकसामर्थ्यं श्रोत्रादीन्द्रियपञ्चकम् ।
एतेनोक्ता विशेषाणां शब्दादिगुणभक्तयः ॥ १० ॥

वाक्यादानं गतानन्दत्यागान्यदुभयं विदुः ।
चैतन्यवद्देहवृत्तिर्मनःसंवित्सुखादयः ॥ ११ ॥

प्राणादाकरुणग्रामवृत्तिर्जीवनसंज्ञिका ।
तदभिव्यक्तिरन्यत्र बुद्ध्याशयवशाद्भवः ॥ १२ ॥

शरीरे धृतिसंश्लेषपङ्क्तिव्यूहावकाशतः ।
पृथिव्यादिसमारम्भः परिणामस्तु पूर्वयोः ॥ १३ ॥

श्रोत्रादीनां मनोवृत्तिः प्रतिपत्तिस्वयोगतः ।
शान्तादिविविधोदर्कः प्रत्ययार्थः प्रवर्तते ॥ १४ ॥

सिद्धिरीहितनिष्पत्तिस्तुष्टिस्तद्देशवृत्तिता ।
अशक्तिः साधनाद्यानि वितथेष्टिविपर्ययः ॥ १५ ॥

पुरुषार्थप्रवृत्तीनां निवृत्तीनां स्वभावतः ।
आविस्तिरोभावगती को गुणानां प्रमास्यति ॥ १६ ॥

अनादिप्रचितं कर्म प्रलयान्त्यवपुर्मुखम् ।
प्रवृत्तौ तद्विधापायां छिन्नवृक्षप्रमोदवत् ॥ १७ ॥

अनभिव्यक्तविद्यस्य विदुषस्तद्भवाञ्चितम् ।
यथाविधोदयापायि प्रचितावपि संक्रमः ॥ १८ ॥

ब्रह्माद्यष्टविधं दैवं सत्त्ववृत्तिविशेषतः ।
मानुष्यं च रजः शेषं स्वं वार्ततमसो जगत् ॥ १९ ॥

अविद्यैकात्मको बन्धो गुणव्यापारलक्षणः ।
दक्षिणादिविकल्पस्तु बालिशप्रसभाङ्कुशः ॥ २० ॥

न ग्रहाः प्रतिबन्धाय नैकाग्र्यं वा प्रवृत्तये ।
तिर्यक्ष्वपि च सिध्यन्ति व्यक्ता नानात्वबुद्धयः ॥ २१ ॥

वैराग्यात्कारणग्रामतन्निरोधपरिश्रमः ।
न ह्यहेतोर्निमीलन्ति पुरुषार्थोत्थिता गुणाः ॥ २२ ॥

ज्ञानप्रसादौ वैराग्यमित्यविद्यातमोजितम् ।
को हि रागो विरागो वा कुशलस्य प्रवृत्तिषु ॥ २३ ॥

यावद्रजस्तमोवृत्तिमहमित्यवमन्यते ।
परिष्वजति सत्त्वं च तावत्तेष्वेव गण्यते ॥ २४ ॥

क्षुन्निद्राद्यनयो वृत्तमात्मभूतं विपश्चितः ।
न सम्यग्दर्शनोपायि तथान्यदपि कोऽत्ययः ॥ २५ ॥

सदाचारप्रवृत्तस्य क्रूरक्लिष्टक्रियस्य वा ।
सकृच्चाभ्युदिता ख्यातिर्न च किंचिद्विशिष्यते ॥ २६ ॥

शेषवृत्ताशयवशात्साम्यप्रकृतिभेदवत् ।
समानप्रतिबोधानामसमानाः प्रवृत्तयः ॥ २७ ॥

किमत्र शुद्धं श्लिष्टं वा किं वा कस्य प्रयोजनम् ।
कृतार्थानां गुणेष्वेव गुणानामिति जायते ॥ २८ ॥

भयं संबोधनं लिङ्गं किशोरप्राजनो यमः ।
न हि विज्ञानचैतन्यनानात्वं प्राक् समिध्यते ॥ २९ ॥

यस्तु केवलवाचादौ या या दृष्टार्थविक्रमैः ।
विकृष्टेषुरिव क्षिप्तस्तमोऽम्भसि स नश्यति ॥ ३० ॥

अहो दुर्गा गुणमतिर्दुर्गं मोक्षाय नाम यत् ।
कथंचिदेव मुञ्चन्ति स्वपन्मन्दाभिसातिकः ॥ ३१ ॥

चक्षुर्वत्पुरूषो भोक्ता बन्धमोक्षविलक्षणः ।
कृतार्थैः संप्रयुक्तोऽपि शून्य एव गुणैरिति ॥ ३२ ॥

## ॥ चतुर्दशी वैशेषिकद्वात्रिंशिका ॥

धर्माधर्मेश्वरा लोकसिद्ध्यपायप्रवृत्तिषु ।
द्रव्यादिसाधनावेतौ द्रव्याद्या वा परस्परम् ॥ १ ॥

द्रव्यमाधारसामर्थ्यात् स्वातन्त्र्यसंभवाद् गुणः ।
आनन्तर्याद् गुणेष्वेककर्मेत्यारम्भनिश्चयः ॥ २ ॥

संस्कारेण तदापेक्ष्यमेकद्रव्यक्षणस्थितिः ।
कर्म कार्यविरोधि स्यादुभयोभयथा गुणः ॥ ३ ॥

अन्यतोऽन्येषु सापेक्ष्यस्तुल्यप्रत्ययदर्शनात् ।
द्रव्यादिभावः सत्तादिर्मध्यत्वावृत्तिलक्षणम् ॥ ४ ॥

प्रत्यक्षविषया ख्यातिस्तत्संबन्धि विरोधि वा ।
अस्त्येवमिति तुल्यत्वेत्यनुमानं त्रिधा (विधा) त्रिधा ॥ ५ ॥

संयोगजत्वात् कार्यस्य कारणं परमाणवः ।
दृष्टवन्नैकजातीयास्तेषां सन्त्येव पाकजाः ॥ ६ ॥

पृथिव्यादीनि खान्तानि वैशेषिकगुणार्पणात् ।
प्राणादियानायानेन तच्छेषगुणसंभवः ॥ ७ ॥

वाय्वन्तानां न रूपादि जन्मधर्मविशेषतः ।
शब्दो नित्यस्तु साधर्म्यात् सर्वार्थत्वाच्च नार्थवत् ॥ ८ ॥

रूपादीनां स्वजातीयाः सामर्थ्याद्वसुधादयः ।
पृथक्शरीरजनका हेतुभेदात्त्वयोनिजम् ॥ ९ ॥

त्वक्चक्षुर्ग्रहणं द्रव्यं रूपाद्याश्चक्षुरादिभिः ।
संख्यादिभावकर्माणि यथापा (या) श्रययोगतः ॥ १० ॥

सेतरैर्युगपत् क्षिप्तं परत्वैः कालसंभवम् ।
इदमस्मादिति दिशो नानाकार्यविशेषतः ॥ ११ ॥

आत्मेन्द्रियादिसंयोगे बुद्ध्यभावाच्च मानवः ।
बुद्ध्यादेरात्मनः खादि शब्दादिविभवान्महत् ॥ १२ ॥

प्रपञ्चादपि दीर्घं वा ह्रस्वं वा परिमण्डलम् ।
रूपस्पर्शवदेकत्वं पृथक्त्वे वृत्तिजन्मनः ॥ १३ ॥

क्रियावतोर्वा तुल्यं च संवियोगाविप(व)क्षितौ ।
कारणं ध्वनिराभ्यां च सन्तानात्सलिलोर्मिवत् ॥ १४ ॥

देशकालविशेषाभ्यां परं च गुणकर्मणाम् ।
ऐक्यादाश्रयतद्वत्ता भावे तद्बुद्धिधर्मतः ॥ १५ ॥

द्रव्यगौरवसंयोगयत्नसंस्कारजाः क्रियाः ।
अदृष्टाच्चेति तत्संज्ञाविकल्पौ व्यवहारतः ॥ १६ ॥

संबन्धाद् बुद्ध्यपेक्षश्च कार्याश्चाज्ञस्य बुद्धयः ।
संज्ञास्तु भावद्रव्यादिनिमित्ताः समयात्मिकाः ॥ १७ ॥

निरुक्तार्थोपचाराभ्यामेता जातिविभक्तिषु ।
हिनोति हीयते वेति हेतुं गृह्णन्त्यमी गृहाः ॥ १८ ॥

अन्योऽन्यथा स द्रव्यादिसत्ताभावात्सदान्तरम् ।
अनारम्भाविनाशाच्च तेषु स्मृतिविरोधिनः ॥ १९ ॥

अभूदभूताद्भवतीत्यपेक्षा चापि कारणात् ।
भविष्यतीति दृष्टत्वात् कार्यान्तरनियोगतः ॥ २० ॥

आत्ममानससंयोगविशेषादेव खादिषु ।
सामान्यात्संशयस्वप्नस्मृतीश्चादृष्टसंस्कृतैः ॥ २१ ॥

संप्रबुद्धेषु विज्ञानमभिसन्धिविशेषतः ।
सतत्त्वव्यञ्जनं तेषां प्रदीपद्रव्ययोगवत् ॥ २२ ॥

अव्यूहादङ्कुरैः सौक्ष्म्यान्नैकदीपप्रकाशवत् ।
एतेनाक्षमनोबुद्ध्याद्यसंकरविनिर्णयः ॥ २३ ॥

अक्षप्रदोषाध्यारोपविधासुखप्रमाणतः ।
इच्छा द्वेषवतो यस्माद्धर्माधर्मविक्लृप्तयः ॥ २४ ॥

शुद्धाभिसन्धिर्यः कश्चित् कायवाङ्मानसो विधिः ।
सर्वोऽदृष्टविशेषाय यस्य यत्र यदा यथा ॥ २५ ॥

द्रव्यादीन्यक्षतार्थस्य प्रसादोभयसाधनम् ।
तत्सामान्यफलान्यैक्याद्दृते त्वक्षादिकल्पना ॥ २६ ॥

यथा पदार्थविज्ञानं विद्यादृष्टिविशेषतः ।
तत्स्थैर्यमेव वैराग्यं ग्रन्थार्थप्रतिपत्तिवत् ॥ २७ ॥

एवमात्मादिसंयोगेनाभिसन्धौ विपश्चितः ।
नवं न चीयते बीजं पुराणं चापचीयते ॥ २८ ॥

प्राणायामादिसामर्थ्यादैश्वर्याच्चोपभोगतः ।
प्राणोच्छित्तौ मनोऽतन्त्रं न पुनः संप्रयुज्यते ॥ २९ ॥

इहेदमिति संबन्धः समवायोऽस्ति भाववत् ।
संज्ञालक्षणतत्त्वार्थो नानैव तु जगद्विधेः ॥ ३० ॥

नातिप्रसङ्गो घटवत्संशयानुपपत्तितः ।
तमभेदेन संस्थानादेकतश्चेतराविधिः ॥ ३१ ॥

संशयप्रश्नसामान्यविशेषप्रविभागतः ।
स्वपरप्रत्यवस्थानवैशेषिकपथान्वयः ॥ ३२ ॥

## ॥ पञ्चदशी बौद्धसन्तानद्वात्रिंशिका ॥

नाहंकृतस्य निर्वाणं न सेत्स्यत्यनहंकृतः ।
न वा विद्या विवेकाय न विद्या भवगामिनी ॥ १ ॥

अन्योऽन्यविषमान् पश्यन् पुद्गलस्कन्धशून्यता ।
न जानाति शमैकार्था बुद्धानां धर्मदेशनाः ॥ २ ॥

संख्यादिभेदादन्यत्वं मवाच्चेन्योऽन्यसंकरः ।
स्कन्धपुद्गलयोर्यस्मात् स्कन्धमात्रागतः पुमान् ॥ ३ ॥

सेनावनवदेकान्तबुद्धेः प्रज्ञप्तिसौष्ठवात् ।
कीलवत्क्रियते मिथ्या मानकीला प्रवृत्तये ॥ ४ ॥

ममत्वाभिगमात्सत्त्वस्तच्च्युतो भ्रष्टराजवत् ।
भारहारादियोगास्तु व्याससंग्रहणाङ्गवत् ॥ ५ ॥

अवक्तव्यमसद्भावात्प्रश्नार्थस्य खपुष्पवत् ।
संतानं भावनार्थं वा सरित्प्रोतप्रदीपवत् ॥ ६ ॥

महाभूतोच्छ्रयो रूपं विज्ञानं विषयो नयः ।
देवनाट्यपृथग्भावो नृजात्यादिविकल्पवत् ॥ ७ ॥

विपर्यासात्मकं मोहसङ्गात्तृष्णा स्मृतेर्मनः ।
संकल्पश्चेतनाकर्म चेतयित्वोपचारतः ॥ ८ ॥

चक्षूरूपादिसंस्कारसमुत्थं सर्वजातिषु ।
विज्ञानमिव ज्ञातीनां नानात्वमिति जातितः ॥ ९ ॥

चित्तवद्रूपकार्यस्य वैलक्षण्यं क्षणे क्षणे ।
तद्धयजात्यन्तरं तुल्यं न बाध्यत्युपपत्तितः ॥ १० ॥

सत्त्वोपचारौ व्युच्छिन्नौ स्कन्धानां पञ्चकल्पवत् ।
शून्यता वा प्रतिष्ठत्वादेतदेव प्रपञ्चितम् ॥ ११ ॥

स्कन्धप्रकारं पश्यन्तो जगत्पुष्पोपकारवत् ।
किमस्तीत्युपगच्छेयुः किमेव तु ममेति वा ॥ १२ ॥

बाह्यमायतनं नात्मा यथा नेत्रादयस्तथा ।
तद्विकल्पगतिश्चित्तमनः कस्यात्र किं यथा ॥ १३ ॥

हेतुप्रत्ययवैचित्र्यात्तानेवमिति भक्तयः ।
कथं हि संप्रधार्येत भावो भावविशेषतः ॥ १४ ॥

संमोहात्स्मरणात्तत्त्वकलाभावान्न कर्मणः ।
क्षणिकत्वादिशुद्धेश्च निर्वाणाच्च प्रदीपवत् ॥ १५ ॥

निर्वाणं सर्वधर्माणामविकल्पं क्षणे क्षणे ।
हेतुप्रत्ययभेदात्तु तदन्त इव लक्ष्यते ॥ १६ ॥

संसारे सति निर्वाणं क्षणिकस्य गतिः कुतः ।
जन्मवत्तेन वि(चि)त्तस्य निर्वाणमपि संस्कृतम् ॥ १७ ॥

यत्संस्कृतमनित्यं तद्भङ्गादन्योऽन्यसंस्कृतम् ।
निर्वाणमनसामस्मादुक्तिर्विप्रतिषेधनात् ॥ १८ ॥

धर्मवद्विषयेऽन्योऽपि यदा विज्ञानसंभवः ।
सत्कारेभ्यस्तदा जन्म किं तस्य कुरुते क्षमा ॥ १९ ॥

न पूर्वा न परा कोटी विद्यते वाक्फलं मतेः ।
पूर्वविप्रतिषेधस्तु हेतुप्रत्ययसंभवात् ॥ २० ॥

अहेतुप्रत्ययनयं पूर्वापरसमाभवम् ।
विज्ञानं तत्समुत्थं कः संव्यवस्येद्विचक्षणः ॥ २१ ॥

दर्पणस्थमिव प्रज्ञामुखबिम्बमतन्मयम् ।
तत्समुत्थं च मन्यन्ते तद्वत्प्रत्ययजन्मनः ॥ २२ ॥

न सामग्रीस्वभावोऽयमतो नाज्ञानभेदतः ।
स्वप्नोपलब्धस्मरणं निवृत्तिश्च न नेत्यपि ॥ २३ ॥

न चानिष्टप्रयोगो नः कुशलप्रतिपत्तिवत् ।
मन्यमानो हि दोषं वा गुणं वा परिकल्पयेत् ॥ २४ ॥

पटहध्वनिवल्लोकः कल्पनामनुवर्तते ।
यतः स्वभावो भावो वा तस्य वक्तुं न युज्यते ॥ २५ ॥

न चोपदेशवैफल्यं रूपं विज्ञानजन्मवत् ।
दुःखमुत्पद्यते तस्य स्वार्थहानमयुक्तिवत् ॥ २६ ॥

न चास्यागन्तुसंक्लेशः शुद्धिर्वा भक्तयस्त्विमाः ।
स्मृतिसङ्गसमः किं तु तेजस्यरणिवृत्तिवत् ॥ २७ ॥

वि(चि)त्तचारवशात्सङ्गः स्मृतिवन्न विरुध्यते ।
संस्कारायतनापेक्षं निरोधाप्त्यनन्तरम् ॥ २८ ॥

अङ्कुरव्यक्तिनिष्पत्तिश्चेतः सत्त्वस्य तत्कथम् ।
अविद्यातृष्णयोर्यद्वन्न नामत्वं न चैकता ॥ २९ ॥

समविज्ञानयोस्तद्वद्द्वेद्येकान्तमतः शिवम् ।
श्रोतःप्राप्त्यादिरस्यास्तु विकल्पोऽरणिवह्निवत् ॥ ३० ॥

एकचित्तेऽपि वा कृत्स्नदुःखज्ञानोपपत्तितः ।
ग्राममोहक्षमोदर्कः शासनप्रणयो मुनेः ॥ ३१ ॥

## ॥ षोडशी नियतिद्वात्रिंशिका ॥

नित्यानन्तरमव्यक्तिसुखदुःखाभिजातयः ।
स्वभावः सर्वसत्त्वानां पयःक्षीराङ्कुरादिवत् ॥ १ ॥

धर्माधर्मात्मकत्वे तु शरीरेन्द्रियसंविदाम् ।
कथं पुरुषकारः स्यादिदमेवेति नेति वा ॥ २ ॥

शरीरेन्द्रियनिष्पत्तौ यो नाम स्वयमप्रभुः ।
तस्य कः कर्तृवादोऽस्तु तदायत्तासु वृत्तिषु ॥ ३ ॥

धर्माधर्मौ तदान्योऽन्यनिरोधातिशयक्रियौ ।
देशाद्यपेक्षौ च तयोः कथं कः कर्तृसंभवः ॥ ४ ॥

यत्प्रवृत्त्योपमर्देन वृत्तं सदसदात्मकम् ।
तद्वेतरनिमित्तं वेत्युभयं पक्षघातकम् ॥ ५ ॥

न दृष्टान्ता कृताशक्तेः स्वातन्त्र्यं प्रतिषिध्यते ।
अनिमित्तं निमित्तानि निमित्तानीत्यवारीतम् ॥ ६ ॥

विश्वप्रायं पृथिव्यादि परिणामोऽप्रयत्नतः ।
विषयस्तत्प्रबोधस्ते तुल्ये यस्येति मन्यते ॥ ७ ॥

नोक्ताभ्यां सह नारम्भात् सममध्यक्षसंपदि ।
विनाशानुपपत्तेश्च भोज्यभक्ष्यविकल्पतः ॥ ८ ॥

पृथिव्या नावरुध्येत यथा वा राजतक्रियाः ।
गुणानां पुरुषे तद्वदहं कर्तेत्यदःकृते ॥ ९ ॥

सुदूरमपि ते गत्वा हेतुवादो निवर्त्स्यति ।
न हि स्वभावानध्यक्षो लोकधर्मोऽस्ति कश्चन । १० ॥

प्रवर्तितव्यमेवेति प्रवर्तन्ते यदा गुणाः ।
अथ किं संप्रमुग्धोऽसि ज्ञानवैराग्यसिद्धिषु । ११ ॥

धर्मादष्टाङ्गता बुद्धेर्न विरोधकृते च यैः ।
वक्तुराद्यनिमित्तत्वाद्वितथप्रत्ययादपि ॥ १२ ॥

असतो हेतुतो वेति प्रतिसन्धौ च विग्रहः ।
असंस्तु हेतुर्धीमात्रं कर्तेति च विशिष्यते ॥ १३ ॥

भङ्गुरश्रवणाद्यर्थसंविन्मात्रे निरात्मके ।
रागादिशान्तौ यत्नस्ते कथं कस्य किमित्ययम् ॥ १४ ॥

कर्मजः प्रत्ययो नाम कर्म च प्रत्ययात्मकम् ।
तत्फलं निरयाद्यश्च न च सर्वत्र विस्मृतः ॥ १५ ॥

ज्ञानमव्यभिचारं चेज्जिनानां मा श्रमं कृथाः ।
अथ तत्राप्यनेकान्तो जिनाः स्मः किं तु को भवान् ॥ १६ ॥

एकेन्द्रियाणामव्यक्तेरजात्यन्तरसंगतौ ।
व्यक्तानां च तदादौ का रागादिप्रविभक्तयः ॥ १७ ॥

न संसरत्यतः कश्चित् स्वपरोभयहेतुकम् ।
अभिजातिविशेषात्तु मिथ्यावादमुखो जनः ॥ १८ ॥

चैतन्यमपि नः सत्त्वो मोहादिज्ञानलक्षणः ।
तदादि तद्वत्संकल्पो मिथ्याराशिः प्रवर्तते ॥ १९ ॥

तुल्यप्रसङ्गो नानात्वे तुल्येनैकेन बाध्यते ।
अकस्मात्कारणावेशौ हेतुधर्माविशेषतः ॥ २० ॥

स्पर्शनादिमनोऽन्तानि भूतसामान्यजातिमान् ।
मनोहन्नियतं द्रव्यं परिणाम्यनुमूर्ति च ॥ २१ ॥

स्पर्शैकविषयत्वादिस्तत्त्वान्ताः क्रमजातयः ।
अरूपादनभिव्यक्तभेदाः कृष्णाभिजातयः ॥ २२ ॥

यथा दुःखादिनिरयस्तिर्यक्षु पुरुषोत्तमाः ।
रक्तायामजनायां तु सुखजा न गुणोत्तराः ॥ २३ ॥

हिंसाविद्याभिचारार्थः पूर्वान्ते मध्यमः शमः ।
सम्यग्दर्शनभावान्ताः प्रतिबुद्धस्त्वयोजितः ॥ २४ ॥

न चोपदेशो बुद्धेः स्याद्रविपङ्कजयोगवत् ।
तत्त्वं च प्रतिबुध्यन्ते तेभ्यः प्रत्यभिजातयः ॥ २५ ॥

समानाभिजनेष्वेव गुरुगौरवमानिनः ।
स्वभावमधिगच्छन्ति न ह्यग्निः सममिध्यति ॥ २६ ॥

प्रवृत्त्यन्तरिकाव्याजविभङ्गस्वप्नसंभवात् ।
न जात्यः संस्मृतेरुक्तं संकरोन्तरिकान्तजाः ॥ २७ ॥

सुरादिक्रम एकेषां मानसा ह्युत्क्रमक्रमात् ।
सुखदुःखविकल्पाच्च खण्डिर्या नोऽभिजातयः ॥ २८ ॥

व्योमावकाशो नान्येषां कालो द्रव्यं क्रिया विधिः ।
सुखदुःखरजो धातुर्जीवाजीवनभांसि च ॥ २९ ॥

अनुमानं मनोवृत्तिरन्वयनिश्चयात्मिका ।
त्रैकाल्याङ्गादिवृत्तान्ता हेतुरव्यभिचारतः ॥ ३० ॥

संज्ञासामान्यपर्यायशब्दद्रव्यगुणक्रियाः ।
एतेनोक्ताः पृथक् चेति व्यवहारविनिश्चयः ॥ ३१ ॥

न नाम तत्त्वमेवैतन्मिथ्यात्वापरबुद्धयः ।
न चार्थप्रतिषेधेन न सिद्धार्थश्च कथ्यते ॥ ३२ ॥

## ॥ सप्तदशी द्वात्रिंशिका ॥

न दुःखेन विरुध्येते धर्माधर्मौ सुखेन वा ।
प्रत्ययाव्यभिचारित्वात्स्वपरोभयवृत्तिषु ॥ १ ॥

देशकालनिमित्तानि निमित्तान्यनियोगतः ।
नियोगतो वा तत्सिद्धौ न वाध्यात्मविशेषतः ॥ २ ॥

सुव्रतानि यमं वृत्तं यथाध्यात्मविनिश्चयम् ।
दीक्षाचारस्तु शैक्षाणां वर्त्मस्थैर्यानुवृत्तये ॥ ३ ॥

अपुण्यप्रतिषेधो वा व्रतं पुण्यागमोऽपि वा ।
युगपत्क्रमशो वेति विपक्षोरुभयं भयम् ॥ ४ ॥

व्रताभ्युपगमः शुद्धः परिणामो न नेष्यते ।
तदानन्तर्यवृत्तिस्तु मिथ्यादृष्टिर्निवार्यते ॥ ५ ॥

न मिथ्यादर्शनात् पापं न सम्यग्दर्शनाच्छुभम् ।
न च नेति कषायाणां तद्वृत्त्यव्यतिरेकतः ॥ ६ ॥

क्षयवृद्धिः कषायाणां मिथ्यादृष्टिरसंक्रमात् ।
वैषम्यलक्षणो बन्धस्तदाद्यस्तु विकल्पतः ॥ ७ ॥

मिथ्यादृष्टेरभिन्नायाः पञ्च चैकक्षणाश्रवे ।
कायिकादिक्रियाचारः पापमेवेत्यसंशयम् ॥ ८ ॥

नान्योऽन्यमनुवर्तेत कृताभ्युपगमेतरौ ।
तुल्यदोषगुणस्थानौ न कषाय्यक्रमोऽप्यतः ॥ ९ ॥

कषायचिह्नं हिंसादि प्रतिषेधस्तदाश्रयः ।
अपायोद्वेजनो बालो भीरूणामुपदिश्यते ॥ १० ॥

हिंसादिवत्कषायेभ्यो न जन्ममरणापदः ।
निमित्तान्तरहेतुत्वाद्गुणतस्तूपचर्यते ॥ ११ ॥

कल्पाकल्पमतो द्रव्यमचिन्त्यं सर्पिरादिवत् ।
दोषप्रचयवैषम्यादातुरस्तु परीक्ष्यते ॥ १२ ॥

एकमूर्तिः परीणामः शुद्धिराचारलक्षणम् ।
गुणप्रत्येकवृत्तानां पुरुषाशयशक्तितः ॥ १३ ॥

क्रोधजिह्मपरिष्वङ्गमानवेदाम्बुमक्षयाः ।
युगपद्वा तमो विद्याद्यावद्यत्रानुषिध्यते ॥ १४ ॥

क्षयो नाप्रशमस्यास्ति संयमस्तदुपक्रमः ।
दोषैरेव तु दोषाणां निवृत्तिर्मारुतादिवत् ॥ १५ ॥

दोषेभ्यः प्रव्रजन्त्यार्या गृहादिभ्यः पृथग्जनाः ।
परानुग्रहनिम्नास्तु सन्तस्तदनुवृत्तयः ॥ १६ ॥

तुल्यातुल्यफलं कर्म निमित्ताश्रवयोगतः ।
यतः स हेतुरन्वेष्यो दृष्टार्थो हि न तप्यते ॥ १७ ॥

मनसोऽपैति विषयान् मनसैवातिवर्तते ।
किमेवं बहुरल्पं वा शरीरे बहिरेव का ॥ १८ ॥

न ममत्वादहंकारस्तस्मात्तु ममता मता ।
संकल्पाव्यभिचारित्वात्तस्मिन्नेवाशिवास्पदम् ॥ १९ ॥

नाहमस्मीत्यभावो वा भावो वाभ्युपगम्यते ।
प्रपञ्चोपरमः शान्तिरव्युच्छित्तेरशून्यता ॥ २० ॥

द्वेषोद्वेगफलं दुःखं सङ्गस्वादुफलं सुखम् ।
माध्यस्थ्यं तत्प्रतीकारः किं तु दुःखेन यत्सुखम् ॥ २१ ॥

न दुःखकारणं कर्म तदभावाय वोद्यमः ।
दृश्यते व्यभिचारश्चाप्यहो मोहविभूतयः ॥ २२ ॥

पुण्यं सुखात्मकं जन्म तद्विशेषो विशिष्यते ।
कृतार्थेनापि चोपेयमवश्यं नार्तिहेतवः ॥ २३ ॥

प्रीत्यर्था विषया जातिःसात्मकं कल्पशोभना ।
तेषामर्थवशात् साम्यमिति धर्मोऽप्यधर्मवत् ॥ २४ ॥

पुण्यमेव निबध्नन्ति स्वा(श्वा)दयोऽप्यविशेषतः ।
आहारादिषु तद्वृत्तेरभिज्ञस्तु विशेष्यते ॥ २५ ॥

प्रतिमाभिग्रहास्तीव्राः परिज्ञानविरोधिनः ।
प्रपञ्चाचारवादस्तु मिथ्यामानादिवृत्तयः ॥ २६ ॥

यथागदपरिज्ञानं नालमामयशान्तये ।
अचारित्रं तथा ज्ञानं न बुद्ध्यध्यवसायतः ॥ २७ ॥

अरण्युष्माग्निविज्ञानं वैराग्यमुपजायते ।
तदभ्यासफलो योगो न पापाय न संवरः ॥ २८ ॥

कर्माश्रवविपाकार्थं वर्ण्यन्ते जीवजातयः ।
तुल्यं ह्यधिगतार्थस्य जीवाजीवप्रयोजनम् ॥ २९ ॥

निदानाभ्याससाफल्यं जन्मान्तरगतस्य चेत् ।
ज्ञानैश्वर्यसुखाभ्यासे निदानेभ्यस्तपःश्रमः ॥ ३० ॥

न धर्मार्थौ विशिष्येते कर्त्रापायोपभोगतः ।
धर्मस्तु ज्ञानहेतुत्वाद्विशिष्टेषु विशिष्यते ॥ ३१ ॥

विषयेन्द्रियबुद्धीनां मनश्चोपक्रमः क्रमः ।
तमोमूलाभिघाताद्धि निर्विकल्पशिवं शिवम् ॥ ३२ ॥

## ॥ अष्टादशी द्वात्रिंशिका ॥

देशकालान्वयाचारवयःप्रकृतिमात्मनाम् ।
सत्त्वसंवेगविज्ञानविशेषाच्चानुशासनम् ॥ १ ॥

बाह्याध्यात्मशुचिः सौम्यस्तेजस्वी करुणात्मकः ।
स्वपरान्वर्थविद्वाग्मी जिताध्यात्मश्च शासिता ॥ २ ॥

तुल्यप्रकोपोपशमा रागाद्या मारुतादिव ।
विषयेन्द्रियसामान्यात् सर्वार्थमिति शासनम् ॥ ३ ॥

हीनानां मोहभूयस्त्वाद् बाहुल्याच्च विरोधिनाम् ।
विशिष्टानुप्रवृत्तेश्च कल्याणाभिजनो मतः ॥ ४ ॥

उत्पन्नोत्पाद्यसंदेहा ग्रन्थार्थोभयशक्तयः ।
भावनाप्रतिपत्तिभ्यामनेकाः शैक्षभक्तयः ॥ ५ ॥

कर्तृप्रयोजनापेक्षस्तदाचारस्त्वनेकधा ।
चिकित्सितवदेकार्थप्रतिलोमानुलोमतः ॥ ६ ॥

शरीरमनसोस्तुल्या प्रवृत्तिर्गुणदोषयोः ।
तस्मात्तदुभयोपायान्निमित्तज्ञो विशिष्यते ॥ ७ ॥

भेषजोपनयश्चित्रो यथामयविशेषतः ।
छन्नप्रकाशोपहितः सुविधिज्ञानयन्त्रयोः ॥ ८ ॥

वपुर्यन्त्रजिता दोषाः पुनरभ्यासहेतवः ।
प्रसंख्याननिवृत्तास्तु निरन्वयसमाधयः ॥ ९ ॥

यथा निर्दिश्य संयोगाद्वाताद्यारोगभक्तिषु ।
तथा जन्मसु रागाद्या भावनादरमात्रयोः ॥ १० ॥

यात्रामात्रास(श)नोऽभीक्ष्णं परिशुद्धनिभाशयः ।
विविक्तनियताचारः स्मृतिदोषैर्न बाध्यते ॥ ११ ॥

आदेशस्मरणाक्षेपप्रायश्चित्तानुपक्रमाः ।
यथारसं प्रयोक्तव्याः सिद्ध्यसिद्धिगतागतैः ॥ १२ ॥

परप्रशंसास्वक्षेपो विपरीतमुपेक्षितः ।
उत्कर्षापकर्षौ चैता विनयोऽन्नयजातयः ॥ १३ ॥

स्वास्थ्यात्पदत्रयावृत्त्ययोनयः स्थानवर्त्मनः ।
शैक्षदुर्बलगीतार्थगुरूणामर्थसिद्धये ॥ १४ ॥

आसेवनपरीहारपरिसंख्यानशान्तयः ।
परीषहा वपुर्बुद्धिनिमित्तासमकल्पकाः ॥ १५ ॥

असूयाक्षेपकौत्कुच्यपरीहासमिथःकथाः ।
स्वैरस्वापासनाहारचर्याः पश्यन्निवारयेत् ॥ १६ ॥

विनीतैर्भावविज्ञाननानारसकथासुखैः ।
विश्रंसनमनिर्दिष्टमनर्थं साध्यसाधयोः ॥ १७ ॥

उत्क्षेपासङ्गविक्षेपा: शब्दादित्यागभोगयो: ।
तयोरनियम: श्रेयान् पुरुषाशयशक्तित: ॥ १८ ॥

प्रागेव साधनन्यास: कष्टं कृतमतेरपि ।
कृच्छ्रोपार्जनभिन्नं हि कार्पण्यं भजते जन: ॥ १९ ॥

पिपासाविषयोत्सेधो मृदूत्तानरयावरम् ।
न संमिथ्यादिगंभीरं चपलायति यादसात् ॥ २० ॥

अज्ञातकरणं जन्म वपु:संवित्प्रकारयो: ।
त्वत्प्रसादार्जनोपायो विषयेन्द्रियसंवर: ॥ २१ ॥

यद्यज्ञानक्रिये स्यातां स्याद् ज्ञानसमयो: शिव: ।
न हि मानादिवृत्तित्वात्पृथक्संवित्क्रमकथा: ॥ २२ ॥

ममेदमहमस्येति समानं मानलोभयो: ।
चतुष्टं युगपद्वेति यथा जन्मविशेषत: ॥ २३ ॥

ममेदमिति रक्तस्य न नेत्युपरतस्य च ।
भाविकौ ग्रहणत्यागौ बहुसाराल्पफल्गुषु ॥ २४ ॥

अभिषिक्तस्य संन्यासक्रमात्पाश्चात्यदर्शनम् ।
शून्यैकविकृताभ्यासो रागिणां तु यथाश्रयम् ॥ २५ ॥

अनाघातास्पदं द्विष्टमनुकूलै: प्रसादयेत् ।
निमित्तफलदारुण्यविवेकेर्भ्यश्च रक्षयेत् ॥ २६ ॥

सुखदु:खरसैर्भेद्यं व्यक्तोपनतकारणै: ।
प्रसादयेदुपाख्यानै: स्वैरासनमुखागतै: ॥ २७ ॥

अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् ।
दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥ २८ ॥

यदनासेवितं यस्य सेवितं वा स साधयेत् ।
तच्छेषानुपरोधेन प्रतिरूपार्पितं तप: ॥ २९ ॥

यदुत्सृष्टमयत्नेन पुनरेप्यं प्रयत्नतः ।
तत्साधनं वा तादृक्षं न हि सोपधयो बुधाः ॥ ३० ॥

नातिकृच्छ्रतपःसक्ता मनच्छ(श्छा)गवदुत्सृजेत् ।
कुशीलान् वा विदग्धांश्च तीर्थं तच्छेषपालनम् ॥ ३१ ॥

यावदुद्वेजते दुःखान्निर्वाणं चाभिमन्यते ।
तावन्मोहसुखारूढाः स्वयं यास्यन्त्यतःपरम् ॥ ३२ ॥

## ॥ एकोनविंशतितमी निश्चयद्वात्रिंशिका ॥

ज्ञानदर्शनचारित्राण्युपायाः शिवहेतवः ।
अन्योऽन्यप्रतिपक्षत्वाच्छुद्धावगमशक्तयः ॥ १ ॥

ज्ञानं देहादिविषयं व्यक्तिमात्रमविग्रहः ।
मनसः संशयापायस्मृतिदर्शनशक्तयः ॥ २ ॥

सर्वार्थानन्तरचरं नियतं चक्षुरादिवत् ।
त्रिकालविषयं रेतो वर्तमानार्थमिन्द्रियम् ॥ ३ ॥

यदेव चक्षुषो रूपं तदेवान्याश्रयान्तरम् ।
तस्मादविषयो रूपाद्यभिधानानपाश्रये ॥ ४ ॥

अस्त्याद्यासंग्रहव्यासनिमित्तास्तदुपक्रमाः ।
तदात्वोपनिधानाभ्यां रूपाद्यप्युपचर्यते ॥ ५ ॥

नानेकमेकोपचारमेकं नानेति वा न वा ।
यथा बहिस्तथाध्यात्ममन्योऽन्यप्रभवं हृदः (ह्यदः) ॥ ६ ॥

निष्पत्तिरुदयाच्छक्तिस्तद्विघातिसमक्षयात् ।
अनावरणहेतोर्वा शक्तिरभ्युदयात्मिका ॥ ७ ॥

चक्षुर्दर्शनविज्ञानं परमाण्वौक्ष्ण्यमोक्षवत् ।
तदावरणमित्येकं न वा कार्यविशेषतः ॥ ८ ॥

अर्थव्यञ्जनयोरेवमर्थस्तु स्मृतिचक्षुषोः ।
सर्वोपयोगद्वैविध्यमनेनोक्तमनक्षरम् ॥ ९ ॥

प्रकाशमनसोश्चक्षुस्तुल्यमाप्तगतार्थवत् ।
विकृष्टेतरयोर्व्यक्तिर्गम्यते चार्थशक्तितः ॥ १० ॥

परस्परस्पृष्टगतिर्भावनापचया ध्वनिः ।
बद्धस्पृष्टगमद्व्यादिस्नेहरौक्ष्यातिशायनात् ॥ ११ ॥

वैयर्थ्यातिप्रसङ्गाभ्यां न मत्यभ्यधिकं श्रुतम् ।
सर्वेभ्यः केवलं चक्षुस्तमःक्रमविवेकवत् ॥ १२ ॥

नश्यन्ति विषयाख्याते योक्तव्या दोषता न चेत् ।
त्रितयानियतादेकसामान्याद्वा बहुष्वपि ॥ १३ ॥

दोषपङ्क्तिर्मतिज्ञानान्न किञ्चिदपि केवलात् ।
तमःप्रवया निःशेषविशुद्धिः फलमेव तत् ॥ १४ ॥

समग्रविषयं ज्ञानमवश्यं यस्य कस्यचित् ।
तस्य वृत्त्यन्तरापत्तेर्नान्यदावरणं क्षयात् ॥ १५ ॥

वृक्षाद्यालोकवत्कृत्स्नं स्तोकाख्यानमनेकधा ।
अत्यन्तानुपलब्धिर्वा विशिष्टे ज्ञानदर्शने ॥ १६ ॥

प्रार्थनाप्रतिघाताभ्यां वेद्यन्ते(वेष्ट्यते)द्वीन्द्रियादयः ।
मनःपर्यायविज्ञानं युक्तं तेषु म वान्यथा ॥ १७ ॥

निमित्तमन्तरायत्तं चतुष्कमपरं फलम् ।
मनुष्यतिर्यग्भवयोः कर्मायुष्कपुरःसरम् ॥ १८ ॥

निश्चितं मोहवेद्ये वा प्रसङ्गानुपपत्तितः ।
एकं नैकानुभावं वा बीजाद्यर्थप्रकारवत् ॥ १९ ॥

परिणामफलं कर्म परिणामस्तदात्मकः ।
तयोरन्योऽन्यसादृश्यं युक्तं नानेकधर्मतः ॥ २० ॥

आयुः कालफलं सौम्यः परिणामान्न विद्यते ।
गत्याद्यर्थपृथग्नाम मूलोत्तरनिबन्धवत् ॥ २१ ॥

स्थित्यन्तमन्यवैफल्याद्यथार्थप्रतिबोधकम् ।
तदौदारिकदेहाभ्यामन्यच्चातिप्रसङ्गतः ॥ २२ ॥

निर्ग्रन्थसंयतारागान्यनुबन्धस्थितिक्रमात् ।
द्विविधा एव सामर्थ्यादनन्ता वापि सिद्धवत् ॥ २३ ॥

प्रयोगविश्रसाकर्मतदभावस्थितिस्तथा ।
लोकानुभाववृत्तान्तः किं धर्माधर्मयोः फलम् ॥ २४ ॥

आकाशमवगाहाय तदनन्या दिगन्यथा ।
तावप्येवमनुच्छेदात्ताभ्यां वान्यमुदाहृतम् ॥ २५ ॥

प्रकाशवदनिष्टं स्यात्साध्ये नार्थस्तु नः श्रमः ।
जीवपुद्गलयोरेव परिशुद्धः परिग्रहः ॥ २६ ॥

इन्द्रियाण्यात्मलिङ्गानि त्वगादिनियमः पुनः ।
निकामविषया व्याला जिनाश्चैवमतीन्द्रियाः ॥ २७ ॥

बुद्ध्यापोहृतमःसत्त्वं जातु गव्ये न युज्यते ।
तीव्रमोहानुबन्धस्तु स्यात्कश्चित्कस्यचित्क्वचित् ॥ २८ ॥

सत्त्वोच्छेदभयं तुल्यमनक्तेऽप्यपवर्गतः ।
न च जन्ममहादोषमानन्त्यात्तु न बध्यते ॥ २९ ॥

नेन्धनानन्त्यतो वह्निक्षीयते नावचीयते ।
तन्मात्रं वा तथान्योन्यगतयःस्कन्धपुद्गलाः ॥ ३० ॥

प्रतीत्य प्रतिसंख्याय द्रव्यव्यञ्जनपर्ययात् ।
समग्रविकलादेशनिषेधाभ्यां च साधयेत् ॥ ३१ ॥

## ॥ विंशतितमी दृष्टिप्रबोधद्वात्रिंशिका ॥

उत्पादविगमध्रौव्यद्रव्यपर्यायसंग्रहम् ।
कृत्स्नं श्रीवर्धमानस्य वर्धमानस्य शासनम् ॥ १ ॥

अपायापोहतोऽन्योऽन्यं हन्यतो वा तदेव वा ।
ग्रन्थार्थः स्वपरान्वर्थो विध्युपायविकल्पतः ॥ २ ॥

वाक्चिकित्सितमानाध्वमणिरागादिभक्तिवत् ।
नानात्वैक्योभयानुक्तिर्विषमं सममर्थतः ॥ ३ ॥

प्रमाणान्यनुवर्तन्ते विषये सर्ववादिनाम् ।
संज्ञाभिप्रायभेदात्तु विवदन्ति तपस्विनः ॥ ४ ॥

न यथार्थपरिज्ञानाद्दोषशान्तिर्न वान्यथा ।
प्रकोपसमसामान्याव्यभिचाराच्च तद्वताम् ॥ ५ ॥

येन दोषा निरुध्यन्ते ज्ञानेनाचरितेन वा ।
स सोऽभ्युपायस्तच्छान्तावनासक्तमवेद्यवत् ॥ ६ ॥

यथाप्रकारा यावन्तः संसारावेशहेतवः ।
तावन्तस्तद्विपर्यासा निर्वाणावाप्तिहेतवः ॥ ७ ॥

सामान्यं सर्वसत्त्वानामवश्यं जन्मकारणम् ।
शरीरेन्द्रियभोगानामविशिष्टं विशिष्यते ॥ ८ ॥

विकल्पप्रभवं जन्म सामान्यं नातिवर्तते ।
हेतावपचिते शेषं किं परिज्ञाय वा न वा ॥ ९ ॥

गुरुलाघवसंदिग्धविपरीताः प्रतिक्रियाः ।
लघ्वसंदिग्धविज्ञानं त्वास्य द्विष्टस्य सिध्यति ॥ १० ॥

द्रव्यसत्त्वादिनानात्वं नानेति सममात्मनः ।
विषयेन्द्रियचेतस्यमनेनाहमनीत वां ॥ ११ ॥

बौद्धमध्रुवमद्रव्यसांख्यं काणादमन्यथा ।
लोकः पुरुष इत्येतदवक्तव्यं शरीरवत् ॥ १२ ॥

निमित्तेश्वरकर्तारः प्रकाशनृपशिल्पिवत् ।
यथेष्टसाधनोत्कर्षविशेषापायवृत्तयः ॥ १३ ॥

स्वभावोऽर्थोऽन्तराभावा नियमा व्यभिचारतः।
इष्टतोऽन्यदनेनोक्ता देशकालसमाधयः ॥ १४ ॥

लक्ष्यलक्षणयोरेवं देशधर्मविकल्पतः ।
सदादिप्रतिभेदाच्च निह्नवप्रतियोजनाः ॥ १५ ॥

चैतन्यबुद्ध्योर्विच्छेदः परिणामेष्वसंश्रयात् ।
न विकल्पान्तरं भोक्तुरनेनोक्तं सुखादिवत् ॥ १६ ॥

शरीरविभुता तुल्यमानन्त्यगुणदोषतः ।
संसारप्राप्त्यभिव्यक्तिविकल्पाः कारणात्मनः ॥ १७ ॥

गुणप्रचयसंस्कारवृत्तयः कर्मवृत्तयः ।
अनाद्यनन्तरावश्ययथाचेतरयोगतः ॥ १८ ॥

भूतप्रत्येकसंयोगसामान्यार्थान्तरात्मकम् ।
पञ्चधा बहुधा वापि कार्यादेकादिवेन्द्रियम् ॥ १९ ॥

जातिप्रत्ययसामान्यचरस्थिरचरन्मनः ।
उभयं विभवा देहलोकयोरनुगामि च ॥ २० ॥

रूपादिमात्रं द्रव्यं च पिण्ड एक विकल्पवान् ।
समस्तव्यस्तवृत्तिभ्यामर्थपरिणतेरपि ॥ २१ ॥

सदसत्सदसन्नेति कार्यकारणसंभवः ।
अनित्यनित्यशून्यत्वे शेषमित्युपपादितम् ॥ २२ ॥

अवस्थितं जगत्सत्त्वाद्धात्वसत्प्रक्रियात्मकम् ।
धर्माधर्मस्वभावेष्टिपुरुषार्थनिमित्ततः ॥ २३ ॥

समग्रविकलादेशत्यागाभिप्रायतत्कथा ।
सामान्याव्यासतः शैक्ष्यविपक्षाचार्यशक्तितः ॥ २४ ॥

द्वीपवेलोदधिव्याससंख्याभोगविभूतयः ।
स्वर्गापायानुभागाश्च सनिमित्ता यथेष्टतः ॥ २५ ॥

ज्ञानाचारविशेषाभ्यामाचाराद्ध्रियते जनः ।
स नात्युत्तानगम्भीरः सुखदुःखात्ययो हितः ॥ २६ ॥

दृष्टान्तश्चविकैर्लोकः परिपक्तिशुभाशुभैः ।
सुखार्थसंशयप्राप्तिप्रतिषेधमहाफलैः ॥ २७ ॥

ज्ञानात्कृत्स्नेष्टधर्मात्मपरमेश्वरतः शिवम् ।
कर्मोपयोगवैराग्यं धामप्राप्तिश्च योगतः ॥ २८ ॥

पृथक् सहाविनिर्भागैर्दयावैराग्यसंविदाम् ।
ऐश्वर्यमोक्षोपशमसमावेशविकल्पतः ॥ २९ ॥

आगमाभ्युदयज्ञानयोगाध्याहारधारणा ।
भावनाप्राणसंरोधकृच्छ्रयत्नव्रतानि च ॥ ३० ॥

दोषव्यक्तिप्रसंख्यानविषयातिशयात्ययैः ।
परमैश्वर्यसंयोगज्ञानैश्वर्यं विकल्पयेत् ॥ ३१ ॥

प्रसिद्धप्रातिभास्येति कामतस्तीर्थभक्तयः ।
ननु श्रीवर्धमानस्य वाचो युक्तः परस्परम् ॥ ३२ ॥

## ॥ एकविंशतितमी महावीरद्वात्रिंशिका ॥

सदा योगसात्म्यात्समुद्भूतसाम्यः प्रभोत्पादितप्राणिपुण्यप्रकाशः ।
त्रिलोकीशवन्द्यस्त्रिकालज्ञनेता स एकः परात्मा गतिर्मे जिनेन्द्रः॥ १ ॥

शिवोऽथादिसंख्योऽथ बुद्धः पुराणः पुमानप्यलक्ष्योऽप्यनेकोऽप्यथैकः।
प्रकृत्यात्मवृत्त्याप्युपाधिस्वभावः स एकः परात्मा गतिर्मे जिनेन्द्रः॥२॥

जुगुप्साभयाज्ञाननिद्राविरत्यङ्गभूहास्यशुग्द्वेषमिथ्यात्वरागैः ।
न यो रत्यरत्यन्तरायैः सिषेवे स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३ ॥

न यो बाह्यसत्त्वेन मैत्रीं प्रपन्नस्तमोभिर्न नो वा रजोभिः प्रणुन्नः ।
त्रिलोकीपरित्राणनिस्तन्द्रमुद्रः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ ४ ॥

हृषीकेश ! विष्णो ! जगन्नाथ ! जिष्णो ! मुकुन्दाच्युत ! श्रीपते ! विश्वरूप ! ।
अनन्तेति संबोधितो यो निराशैः स एकः परात्मा गतिर्मे जिनेन्द्रः॥५॥

पुरानङ्गकालारिराकाशकेशः कपाली महेशो महाव्रत्युमेशः ।
मतो योऽष्टमूर्तिः शिवो भूतनाथः स एकः परात्मा गतिर्मे जिनेन्द्रः ६

विधिब्रह्मलोकेशशम्भुस्वयंभूचतुर्वक्त्रमुख्याभिधानां निधानम् ।
ध्रुवोऽथो य ऊचे जगत्सर्गहेतुः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ ७ ॥

न शूलं न चापं न चक्रादि हस्ते न लास्यं न हास्यं न गीतादि यस्य ।
न नेत्रे न गात्रे न वक्त्रे विकारः स एकः परात्मा गतिर्मे जिनेन्द्रः॥८॥

न पक्षी न सिंहो वृषो नापि चापं न रोषप्रसादादिजन्मा विडम्बः ।
न निन्द्यैश्चरित्रैर्जने यस्य कम्पः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ ९ ॥

न गौरी न गङ्गा न लक्ष्मीर्यदीयं वपुर्वा शिरो वाप्युरो वा जगाहे ।
यमिच्छाविमुक्तं शिवश्रीस्तु भेजे स एकः परात्मा गतिर्मे जिनेन्द्रः १०

जगत्संभवस्थेमविध्वंसरूपैरलीकेन्द्रजालैर्न यो जीवलोकम् ।
महामोहकूपे निचिक्षेप नाथः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ ११ ॥

समुत्पत्तिविध्वंसनित्यस्वरूपा यदुत्था त्रिपद्येव लोके विधित्वम् ।
हरत्वं हरित्वं प्रपेदे स्वभावैः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ १२ ॥

त्रिकालत्रिलोकत्रिशक्तित्रिसन्ध्यत्रिवर्गत्रिदेवत्रिरत्नादिभावैः ।
यदुक्ता त्रिपद्येव विश्वानि वव्रे स एकः परात्मा गतिर्मे जिनेन्द्रः॥ १३ ॥

यदाज्ञा त्रिपद्येव मान्या ततोऽसौ तदस्त्येव नो वस्तु यन्नाधितष्ठौ ।
अतो ब्रूमहे विश्वमेतद्यदीयं स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ १४ ॥

न शब्दो न रूपं रसो नापि गन्धो न न स्पर्शलेशो न वर्णो न लिङ्गम् ।
न पूर्वापरत्वं न यस्यास्ति संज्ञा स एकः परात्मा गतिर्मे जिनेन्द्रः॥१५॥

छिदा नो भिदा नो न क्लेदो न खेदो न शोषो न दाहो न तापादिरापत् ।
न सौख्यं न दुःखं न यस्यास्ति वाञ्छा स एकः परात्मा गतिर्मे जिनेन्द्रः

न योगा न रोगा न चोद्वेगवेगाः स्थितिर्नो गतिर्नो न मृत्युर्न जन्म ।
न पुण्यं न पापं न यस्यास्ति बन्धः स एकः परात्मा गतिर्मे जिनेन्द्रः

तपः संयमः सुनृतं ब्रह्म शौचं मृदुत्वार्जवाकिंचनत्वानि मुक्तिः ।
क्षमैवं यदुक्तो जयत्येव धर्मः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ १८ ॥

अहो विष्टपाधारभूता धरित्री निरालम्बनाधारमुक्ता यदास्ते ।
अचिन्त्यैव यद्धर्मशक्तिः परा सा स एकः परात्मा गतिर्मे जिनेन्द्रः १९

न चाम्भोधिराप्लावयेद् भूतधात्रीं समाश्वासयत्येव कालेऽम्बुवाहः ।
यदुद्भूतसद्धर्मसाम्राज्यवश्यः स एकः परात्मा गतिर्मे जिनेन्द्रः॥ २० ॥

न तिर्यग्ज्वलत्येव यज्जालजिह्वो यदूर्ध्वं न वाति प्रचण्डो नभस्वान् ।
स जागर्ति यद्धर्मराजप्रतापः स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २१ ॥

इमौ पुष्पदन्तौ जगत्यत्र विश्वोपकाराय दिष्ट्योदयेते वहन्तौ ।
उरीकृत्य यत्तुर्यलोकोत्तमाज्ञां स एकः परात्मा गतिर्मे जिनेन्द्रः॥ २२ ॥

अवत्येव पातालजम्बालपाताद्बिधत्तेऽपि सर्वज्ञलक्ष्मीनिवासात् ।
यदाज्ञाविधित्साश्रितानङ्गभाज्जः स एकः परात्मा गतिर्मे जिनेन्द्रः॥२३॥

सुपर्वद्रुचिन्तामणिकामधेनुप्रभावा नृणां नैव दूरे भवन्ति ।
चतुर्थे यदुत्थे शिवे भक्तिभाजां स एकः परात्मा गतिर्मे जिनेन्द्रः २४

कलिव्यालवह्निग्रहव्याधिचौरव्यथावारणव्याघ्रवैर्यादिविघ्नाः ।
यदाज्ञाजुषां युग्मिनां जातु न स्युः स एकः परात्मा गतिर्मे जिनेन्द्रः २५

अबद्धस्तथैकः स्थिरो वा क्षयी वाप्यसद्वा मतो यैर्जडैः सर्वथात्मा ।
न तेषां विमूढात्मनां गोचरो यः स एकः परात्मा गतिर्मे जिनेन्द्रः २६

न वा दुःखगर्भे न वा मोहगर्भे स्थिता ज्ञानगर्भे तु वैराग्यतत्त्वे ।
यदाज्ञानिलीना ययुर्जन्मपारं स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ २७ ॥

विहायाश्रवं संवरं संश्रयैवं यदाज्ञा पराभाजि यैर्निर्विशेषैः ।
स्वकस्तैरकार्येव मोक्षो भवो वा स एकः परात्मा गतिर्मे जिनेन्द्रः २८

शुभध्याननीरैरुरीकृत्य शौचं सदाचारदिव्यांशुकैर्भूषिताङ्गाः ।
बुधाः केचिदर्हन्ति यं देहगेहे स एकः परात्मा गतिर्मे जिनेन्द्रः॥ २९ ॥

दयासुनृतास्तेयनिःसङ्गमुद्रातपोज्ञानशीलैर्गुरूपास्तिमुख्यैः ।
सुमैरष्टभिर्योऽर्च्यते धाम्नि धन्यैः स एकः परात्मा गतिर्मे जिनेन्द्रः ३०

महार्चिर्धनेशो महाज्ञो महेन्द्रो महाशान्तिभर्ता महासिद्धसेनः ।
महाज्ञानवान् पावनीमूर्तिरर्हन् स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३१

महाब्रह्मयोनिर्महासत्त्वमूर्तिर्महाहंसराजो महादेवदेवः ।
महामोहजेता महावीरनेता स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ ३२ ॥

इत्थं ये परमात्मरूपमनिशं श्रीवर्धमानं जिनं
वन्दन्ते परमार्हतास्त्रिभुवने शान्तं परं दैवतम् ।
तेषां सप्त भियः क्व सन्ति दलितं दुःखं चतुर्धापि तै
र्मुक्तैर्यत्सुगुणानुपेत्य वृणते ताश्चक्रिशक्रश्रियः ॥ ३३ ॥

श्रीमत्समन्तभद्राचार्यविरचितम्

# ॥ युक्त्यनुशासनम् ॥

कीर्त्या महत्या भुवि वर्द्धमानं त्वां वर्द्धमानं स्तुति-गोचरत्वम् ।
निनीषवः स्मो वयमद्य वीरं विशीर्ण-दोषाऽऽशय-पाश-बन्धम् ॥१॥

याथात्म्यमुल्लङ्घ्य गुणोदयाऽऽख्या लोके स्तुतिर्भूरि-गुणोदधेस्ते ।
अणिष्ठमप्यंशमशक्नुवन्तो वक्तुं जिन ! त्वां किमिव स्तुयाम ॥ २ ॥

तथाऽपि वैयात्यमुपेत्य भक्त्या स्तोताऽस्मि ते शक्त्यनुरूपवाक्यः ।
इष्टे प्रमेयेऽपि यथास्वशक्ति किन्नोत्सहन्ते पुरुषाः क्रियाभिः ॥ ३ ॥

त्वं शुद्धि-शक्त्योरुदयस्य काष्ठां तुला-व्यतीतां जिन ! शान्तिरूपाम् ।
अवापिथ ब्रह्म-पथस्य नेता महानितीयत् प्रतिवक्तुमीशाः ॥ ४ ॥

कालः कलिर्वा कलुषाऽऽशयो वा श्रोतुः प्रवक्तुर्वचनाऽनयो वा ।
त्वच्छासनैकाधिपतित्व-लक्ष्मीप्रभुत्व-शक्तेरपवाद-हेतुः ॥ ५ ॥

दया-दम-त्याग-समाधि-निष्ठं नय-प्रमाण-प्रकृताऽऽञ्जसार्थम् ।
अधृष्यमन्यैरखिलैः प्रवादैर्जिन ! त्वदीयं मतमद्वितीयम् ॥ ६ ॥

अभेद-भेदात्मकमर्थतत्त्वं तव स्वतन्त्राऽन्यतरत्खपुष्पम् ।
अवृत्तिमत्त्वात्समवाय-वृत्तेः संसर्गहानेः सकलाऽर्थ-हानिः ॥ ७ ॥

भावेषु नित्येषु विकारहानेर्न कारक-व्यापृत-कार्य-युक्तिः ।
न बन्ध-भोगौ न च तद्विमोक्षः समन्तदोषं मतमन्यदीयम् ॥ ८ ॥

अहेतुकत्व-प्रथितः स्वभावस्तस्मिन् क्रिया-कारक-विभ्रमः स्यात् ।
आबाल-सिद्धेर्विविधार्थ-सिद्धिर्वादान्तरं किं तदसूयतां ते ॥ ९ ॥

येषामवक्तव्यमिहाऽऽत्म-तत्त्वं देहादनन्यत्व-पृथक्त्व-क्लृप्तेः ।
तेषां ज्ञ-तत्त्वेऽनवधार्यतत्त्वे का बन्ध-मोक्ष-स्थितिरप्रमेये ॥ १० ॥

हेतुर्न दृष्टोऽत्र न चाऽप्यदृष्टो योऽयं प्रवादः क्षणिकाऽऽत्मवादः ।
न ध्वस्तमन्यत्र भवे द्वितीये सन्तानभिन्ने न हि वासनाऽस्ति ॥ ११ ॥

तथा न तत्कारण-कार्य-भावो निरन्वयाः केन समानरूपाः ? ।
असत्खपुष्पं न हि हेत्वपेक्षं दृष्टं न सिद्ध्यत्युभयोरसिद्धम् ॥ १२ ॥

नैवाऽस्ति हेतुः क्षणिकात्मवादे न सन्नसन्वा विभवादकस्मात् ।
नाशोदयैकक्षणता च दृष्टा सन्तान-भिन्न-क्षणयोरभावात् ॥ १३ ॥

कृत-प्रणाशाऽकृत-कर्मभोगौ स्यातामसञ्चेतित-कर्म च स्यात् ।
आकस्मिकेऽर्थे प्रलय-स्वभावे मार्गो न युक्तो वधकश्च न स्यात् ॥१४॥

न बन्धमोक्षौ क्षणिकैक-संस्थौ न संवृतिः साऽपि मृषा-स्वभावा।
मुख्यादृते गौण-विधिर्न दृष्टो विभ्रान्त-दृष्टिस्तव दृष्टितोऽन्या ॥ १५ ॥

प्रतिक्षणं भङ्गिषु तत्पृथक्त्वान्नमातृ-घाती स्व-पतिः स्व-जाया।
दत्त-ग्रहो नाऽधिगत-स्मृतिर्न न क्त्वार्थ-सत्यं न कुलं न जातिः ॥१६ ॥

न शास्तृ-शिष्यादि-विधि-व्यवस्था विकल्पबुद्धिर्वितथाऽखिला चेत्।
अतत्त्व - तत्त्वादि-विकल्प-मोहे निमज्जतां वीत-विकल्प-धीः का?॥१७

अनर्थिका साधन-साध्य-धीश्चेद् विज्ञानमात्रस्य न हेतु-सिद्धिः।
अथाऽर्थवत्त्वं व्यभिचार-दोषो न योगि-गम्यं परवादि-सिद्धम्॥ १८ ॥

तत्त्वं विशुद्धं सकलैर्विकल्पैर्विश्वाऽभिलापाऽऽस्पदतामतीतम्।
न स्वस्य वेद्यं न च तन्निगद्यं सुषुप्त्यवस्थं भवदुक्ति-बाह्यम् ॥ १९ ॥

मूकात्म-संवेद्यवदात्म-वेद्यं तन्म्लिष्ट-भाषा-प्रतिम-प्रलापम्।
अनङ्ग-संज्ञं तदवेद्यमन्यैः स्यात् त्वद्द्विषां वाच्यमवाच्य-तत्त्वम् ॥ २०॥

अशासदञ्जांसि वचांसि शास्ता शिष्याश्च शिष्टा वचनैर्न ते तैः।
अहो इदं दुर्गतमं तमोऽन्यत् त्वया विना श्रायसमार्य! किं तत् ॥ २१ ॥

प्रत्यक्षबुद्धिः क्रमते न यत्र तल्लिङ्ग-गम्यं न तदर्थ-लिङ्गम्।
वाचो न वा तद्विषयेण योगः का तद्गतिः? कष्टमशृण्वतां ते॥ २२ ॥

रागाद्यविद्याऽनल-दीपनं च विमोक्ष-विद्याऽमृत-शासनं च।
न भिद्यते संवृति-वादि-वाक्यं भवत्प्रतीपं परमार्थ-शून्यम् ॥ २३ ॥

विद्या-प्रसूत्यै किल शील्यमाना भवत्यविद्या गुरुणोपदिष्टा।
अहो त्वदीयोक्त्यनभिज्ञ-मोहो यज्जन्मने यत्तदजन्मने तत् ॥ २४ ॥

अभावमात्रं परमार्थवृत्तेः सा संवृतिः सर्व-विशेष-शून्या।
तस्या विशेषौ किल बन्ध-मोक्षौ हेत्वात्मनेति त्वदनाथवाक्यम् ॥२५॥

व्यतीत-सामान्य-विशेष-भावाद् विश्वाऽभिलापाऽर्थ-विकल्प-शून्यम्।
ख-पुष्पवत्स्यादसदेव तत्त्वं प्रबुद्ध-तत्त्वाद्भवतः परेषाम् ॥ २६ ॥

अतत्स्वभावेऽप्यनयोरुपायाद् गतिर्भवेत्तौ वचनीय-गम्यौ।
सम्बन्धिनौ चेन्न विरोधि दृष्टं वाच्यं यथार्थं न च दूषणं तत् ॥ २७ ॥

उपेय-तत्त्वाऽनभिलाप्यता-वद् उपाय-तत्त्वाऽनभिलाप्यता स्यात्।
अशेष-तत्त्वाऽनभिलाप्यतायां द्विषां भवद्युक्त्यभिलाप्यतायाः॥ २८ ॥

अवाच्यमित्यत्र च वाच्यभावा-दवाच्यमेवेत्ययथाप्रतिज्ञम्।
स्वरूपतश्चेत्पररूपवाचि स्वरूपवाचीति वचो विरुद्धम् ॥ २९ ॥

सत्याऽनृतं वाऽप्यनृताऽनृतं वाऽप्यस्तीह किं वस्त्वतिशायनेन।
युक्तं प्रतिद्वन्द्वयनुबन्धि-मिश्रं न वस्तु तादृक् त्वदृते जिनेदृक् ॥ ३० ॥

सह-क्रमाद्वा विषयाऽल्प-भूरि-भेदेऽनृतं भेदि न चाऽऽत्मभेदात्।
आत्मान्तरं स्याद्भिदुरं समं च स्याच्चाऽनृतात्माऽनभिलाप्यता च ॥३१॥

न सच्च नाऽसच्च न दृष्टमेक-मात्मान्तरं सर्व-निषेध-गम्यम्।
दृष्टं विमिश्रं तदुपाधि-भेदात् स्वप्नेऽपि नैतत्त्वदृषेः परेषाम् ॥ ३२ ॥

प्रत्यक्ष-निर्देशवदप्यसिद्ध-मकल्पकं ज्ञापयितुं ह्यशक्यम्।
विना च सिद्धेर्न च लक्षणार्थो न तावक-द्वेषिणि वीर! सत्यम् ॥ ३३ ॥

कालान्तरस्थे क्षणिके ध्रुवे वाऽपृथक्पृथक्त्वाऽवचनीयतायाम्।
विकारहानेर्न च कर्तृकार्ये वृथा श्रमोऽयं जिन! विद्विषां ते ॥ ३४ ॥

मद्याङ्गवद्भूत-समागमे ज्ञः शक्त्यन्तर-व्यक्तिरदैव-सृष्टिः।
इत्यात्म-शिश्नोदर-पुष्टि-तुष्टैर्निर्ह्रीभयैर्हा! मृदवः प्रलब्धाः ॥ ३५ ॥

दृष्टेऽविशिष्टे जननादि-हेतौ विशिष्टता का प्रतिसत्त्वमेषाम्।
स्वभावतः किं न परस्य सिद्धिरतावकानामपि हा! प्रपातः ॥ ३६ ॥

स्वच्छन्दवृत्तेर्जगतः स्वभावादुच्चैरनाचार-पथेष्वदोषम्।
निर्घुष्य दीक्षासममुक्तिमानास्त्वदृष्टि-बाह्या बत! विभ्रमन्ते ॥ ३७ ॥

प्रवृत्ति-रक्तैः शम-तुष्टि-रिक्तैरुपेत्य हिंसाऽभ्युदयाङ्ग-निष्ठा।
प्रवृत्तितः शान्तिरपि प्ररूढं तमः परेषां तव सुप्रभातम् ॥ ३८ ॥

शीर्षोपहारादिभिरात्मदुःखैर्देवान् किलाऽऽराध्य सुखाभिगृद्धाः ।
सिद्ध्यन्ति दोषाऽपचयाऽनपेक्षा युक्तं च तेषां त्वमृषिर्न येषाम् ॥ ३९ ॥

सामान्य-निष्ठा विविधा विशेषाः पदं विशेषान्तर-पक्षपाति ।
अन्तर्विशेषान्त-वृत्तितोऽन्यत् समानभावं नयते विशेषम् ॥ ४० ॥

यदेवकारोपहितं पदं तद् अस्वार्थतः स्वार्थमवच्छिनत्ति ।
पर्याय-सामान्य-विशेष-सर्वं पदार्थहानिश्च विरोधिवत्स्यात् ॥ ४१ ॥

अनुक्त-तुल्यं यदनेवकारं व्यावृत्त्यभावान्नियम-द्वयेऽपि ।
पर्याय-भावेऽन्यतरप्रयोगस्तत्सर्वमन्यच्च्युतमात्म-हीनम् ॥ ४२ ॥

विरोधि चाऽभेद्यविशेष-भावात्तद्द्योतनः स्याद्गुणतो निपातः
विपाद्य-सन्धिश्च तथाऽङ्गभावादवाच्यता श्रायस-लोप-हेतुः ॥ ४३ ॥

तथा प्रतिज्ञाऽऽशयतोऽप्रयोगः सामर्थ्यतो वा प्रतिषेधयुक्तिः ।
इति त्वदीया जिननाग ! दृष्टिः पराऽप्रधृष्या परधर्षिणी च ॥ ४४ ॥

विधिर्निषेधोऽनभिलाप्यता च त्रिरेकशस्त्रिर्द्विश एक एव ।
त्रयो विकल्पास्तव सप्तधाऽमी स्याच्छब्द-नेयाः सकलेऽर्थभेदे ॥ ४५ ॥

स्यादित्यपि स्याद्गुण-मुख्य-कल्पैकान्तो यथोपाधि-विशेष-वीक्ष्यः।
तत्त्वं त्वनेकान्तमशेषरूपं द्विधा भवार्थ-व्यवहारवत्त्वात् ॥ ४६ ॥

न द्रव्य-पर्याय-पृथग्-व्यवस्था द्वैयात्म्यमेकाऽर्पणया विरुद्धम् ।
धर्मी च धर्मश्च मिथस्त्रिधेमौ न सर्वथा तेऽभिमतौ विरुद्धौ ॥ ४७ ॥

दृष्टाऽऽगमाभ्यामविरुद्धमर्थप्ररूपणं युक्त्यनुशासनं ते ।
प्रतिक्षणं स्थित्युदय-व्ययात्मतत्त्व-व्यवस्थं सदिहाऽर्थरूपम् ॥ ४८ ॥

नानात्मतामप्रजहत्तदेकमेकात्मतामप्रजहच्च नाना ।
अङ्गाङ्गि-भावात्तव वस्तु तद्यत् क्रमेण वाग्वाच्यमनन्तरूपम् ॥ ४९ ॥

मिथोऽनपेक्षाः पुरुषार्थ-हेतुर्नांशा न चांशी पृथगस्ति तेभ्यः ।
परस्परेक्षाः पुरुषार्थ-हेतुर्दृष्टा नयास्तद्वदसि-क्रियायाम् ॥ ५० ॥

एकान्त-धर्माऽभिनिवेश-मूला रागादयोऽहंकृतिजा जनानाम् ।
एकान्त-हानाच्च स यत्तदेव स्वाभाविकत्वाच्च समं मनस्ते ॥ ५१ ॥

प्रमुच्यते च प्रतिपक्ष-दूषी जिन ! त्वदीयैः पटुसिंहनादैः ।
एकस्य नानात्मतया ज्ञ-वृत्तेस्तौ बन्ध-मोक्षौ स्वमतादबाह्यौ ॥ ५२ ॥

आत्मान्तराऽभाव-समानता न वागास्पदं स्वाऽऽश्रय-भेद-हीना ।
भावस्य सामान्य-विशेषवत्त्वादैक्ये तयोरन्यतरन्निरात्म ॥ ५३ ॥

अमेयमश्लिष्टममेयमेव भेदेऽपि तद्वृत्त्यपवृत्तिभावात् ।
वृत्तिश्च कृत्स्नांश- विकल्पतो न मानं च नाऽनन्त-समाश्रयस्य ॥ ५४ ॥

नाना-सदेकात्म-समाश्रयं चेद् अन्यत्वमद्विष्ठमनात्मनोःक्व ।
विकल्प-शून्यत्वमवस्तुनश्चेत् तस्मिन्नमेये क्व खलु प्रमाणम् ॥ ५५ ॥

व्यावृत्ति-हीनाऽन्वयतो न सिद्धयेद् विपर्ययेऽप्यद्वितयेऽपि साध्यम् ।
अतद्व्युदासाभिनिवेश-वादः पराऽभ्युपेताऽर्थ-विरोध-वादः ॥ ५६ ॥

अनात्मनाऽनात्मगतेरयुक्तिर्वस्तुन्ययुक्तेर्यदि पक्ष-सिद्धिः ।
अवस्त्वयुक्तेः प्रतिपक्ष-सिद्धिः न च स्वयं साधन-रिक्त-सिद्धिः॥५७

निशायितस्तैः परशुः परघ्नः स्वमूर्ध्नि निर्भेद-भयाऽनभिज्ञैः ।
वैतण्डिकैर्यैः कुसृतिः प्रणीता मुने ! भवच्छासन-दृक्-प्रमूढैः ॥ ५८ ॥

भवत्यभावोऽपि च वस्तुधर्मो भावान्तरं भाववदर्हतस्ते ।
प्रमीयते च व्यपदिश्यते च वस्तु-व्यवस्थाऽङ्गममेयमन्यत् ॥ ५९ ॥

विशेष-सामान्य-विषक्त-भेदविधि-व्यवच्छेद-विधायि-वाक्यम् ।
अभेद-बुद्धेरविशिष्टता स्याद् व्यावृत्तिबुद्धेश्च विशिष्टता ते ॥ ६० ॥

सर्वान्तवत्तद्गुण-मुख्य-कल्पं सर्वान्तशून्यं च मिथोऽनपेक्षम् ।
सर्वाऽऽपदामन्तकरं निरन्तं सर्वोदयं तीर्थमिदं तवैव ॥ ६१ ॥

कामं द्विषन्नप्युपपत्तिचक्षुः समीक्ष्यतां ते समदृष्टिरिष्टम् ।
त्वयि ध्रुवं खण्डित-मान-शृङ्गो भवत्यभद्रोऽपि समन्तभद्रः ॥ ६२ ॥

न रागान्नः स्तोत्रं भवति भव-पाश-च्छिदि मुनौ
न चाऽन्येषु द्वेषादपगुण-कथाऽभ्यास-खलता ।
किमु न्यायाऽन्याय-प्रकृत-गुणदोषज्ञ-मनसां
हिताऽन्वेषोपायस्तव गुण-कथा-सङ्ग-गदितः ॥ ६३ ॥

इति स्तुत्यः स्तुत्यैस्त्रिदश-मुनि-मुख्यैः प्रणिहितैः
स्तुतः शक्त्या श्रेयःपदमधिगतस्त्वं जिन ! मया ।
महावीरो वीरो दुरित-पर-सेनाऽभिविजये
विधेया मे भक्तिं पथि भवत एवाऽप्रतिनिधौ ॥ ६४ ॥

पू.आ.श्रीवादिदेवसूरिविरचितः

# ॥ प्रमाणनयतत्त्वालोकालङ्कारः ॥

## प्रथमः परिच्छेदः

प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते ॥ १ ॥

स्वपरव्यवसायि ज्ञानं प्रमाणम् ॥ २ ॥

अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं हि प्रमाणमतो ज्ञानमेवेदम् ३

न वै सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नम्, तस्यार्थान्तरस्येव स्वार्थव्यवसितौ साधकतमत्वानुपपत्तेः ॥ ४ ॥

न खल्वस्य स्वनिर्णीतौ करणत्वं स्तम्भादेरिवाऽचेतनत्वात् । नाप्यऽर्थनिश्चितौ स्वनिश्चितावऽकरणस्य कुम्भादेरिव तत्राऽप्यकरणत्वात् ॥ ५

तद्व्यवसायस्वभावं समारोपपरिपन्थित्वात् प्रमाणत्वाद्वा ॥ ६ ॥

अतस्मिंस्तदध्यवसायः समारोपः ॥ ७ ॥

स विपर्ययसंशयाऽनध्यवसायभेदात् त्रेधा ॥ ८ ॥

विपरीतैककोटिनिष्टङ्कनं विपर्ययः ॥ ९ ॥

यथा शुक्तिकायामिदं रजतमिति ॥ १० ॥

साधकबाधकप्रमाणाभावात् अनवस्थितानेककोटिसंस्पर्शिज्ञानंसंशयः ॥ ११

यथा अयं स्थाणुर्वा पुरुषो वेति ॥ १२ ॥

किमिति आलोचनमात्रमनध्यवसायः ॥ १३ ॥

यथा गच्छतस्तृणस्पर्शज्ञानम् ॥ १४ ॥ ज्ञानादन्योऽर्थः परः ॥ १५ ॥

स्वस्य व्यवसायः स्वाभिमुख्येन प्रकाशनम्, बाह्यस्येव तदाभिमुख्येन-करिकलभकमहमात्मना जानामीति ॥ १६ ॥

कः खलु ज्ञानस्यालम्बनं बाह्यं प्रतिभातमभिमन्यमानस्तदपि तत्प्रकारं नाभिमन्येत मिहिरालोकवत् ॥ १७ ॥

ज्ञानस्य प्रमेयाव्यभिचारित्वं प्रामाण्यम् ॥ १८ ॥

तदितरत्त्वप्रामाण्यम् ॥ १९ ॥

तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्चेति ॥ २० ॥

## द्वितीयः परिच्छेदः

तद् द्विभेदं प्रत्यक्षं च परोक्षं च ॥ १ ॥ स्पष्टं प्रत्यक्षम् ॥ २ ॥

अनुमानाद्याधिक्येन विशेषप्रकाशनं स्पष्टत्वम् ॥ ३ ॥

तद् द्विप्रकारकं सांव्यवहारिकं पारमार्थिकं च ॥ ४ ॥

तत्राद्यं द्विविधम् इन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च ॥ ५ ॥

एतद् द्वितयमवग्रहेहावायधारणाभेदादेकशश्चतुर्विकल्पकम् ॥ ६ ॥

विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्य-मवान्तरसामान्याकारविशिष्टमर्थग्रहणमवग्रहः ॥ ७ ॥

अवगृहीतार्थविशेषाकाङ्क्षणमीहा ॥ ८ ॥ ईहितविशेषनिर्णयोऽवायः ॥ ९

स एव दृढतरावस्थापन्नो धारणा ॥१० ॥

संशयपूर्वकत्वादीहायाः संशयाद्भेदः ॥ ११ ॥

कथंचिदभेदेऽपि परिणामविशेषादेषां व्यपदेशभेदः ॥ १२ ॥

असामस्त्येनाप्युत्पद्यमानत्वेनासंकीर्णस्वभावतयाऽनुभूयमान त्वाद-
पूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात्क्रमभावित्वाच्चैते व्यतिरिच्यन्ते ॥ १३

क्रमोऽप्यमीषामयमेव तथैव संवेदनात् एवं क्रमाविर्भूतनिजकर्मक्षयो-
पशमजन्यत्वाच्च ॥ १४ ॥ अन्यथा प्रमेयानवगतिप्रसङ्गः ॥ १५ ॥

तथाहि- न खल्वदृष्टमवगृह्यते। नचाऽनवगृहीतं संदिह्यते। नचाऽसंदि-
ग्धमीह्यते। नचानीहितमवेयते। नाप्यनवेतं धार्यते ॥ १६ ॥

क्वचित्क्रमस्यानुपलक्षणमेषामाशूत्पादादुत्पलपत्रशतव्यतिभेदक्रमवत्१७

पारमार्थिकं पुनरुत्पत्तौ आत्ममात्रापेक्षम् ॥ १८ ॥

तद्विकलं सकलं च ॥ १९ ॥

तत्र विकलमवधिमनःपर्यायज्ञानरूपतया द्वेधा ॥ २० ॥

अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं-
रूपिद्रव्यगोचरमवधिज्ञानम् ॥ २१ ॥

संयमविशुद्धिनिबन्धनाद्विशिष्टावरणविच्छेदाज्जातं-
मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानम् ॥ २२ ॥

सकलं तु, सामग्रीविशेषतः समुद्भूतसमस्तावरणक्षयापेक्षं निखिल-
द्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानम् ॥ २३ ॥

तद्वानर्हन्निर्दोषत्वात् ॥ २४ ॥ निर्दोषोऽसौ प्रमाणाविरोधिवाक्त्वात्॥ २५

तदिष्टस्य प्रमाणेनाबाध्यमानत्वात् तद्वाचस्तेनाविरोधसिद्धिः ॥ २६ ॥

न च कवलाहारवत्त्वेन तस्याऽसर्वज्ञत्वम् कवलाहारसर्वज्ञत्वयोर-
विरोधात् ॥ २७ ॥

# तृतीयः परिच्छेदः

अस्पष्टं परोक्षम् ॥ १ ॥

स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदात्तत्पञ्चप्रकारम् ॥ २ ॥

तत्र संस्कारप्रबोधसंभूतमनुभूतार्थविषयं तदित्याकारं संवेदनं स्मरणम् ३

तत्तीर्थकरबिम्बमिति यथा ॥ ४ ॥

अनुभवस्मृतिहेतुकं तिर्यगूर्द्ध्वतासामान्यादिगोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम् ॥ ५ ॥

यथा तज्जातीय एवायं गोपिण्डः, गोसदृशो गवयः । स एवायं जिनदत्त इत्यादि ॥ ६ ॥

उपलम्भानुपलम्भसंभवं त्रिकालीकलितसाध्यसाधनसंबन्धाद्यालम्बनमिदमस्मिन् सत्येव भवतीत्याद्याकारं संवेदनमूहापरनामा तर्कः ॥ ७

यथा यावान् कश्चित् धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसत्यसौ न भवत्येवेति ॥ ८ ॥

अनुमानं द्विप्रकारं स्वार्थं परार्थं च ॥ ९ ॥

तत्र हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम् ॥ १० ॥

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः ॥ ११ ॥

नतु त्रिलक्षणकादिः ॥ १२ ॥ तस्य हेत्वाभासस्यापि संभवात्॥ १३ ॥

अप्रतीतमनिराकृतमभीप्सितं साध्यम् ॥ १४ ॥

शङ्कितविपरीतानध्यवसितवस्तूनां साध्यताप्रतिप्रत्त्यर्थमप्रतीतवचनम्

प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसज्यतामित्यनिराकृतग्रहणम् १६ ॥

अनभिमतस्यासाध्यत्वप्रतिपत्तयेऽभीप्सितपदोपादानम् ॥ १७ ॥

व्याप्तिग्रहणसमयापेक्षया साध्यं धर्म एवान्यथा तदनुपपत्तेः ॥ १८ ॥

नहि यत्र यत्र धूमस्तत्र तत्र चित्रभानोरिव धरित्रीधरस्याप्यनुवृत्तिरस्ति ॥ १९

आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी ॥ २० ॥

धर्मिणः प्रसिद्धिः क्वचिद्विकल्पतः कुत्रचित्प्रमाणतः क्वापि विकल्पप्रमाणाभ्याम् ॥ २१ ॥

यथा समस्ति समस्तवस्तुवेदी, क्षितिधरकन्धरेयं धूमध्वजवती, ध्वनिः परिणतिमानिति ॥ २२ ॥

पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात् ॥ २३ ॥

साध्यस्य प्रतिनियतधर्मिसम्बन्धिताप्रसिद्धये हेतोरुपसंहार वचनवत्पक्षप्रयोगोऽप्यवश्यमाश्रयितव्यः ॥ २४ ॥

त्रिविधं- साधनमभिधायैव तत्समर्थनं विदधानः कः खलु न पक्षप्रयोगमंगी- कुरुते ॥ २५ ॥

प्रत्यक्षपरिच्छिन्नार्थाभिधायि वचनं परार्थं प्रत्यक्षं परप्रत्यक्षहेतुत्वात् २६

यथा पश्य पुरः स्फुरत्किरणमणिखण्डमण्डिताभरणभारिणीं जिनपतिप्रतिमामिति ॥ २७ ॥

पक्षहेतुवचनलक्षणमवयवद्वयमेव परप्रतिपत्तेरङ्गं न दृष्टान्तादिवचनम् २

हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः ॥ २९ ॥

सत्येव साध्ये हेतोरुपपत्तिः तथोपपत्तिः असति साध्ये हेतोरनुपपत्तिरेवान्यथानुपपत्तिः ॥ ३० ॥

यथा कृशानुमानयं पाकप्रदेशः सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेरऽसत्यनुपपत्तेर्वेति ॥ ३१ ॥

अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्रानुपयोगः ३२

न च दृष्टान्तादिवचनं परप्रतिपत्तये प्रभवति । तस्यां पक्षहेतुवचनयोरेव व्यापारोपलब्धेः ॥ ३३ ॥

न हेतोरन्यथानुपपत्तिनिर्णीतये यथोक्ततर्कप्रमाणादेव तदुपपत्तेः॥ ३४ ॥

नियतैकविशेषस्वभावे च दृष्टान्ते साकल्येन व्याप्तेरयोगतो विप्रतिपत्तौ तदन्तरापेक्षायामनवस्थितेर्दुर्निवारः समवतारः ॥ ३५ ॥

नाप्यविनाभावस्मृतये प्रतिपन्नप्रतिबन्धस्य व्युत्पन्नमतेः पक्षहेतुप्रदर्शने - नैव तत्प्रसिद्धेः ॥ ३६ ॥

अन्तर्व्याप्त्या हेतोः साध्यप्रत्यायने शक्तावशक्तौ च बहिर्व्याप्तेरुद्भावनं - व्यर्थम् ॥ ३७ ॥

पक्षीकृत एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिरन्यत्र तु- बहिर्व्याप्तिः ॥ ३८ ॥

यथाऽनेकान्तात्मकं वस्तु सत्त्वस्य तथैवोपपतैः ॥ ३९ ॥

नोपनयनिगमनयोरपि पर प्रतिपत्तौ सामर्थ्यं पक्षहेतुप्रयोगादेव तस्याः सद्भावात् ॥ ४० ॥

समर्थनमेव परं परप्रतिपत्त्यङ्गमास्तां तदन्तरेण दृष्टान्तादिप्रयोगेऽपि तदसंभवात् ॥ ४१ ॥

मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तोपनयनिगमनान्यपि प्रयोज्यानि ४२ ॥

प्रतिबन्धप्रतिपत्तेरास्पदं दृष्टान्तः ॥ ४३ ॥

स द्वेधा साधर्म्यतो वैधर्म्यतश्च ॥ ४४ ॥

यत्र साधनधर्मसत्तायामवश्यं साध्यधर्मसत्ता प्रकाश्यते स साधर्म्यदृष्टान्तः ॥ ४५ ॥

यथा यत्र धूमस्तत्र तत्र वह्निर्यथा महानसम् ॥ ४६ ॥

यत्र तु साध्याभावे साधनस्यावश्यमभावः प्रदश्र्यते स वैधर्म्यदृष्टान्तः ४७

यथाग्न्यभावे न भवत्येव धूमो यथा जलाशये ॥ ४८ ॥

हेतोः साध्यधर्मिण्युपसंहरणमुपनयः ॥ ४९ ॥

यथा धूमश्चात्र प्रदेशे ॥ ५० ॥ साध्यधर्मस्य पुनर्निगमनम् ॥ ५१ ॥

यथा तस्मादग्निरत्र ॥ ५२ ॥

एते पक्षप्रयोगादयः पञ्चापि अवयवसंज्ञया कीर्त्यन्ते ॥ ५३ ॥

उक्तलक्षणो हेतुर्द्विप्रकारः । उपलब्ध्यनुपलब्धिभ्यां भिद्यमानत्वात् ५४

उपलब्धिर्विधिनिषेधयोः सिद्धिनिबन्धनमनुपलब्धिश्च ॥ ५५ ॥

विधिः सदंशः ॥ ५६ ॥ प्रतिषेधोऽसदंशः ॥ ५७ ॥

स चतुर्धा प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभावश्च ५८

यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः ॥ ५९ ॥

यथा मृत्पिण्डनिवृत्तावेव समुत्पद्यमानस्य घटस्य मृत्पिण्डः ॥ ६० ॥

यदुत्पत्तौ कार्यस्यावश्यं विपत्तिः सोऽस्य प्रध्वंसाभावः ॥ ६१ ॥

यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्यमानस्य कलशस्य

कपालकदम्बकम् ॥ ६२ ॥

स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः ॥ ६३ ॥

यथा स्तम्भस्वभावात्कुम्भस्वभावव्यावृत्तिः ॥ ६४ ॥

कालत्रयापेक्षिणी हि तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः ॥ ६५ ॥

यथा चेतनाचेतनयोः ॥ ६६ ॥

उपलब्धेरपि द्वैविध्यमविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्च ॥ ६७ ॥

तत्राविरुद्धोपलब्धिर्विधिसिद्धौ षोढा ॥ ६८ ॥

साध्येनाविरुद्धानां व्याप्यकार्यकारणपूर्वचरोत्तरचरसहचरा-
णामुपलब्धिरिति ॥ ६९ ॥

तमस्विन्यामास्वाद्यमानादाम्रफलरसादेकसामग्र्यनुमित्या-
रूपाद्यनुमितिमभिमन्यमानैरभिमतमेव किमपि कारणं हेतुतया यत्र-
शक्तेरप्रति- स्खलनमपरकारणसाकल्यं च ॥ ७० ॥

पूर्वचरोत्तरचरयोर्न स्वभावकार्यकारणभावौ तयोः कालव्यवहितावनुप-
लम्भात् ॥ ७१ ॥

न चातिक्रान्तानागतयोर्जाग्रद्दशासंवेदनमरणयोः प्रबोधोत्पातौ प्रति
कारणत्वं व्यवहितत्वेन निर्व्यापारत्वात् ॥ ७२ ॥

स्वव्यापारसपेक्षिणी हि कार्यं प्रति पदार्थस्य कारणत्वव्यवस्था
कुलालस्येव कलशं प्रति ॥ ७३ ॥

न च व्यवहितयोस्तयोर्व्यापारपरिकल्पनं न्याय्यमतिप्रसक्तेः ॥ ७४ ॥

परम्पराव्यवहितानां परेषामपि तत्कल्पनस्य निवारयितुमशक्यत्वात् ॥ ७५

सहचारिणोः परस्परस्वरूपपरित्यागेन तादात्म्यानुपपत्तेः सहोत्पादेन
तदुत्पत्तिविपत्तेश्च सहचरहेतोरपि प्रोक्तेषु नानुप्रवेशः ॥ ७६ ॥

ध्वनिः परिणतिमान् प्रयत्नानन्तरीयकत्वात्, यः प्रयत्नानन्तरीयकः स
परिणतिमान् यथा स्तम्भो, यो वा न परिणतिमान् स न प्रयत्नानन्तरीयको
यथा वान्ध्येयः, प्रयत्नानन्तरीयकश्च ध्वनिस्तस्मात्परिणतिमानिति
व्याप्यस्य साध्येनाविरुद्धस्योपलब्धिः साधर्म्येण वैधर्म्येण च ॥ ७७

अस्त्यत्र गिरिनिकुञ्जे धनञ्जयो धूमोपलम्भादिति कार्यस्य ॥ ७८ ॥

भविष्यति वर्षं तथाविधवारिवाहविलोकनादिति कारणस्य ॥ ७९ ॥

उदेष्यति मुहूर्त्तान्ते तिष्यतारका पुनर्वसूदयदर्शनादिति पूर्वचरस्य ८०

उदगुर्मुहूर्तात्पूर्वं पूर्वफल्गुन्य-
उत्तरफल्गुनीनामुद्गमोपलब्धेरित्युत्तरचरस्य ॥ ८१ ॥

अस्तीह सहकारफले रूपविशेषः समास्वाद्यमानरसविशेषादिति
सहचरस्य ॥ ८२ ॥

विरुद्धोपलब्धिस्तु प्रतिषेधप्रतिपत्तौ सप्तप्रकारा ॥ ८३ ॥

तत्राद्या स्वभावविरुद्धोपलब्धिः ॥ ८४ ॥

यथा नास्त्येव सर्वथैकान्तोऽनेकान्तस्योपलम्भात् ॥ ८५ ॥

प्रतिषेध्यविरुद्धव्याप्तादीनामुपलब्धयः षट् ॥ ८६ ॥

विरुद्धव्याप्तोपलब्धिर्यथा-नास्त्यस्य पुंसस्तत्त्वेषु विनिश्चयस्तत्र
सन्देहात् ॥ ८७ ॥

विरुद्धकार्योपलब्धिर्यथा-न विद्यतेऽस्य क्रोधाद्युपशान्तिर्वदनविकारादेः

विरुद्धकारणोपलब्धिर्यथा-नास्य महर्षेरसत्यं वचः समस्ति,
रागद्वेषकालुष्याकलङ्कितज्ञानसंपन्नत्वात् ॥ ८९ ॥

विरुद्धपूर्वचरोपलब्धिर्यथा नोद्गमिष्यति मुहूर्तान्ते पुष्यतारा
रोहिण्युद्गमात् ॥ ९० ॥

विरुद्धोत्तरचरोपलब्धिर्यथा नोदगान्मुहूर्तात्पूर्वं मृगशिरःपूर्व-
फल्गुन्युदयात् ॥ ९१ ॥

विरुद्धसहचरोपलब्धिर्यथा नास्त्यस्य मिथ्याज्ञानं सम्यग्ज्ञानदर्शनात् ९:

अनुपलब्धेरपि द्वैरूप्यमविरुद्धानुपलब्धिर्विरुद्धानुपलब्धिश्च ॥ ९३ ॥

तत्राविरुद्धानुपलब्धिः प्रतिषेध्यावबोधे सप्तप्रकारा ॥ ९४ ॥

प्रतिषेध्येनाविरुद्धानां स्वभावव्यापककार्यकारणपूर्वचरोत्तरचरसह-
चराणामनुपलब्धिरिति ॥९५॥

स्वभावानुपलब्धिर्यथा नास्त्यत्र भूतले कुम्भ उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्यानुपलम्भात् ॥ ९६ ॥

व्यापकानुपलब्धिर्यथा नास्त्यत्र प्रदेशे पनसः पादपानुपलब्धेः ९७ ॥

कार्यानुपलब्धिर्यथा नास्त्यत्राप्रतिहतशक्तिकं बीजं-अङ्कुरानवलोकनात् ॥ ९८ ॥

कारणानुपलब्धिर्यथा न सन्त्यस्य प्रशमप्रभृतयो भावास्तत्त्वार्थ-श्रद्धानाभावात् ॥ ९९ ॥

पूर्वचरानुपलब्धिर्यथा नोद्गमिष्यति मुहूर्तान्तेस्वातिनक्षत्रं चित्रोदयाद-र्शनात् ॥ १०० ॥

उत्तरचरानुपलब्धिर्यथा नोदगमत्पूर्वभद्रपदा-मुहूर्तात्पूर्वमुत्तरभद्रपदोद्गमानवगमात् ॥ १०१ ॥

सहचरानुपलब्धिर्यथा नास्त्यस्य सम्यग्ज्ञानं सम्यग्दर्शनानुपलब्धेः॥ १०२

विरुद्धानुपलब्धिस्तु विधिप्रतीतौ पंचधा ॥ १०३ ॥

विरुद्धकार्यकारणस्वभावव्यापकसहचरानुपलम्भभेदात् ॥ १०४ ॥

विरुद्धकार्यानुपलब्धिर्यथा अत्र शरीरिणि रोगातिशयः समस्ति नीरोग-व्यापारानुपलब्धेः ॥ १०५ ॥

विरुद्धकारणानुपलब्धिर्यथा विद्यतेऽत्र प्राणिनि कष्टमिष्टसंयोगाभावात्

विरुद्धस्वभावानुपलब्धिर्यथा वस्तुजातमनेकान्तात्मकमेकान्तस्वभावा-नुपलम्भात् ॥ १०७ ॥

विरुद्धव्यापकानुपलब्धिर्यथा अस्त्यत्र छाया औष्ण्यानुपलब्धेः१०८ ॥

विरुद्धसहचरोपलब्धिर्यथा अस्त्यस्य मिथ्याज्ञानं सम्यग्दर्शनानुपलम्भात्

## चतुर्थः परिच्छेदः

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः ॥ १ ॥

उपचारादाप्तवचनं च ॥ २ ॥

यथा समस्त्यत्र प्रदेशे रत्ननिधानम्, सन्ति रत्नसानुप्रभृतयः ॥ ३ ॥

अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञातं चाभिधत्ते स आप्तः

तस्य हि वचनमविसंवादि भवति ॥ ५ ॥

स च द्वेधा लौकिको लोकोत्तरश्च ॥ ६ ॥

लौकिको जनकादिर्लोकोत्तरस्तु तीर्थकरादिः ॥ ७ ॥

वर्णपदवाक्यात्मकं वचनम् ॥ ८ ॥

अकारादिः पौद्‌गलिको वर्णः ॥ ९ ॥

वर्णानामन्योन्यापेक्षाणां निरपेक्षा संहतिः पदम्, पदानां तु वाक्यम् ॥ १०

स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः ॥ ११ ॥

अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवद्यथार्थत्वायथार्थत्वे पुनः पुरुषगुणदोषावनुसरतः ॥ १२ ॥

सर्वत्रायं ध्वनिर्विधिनिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छति १३

एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी १४

तद्यथा-स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः ॥ १५ ॥

स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः ॥ १६ ॥

स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः १७ ॥

स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थः ॥ १८ ॥

स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेध-
कल्पनया पञ्चमः ॥ १९ ॥

स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधि निषेध-
कल्पनया च षष्ठः ॥ २० ॥

स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधि निषेध-
कल्पनया युगपद्विधिनिषेधकल्पनया च सप्तमः ॥ २१ ॥

विधिप्रधान एव ध्वनिरिति न साधुः ॥ २२ ॥

निषेधस्यापि तस्मादप्रतिपत्तिप्रसक्तेः ॥ २३ ॥

अप्राधान्येनैव ध्वनिस्तमभिधत्ते इत्यप्यसारम् ॥ २४ ॥

क्वचित्कदाचित्कथंचित्प्राधान्येनाप्रतिपन्नस्याप्राधान्यानुपपत्तेः ॥ २५ ॥

निषेधप्रधान एव शब्द इत्यपि प्रागुक्तन्यायादपास्तम् ॥ २६ ॥

क्रमादुभयप्रधान एवायमित्यपि न साधीयः ॥ २७ ॥

अस्य विधिनिषेधान्यतरप्रधानत्वानुभवस्याप्यबाध्यमानत्वात् ॥ २८ ॥

युगपद्विधिनिषेधात्मनोऽर्थस्यावाचक एवासौ इतिवचो न चतुरस्रम् २९

तस्यावक्तव्यशब्देनाप्यवाच्यत्वप्रसङ्गात् ॥ ३० ॥

विध्यात्मनोऽर्थस्य वाचकः सन्नुभयात्मनो युगपदवाचक एव स-
इत्येकान्तोऽपि नैकान्तः ॥ ३१ ॥

निषेधात्मनः सह द्वयात्मनश्चार्थस्य वाचकत्वावाचकत्वाभ्यामपि शब्दस्य
प्रतीयमानत्वात् ॥ ३२ ॥

निषेधात्मनोऽर्थस्य वाचकः सन्नुभयात्मनो युगपदवाचक एवायमित्य-
प्यवधारणं न रमणीयम् ॥ ३३ ॥

इतरथापि संवेदनात् ॥ ३४ ॥

क्रमाक्रमाभ्यामुभयस्वभावस्य भावस्य वाचकश्चावाचकश्च ध्वनिर्नान्यथा इत्यपि मिथ्या ॥ ३५ ॥

विधिमात्रादिप्रधानतयाऽपि तस्य प्रसिद्धेः ॥ ३६ ॥

एकत्र वस्तुनि विधीयमाननिषिध्यमानानन्तधर्माभ्युपगमेनानन्तभङ्गी-प्रसंगादसंगतैव सप्तभङ्गीति चेतसि न निधेयम् ॥ ३७ ॥

विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामेव सप्तभङ्गीनां संभवात् ॥ ३८ ॥

प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव संभवात् ॥ ३९ ॥

तेषामपि सप्तत्वं सप्तविधतज्जिज्ञासानियमात् ॥ ४० ॥

तस्या अपि सप्तविधत्वं सप्तधैव तत्संदेहसमुत्पादात् ॥ ४१ ॥

तस्यापि सप्तप्रकारत्वनियमः स्वगोचरवस्तुधर्माणां सप्तविधत्वस्यैवो-पपत्तेः ॥ ४२ ॥

इयं सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च ४३

प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनःकालादिभिरभेदवृत्तिप्राधान्यादभेदो-पचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः ॥ ४४ ॥

तद्विपरीतस्तु विकलादेशः ॥ ४५ ॥

तद् द्विभेदमपि प्रमाणमात्मीयप्रतिबन्धकापगमविशेषस्वरूपसामर्थ्यतः प्रतिनियतमर्थमवद्योतयति ॥ ४६ ॥

न तदुत्पत्तितदाकारताभ्याम्, तयोः पार्थक्येन सामस्त्येन च व्यभिचारो-पलम्भात् ॥ ४७ ॥

## पञ्चमः परिच्छेदः

तस्य विषयः सामान्यविशेषाद्यनेकान्तात्मकं वस्तु ॥ १ ॥

अनुगतविशिष्टाकारप्रतीतिविषयत्वात् प्राचीनोत्तराकारपरित्यागोपादाना-
वस्थानस्वरूपपरिणत्यार्थक्रियासामर्थ्यघटनाच्च ॥ २ ॥

सामान्यं द्विप्रकारं तिर्यक्सामान्यमूर्ध्वतासामान्यं च ॥ ३ ॥

प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यं शबलशाबलेयादिषु गोत्वं यथा

पूर्वापरपरिणामसाधारणं द्रव्यमूर्ध्वतासामान्यंकटककङ्कणाद्यनुगामिका-
ञ्चनवत् ॥ ५ ॥ विशेषोऽपि द्विरूपो गुणः पर्यायश्च ॥ ६ ॥

गुणः सहभावी धर्मो यथात्मनि विज्ञानव्यक्तिशक्त्यादिः ॥ ७ ॥

पर्यायस्तु क्रमभावी यथा तत्रैव सुखदुःखादिः ॥ ८ ॥

## षष्ठः परिच्छेदः

यत्प्रमाणेन प्रसाध्यते तदस्य फलम् ॥ १ ॥

तद् द्विविधमानन्तर्येण पारम्पर्येण च ॥ २ ॥

तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् ॥ ३ ॥

पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यम् ॥ ४ ॥

शेषप्रमाणानां पुनरुपादानहानोपेक्षाबुद्धयः ॥ ५ ॥

तत्प्रमाणतः स्याद्भिन्नमभिन्नं च, प्रमाणफलत्वान्यथानुपपत्तेः ॥ ६ ॥

उपादानबुद्ध्यादिना प्रमाणाद्भिन्नेन व्यवहितफलेन हेतोर्व्यभिचार इति न
विभावनीयम् ॥ ७ ॥

तस्यैकप्रमातृतादात्म्येन प्रमाणादभेदव्यवस्थितेः ॥ ८ ॥

प्रमाणतया परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेः ॥ ९ ॥

यः प्रमिमीते स एवोपादत्ते परित्यजत्युपेक्षते चेति सर्वसंव्यवहारिभिरस्खलितमनुभवात् ॥ १० ॥

इतरथा स्वपरयोः प्रमाणफलयोर्व्यवस्थाविप्लवः प्रसज्येत ॥ ११ ॥

अज्ञाननिवृत्तिस्वरूपेण प्रमाणादभिन्नेन साक्षात्फलेन साधनस्यानेकान्त इति नाशङ्कनीयम् ॥ १२ ॥

कथञ्चित्तस्यापि प्रमाणाद्भेदेन व्यवस्थानात् ॥ १३ ॥

साध्यसाधनभावेन प्रमाणफलयोः प्रतीयमानत्वात् ॥ १४ ॥

प्रमाणं हि करणाख्यं साधनम्, स्वपरव्यवसितौ साधकतमत्वात् १५

स्वपरव्यवसितिक्रियारूपाज्ञाननिवृत्त्याख्यं फलं तु साध्यम्, प्रमाणनिष्पाद्यत्वात् ॥ १६ ॥

प्रमातुरपि स्वपरव्यवसितिक्रियायाः कथञ्चिद्भेदः ॥ १७ ॥

कर्तृक्रिययोः साध्यसाधकभावेनोपलम्भात् ॥ १८ ॥

कर्ता हि साधकः स्वतन्त्रत्वात् । क्रिया तु साध्या कर्तृनिर्वर्त्यत्वात्

नच क्रिया क्रियावतः सकाशादभिन्नैव भिन्नैव वा प्रतिनियतक्रियावद्भावभङ्गप्रसङ्गात् ॥ २० ॥

संवृत्या प्रमाणफलव्यवहार इत्यप्रामाणिकप्रलापः । परमार्थतः स्वाभिमत- सिद्धिविरोधात् ॥ २१ ॥

ततः पारमार्थिक एव प्रमाणफलव्यवहारः सकलपुरुषार्थसिद्धिहेतुः स्वीकर्तव्यः ॥ २२ ॥

*प्रमाणस्य स्वरूपादिचतुष्टयाद्विपरीतं तदाभासम्* ॥ २३ ॥

अज्ञानात्मकाऽनात्मकप्रकाशक-स्वमात्रावभासक-निर्विकल्पसमरोपाः प्रमाणस्यस्वरूपाभासाः ॥२४॥

यथा सन्निकर्षाद्यस्वसंविदितपरानवभासकज्ञानदर्शनविपर्ययसंशयानध्यवसायाः ॥ २५ ॥

तेभ्यः स्वपरव्यवसायस्यानुपपत्तेः ॥ २६ ॥

सांव्यवहारिकप्रत्यक्षमिव यदाभासते तत्तदाभासम् ॥ २७ ॥

यथाम्बुधरेषु गन्धर्वनगरज्ञानं दुःखे सुखज्ञानं च ॥ २८ ॥

पारमार्थिकप्रत्यक्षमिव यदाभासते तत्तदाभासम् ॥ २९ ॥

यथा शिवाख्यस्य राजर्षेरसङ्ख्यातद्वीपसमुद्रेषु सप्तद्वीपसमुद्रज्ञानम् ३०

अननुभूते वस्तुनि तदिति ज्ञानं स्मरणाभासम् ॥ ३१ ॥

अनुनुभूते मुनिमण्डले तन्मुनिमण्डलमिति यथा ॥ ३२ ॥

तुल्ये पदार्थे स एवायमित्येकस्मिंश्च तेन तुल्य इत्यादि ज्ञानं प्रत्यभिज्ञाभासम् ॥ ३३ ॥ यमलकजातवत् ॥ ३४ ॥

असत्यामपि व्याप्तौ तदवभासस्तर्काभासः ॥ ३५ ॥

स श्यामो मैत्रतनयत्वात् इत्यत्र यावान् मैत्रतनयः स श्याम इति यथा

पक्षाभासादिसमुत्थं ज्ञानमनुमानाभासमवसेयम् ॥ ३७ ॥

तत्र प्रतीतनिराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः पक्षाभासाः ॥ ३८

प्रतीतसाध्यधर्मविशेषणो यथा आर्हतान्प्रति अवधारणवर्जः परेण प्रयुज्यमानः समस्ति जीव इत्यादि ॥ ३९ ॥

निराकृतसाध्यधर्मविशेषणः प्रत्यक्षानुमानागमालोकस्ववचनादिभिः साध्यधर्मस्य निराकृतत्वादनेकप्रकारः ॥ ४० ॥

प्रत्यक्षनिराकृतसाध्यधर्मविशेषणो यथा नास्ति भूतविलक्षण आत्मेति

अनुमाननिराकृतसाध्यधर्मविशेषणो यथा नास्ति सर्वज्ञो वीतरागो वा

आगमनिराकृतसाध्यधर्मविशेषणो यथा जैनेन रजनिभोजनं भजनीयम्

लोकनिराकृतसाध्यधर्मविशेषणो यथा न पारमार्थिकः प्रमाणप्रमेय-व्यवहारः ॥ ४४ ॥

स्ववचननिराकृतसाध्यधर्मविशेषणो यथा नास्ति प्रमेयपरिच्छेदकं प्रमाणम् ॥ ४५ ॥

अनभीप्सितसाध्यधर्मविशेषणो यथा स्याद्वादिनः शाश्वतिक एव कलशादिरशाश्वतिक एवेति वदतः ॥ ४६ ॥

असिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥ ४७ ॥

यस्यान्यथानुपपत्तिः प्रमाणेन न प्रतीयतेऽसावसिद्धः ॥ ४८ ॥

स द्विविधः-उभयासिद्धोऽन्यतरासिद्धश्च ॥ ४९ ॥

उभयासिद्धो यथा-परिणामी शब्दश्चाक्षुषत्वात् ॥ ५० ॥

अन्यतरासिद्धिर्यथा-अचेतनास्तरवो विज्ञानेन्द्रियायुर्निरोध लक्षण-मरणरहितत्वात् ॥ ५१ ॥

साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यवसीयते स विरुद्धः ५२ ॥

यथा नित्य एव पुरुषोऽनित्य एव वा प्रत्यभिज्ञानादिमत्त्वात् ५३ ॥

यस्यान्यथानुपपत्तिः सन्दिह्यतेऽसावनैकान्तिकः ॥ ५४ ॥

स द्वेधा-निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च ॥ ५५ ॥

निर्णीतविपक्षवृत्तिको यथा-नित्यः शब्दः प्रमेयत्वात् ॥ ५६ ॥

सन्दिग्धविपक्षवृत्तिको यथा विवादपदापन्नः पुमान् सर्वज्ञो न भवति वक्तृत्वात् ॥ ५७ ॥ साधर्म्येण दृष्टान्ताभासो नवप्रकारः ॥ ५८ ॥

साध्यधर्मविकलः साधनधर्मविकलः उभयधर्मविकलः,
सन्दिग्धसाध्य- धर्मा सन्दिग्धसाधनधर्मा सन्दिग्धोभयधर्मा,
अनन्वयोऽप्रदर्शितान्वयो विपरीतान्वयश्च ॥ ५९ ॥

तत्रापौरुषेयः शब्दोऽ मूर्तत्वाद् दुःखवदिति साध्यधर्मविकलः॥ ६० ॥

तस्यामेव प्रतिज्ञायां तस्मिन्नेव हेतौ परमाणुवदिति साधनधर्मविकलः कलशवदित्युभयधर्मविकलः ॥ ६२ ॥

रागादिमानयं वक्तृत्वाद् देवदत्तवदिति सन्दिग्धसाध्यधर्मा ॥ ६३ ॥

मरणधर्मायं रागादिमत्त्वात् मैत्रवदिति सन्दिग्धसाधनधर्मा ॥ ६४ ॥

नायं सर्वदर्शी रागादिमत्त्वान्मुनिविशेषवदिति सन्दिग्धोभयधर्मा ॥ ६५

रागादिमान् विवक्षितः पुरुषो वक्तृत्वादिष्टपुरुषवदित्यनन्वयः ॥ ६६ ॥

अनित्यः शब्दः कृतकत्वाद्धटवदिति अप्रदर्शितान्वयः ॥ ६७ ॥

अनित्यः शब्दः कृतकत्वात्, यदनित्यं तत्कृतकं घटवदिति विपरीतान्वयः ॥ ६८ ॥ वैधर्म्येणापि दृष्टान्ताभासो नवधा ॥ ६९ ॥

असिद्धसाध्यव्यतिरेकोऽसिद्धसाधनव्यतिरेकोऽसिद्धोभयव्यतिरेकः, सन्दिग्धसाध्यव्यतिरेकः, सन्दिग्धसाधनव्यतिरेकः, सन्दिग्धोभयव्यतिरेकः, अव्यतिरेकोऽप्रदर्शितव्यतिरेको विपरीतव्यतिरेकश्च॥ ७० ॥

तेषु भ्रान्तमनुमानं प्रमाणत्वात् यत्पुनर्भ्रान्तं न भवति न तत्प्रमाणं यथा स्वप्नज्ञानमिति असिद्धसाध्यव्यतिरेकः स्वप्नज्ञानाद्भ्रान्तत्वस्यानिवृत्तेः

निर्विकल्पकं प्रत्यक्षं प्रमाणत्वात् यत्तु सविकल्पकं न तत्प्रमाणं यथा लैङ्गिकमित्यसिद्धसाधनव्यतिरेको लैङ्गिकात्प्रमाणत्वस्यानिवृत्तेः ७२

नित्यानित्यः शब्दः सत्त्वात्, यस्तु न नित्यानित्यः स न सँस्त द्यथा स्तंभ इति असिद्धोभयव्यतिरेकः स्तम्भान्नित्यानित्यत्वस्य सत्त्वस्य चाव्यावृत्तेः

असर्वज्ञोऽनाप्तो वा कपिलोऽक्षणिकैकान्तवादित्वात् यः सर्वज्ञ आप्तो वा स क्षणिकैकान्तवादी यथा सुगत इति सन्दिग्धसाध्य व्यतिरेकः सुगतेऽसर्वज्ञताऽनाप्तत्वयोः साध्यधर्मयोर्व्यावृत्तेः सन्देहात् ॥ ७४ ॥

अनादेयवचनः कश्चिद्विवक्षितः पुरुषो रागादिमत्त्वात् यः पुनरादेय-वचनः स वीतरागस्तद्यथा-शौद्धोदनिरिति सन्दिग्धसाधनव्यतिरेकः शौद्धोदनौ रागादिमत्त्वस्य निवृत्तेः संशयात् ॥ ७५ ॥

न वीतरागः कपिलः करुणास्पदेष्वपि परमकृपयाऽनर्पितनिजपिशित-शकलत्वात्। यस्तु वीतरागः स करुणास्पदेषु परमकृपया-समर्पितनिज- पिशितशकलस्तद्यथा तपनबन्धुरितिसन्दिग्धोभय-व्यतिरेकः तपनबन्धौ वीतरागत्वाभावस्य करुणास्पदेष्वपि-परमकृपयानर्पितनिजपिशितश- कलवत्त्वस्य च व्यावृत्तेः सन्देहात् ॥ ७६

न वीतरागः कश्चिद्विवक्षितः पुरुषो वक्तृत्वाद्यः पुनर्वीतरागो न स वक्ता यथोपलखण्ड इत्यव्यतिरेकः ॥ ७७ ॥

अनित्यः शब्दः कृतकत्वात् आकाशवदित्यप्रदर्शितव्यतिरेकः ७८ ॥

अनित्यः शब्दः कृतकत्वात् यदकृतकं तन्नित्यं यथाकाशमिति विपरीत- व्यतिरेकः ॥ ७९ ॥

उक्तलक्षणोल्लङ्घनेनोपनयनिगमनयोर्वचने तदाभासौ ॥ ८० ॥

यथा परिणामी शब्दः कृतकत्वात् । यः कृतकः स परिणामी यथा कुम्भः इत्यत्र परिणामी च शब्द इति कृतकश्च कुम्भ इति च ॥ ८१

तस्मिन्नेव प्रयोगे तस्मात्कृतकः शब्द इति तस्मात्परिणामी कुम्भ इतिं च

अनाप्तवचनप्रभवं ज्ञानमागमाभासम् ॥ ८३ ॥

यथा मेकलकन्यकायाः कूले तालहिन्तालयोर्मूले सुलभाः पिण्डखर्जूराः सन्ति त्वरितं गच्छत गच्छत शावकाः ॥ ८४ ॥

प्रत्यक्षमेवैकं प्रमाणमित्यादिसङ्ख्यानं तस्य सङ्ख्याभासम् ॥ ८५ ॥

सामान्यमेव विशेष एव तद् द्वयं वा स्वतन्त्रमित्यादिस्तस्य विषयाभासः

*अभिन्नमेव भिन्नमेव वा* प्रमाणात्फलं तस्य तदाभासम् ॥ ८७ ॥

नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः ॥ १ ॥

स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः ॥ २ ॥

स व्याससमासाभ्यां द्विप्रकारः ॥ ३ ॥ व्यासतोऽनेकविकल्पः ॥ ४ ॥

समासतस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्च ॥ ५ ॥

आद्यो नैगमसंग्रहव्यवहारभेदात् त्रेधा ॥ ६ ॥

धर्मयोर्धर्मिणो धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः ॥ ७ ॥ सच्चैतन्यमात्मनीति धर्मयोः ॥ ८ ॥

वस्तु पर्यायवद् द्रव्यं इति धर्मिणोः ॥ ९ ॥

क्षणमेकं सुखी विषयासक्तजीव इति तु धर्मधर्मिणोः ॥ १० ॥

धर्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धिर्नैगमाभासः ॥ ११ ॥

यथात्मनि सत्त्वचैतन्ये परस्परमत्यन्तपृथग्भूते इत्यादि ॥ १२ ॥

सामान्यमात्रग्राही परामर्शः सङ्ग्रहः ॥ १३ ॥

अयमुभयविकल्पः परोऽपरश्च ॥ १४ ॥

अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परः सङ्ग्रहः ॥ १५ ॥

विश्वमेकं सदविशेषादिति यथा ॥ १६ ॥

सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणस्तदाभासः ॥ १७ ॥

यथा सत्तैव तत्त्वं ततः पृथग्भूतानां विशेषाणामदर्शनात् ॥ १८ ॥

द्रव्यत्वादीनि अवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसङ्ग्रहः ॥ १९ ॥

धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामैक्यं द्रव्यत्वाभेदादित्यादिर्यथा द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभासः ॥ २१ ॥

यथा द्रव्यत्वमेव तत्त्वं ततोऽर्थान्तरभूतानां द्रव्याणामनुपलब्धेरित्यादि

सङ्ग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः ॥ २३ ॥

यथा यत्सत्तद्द्रव्यं पर्यायो वेत्यादि ॥ २४ ॥

यः पुनरपारमार्थिकं द्रव्यपर्यायप्रविभागमभिप्रैति स व्यवहाराभासः २५

यथा चार्वाकदर्शनम् ॥ २६ ॥

पर्यायार्थिकश्चतुर्धा ऋजुसूत्रः शब्दः समभिरूढ एवम्भूतश्च ॥ २७ ॥

ऋजु वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्राय ऋजुसूत्रः

यथा सुखविवर्तः सम्प्रत्यस्तीत्यादि ॥ २९ ॥

सर्वथा द्रव्यापलापी तदाभासः ॥ ३० ॥ यथा तथागतमतम् ॥ ३१ ॥

कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ॥ ३२ ॥

यथा बभूव भवति भविष्यति सुमेरुरित्यादि ॥ ३३ ॥

तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः ॥ ३४ ॥

यथा बभूव भवति भविष्यति सुमेरुरित्यादयो भिन्नकालाः शब्दा भिन्नमेवार्थमभिदधति भिन्नकालशब्दत्वात्तादृक्सिद्धान्यशब्दवदित्यादि

पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थमभिरोहन् समभिरूढः ॥ ३६ ॥

इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात्पुरन्दर इत्यादिषु यथा ॥ ३७ ॥

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः ॥ ३८ ॥

यथेन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा भिन्नाभिधेया एव भिन्नशब्दत्वात् करिकुरङ्गतुरङ्गशब्दवदित्यादि ॥ ३९ ॥

शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियादिविशष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्ने-
वम्भूतः ॥ ४० ॥

यथेन्दनमनुभवन्निन्द्रः शकनक्रियापरिणतः शक्रः पूर्दारणप्रवृत्तः पुरन्दर
इत्युच्यते ॥ ४१ ॥

क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षपँस्तु तदाभासः ॥ ४२ ॥

यथा विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं घट शब्दप्रवृत्ति-
निमित्तभूतक्रियाशून्यत्वात् पटवदित्यादि ॥ ४३ ॥

एतेषु चत्वारः प्रथमेऽर्थनिरूपणप्रवणत्वादर्थनयाः ॥ ४४ ॥

शेषास्त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥ ४५ ॥

पूर्वःपूर्वो नयः प्रचुरगोचरः परः परस्तु परिमितविषयः ॥ ४६ ॥

सन्मात्रागोचरात् सङ्ग्रहान्नैगमो भावाभावभूमिकत्वाद्भूमविषयः॥ ४७ ॥

सद्विशेषप्रकाशकाद्व्यवहारतः सङ्ग्रहःसमस्तसमूहोपदर्शकत्वाद्-
बहुविषयः ॥ ४८ ॥

वर्त्तमानविषयादृजुसूत्राद्व्यवहारस्त्रिकालविषयावलम्बित्वादनल्पार्थः ४९

कालादिभेदेन भिन्नार्थोपदर्शिनः शब्दादृजुसूत्रस्तद्विपरीतवेदकत्वा-
न्महार्थः ॥ ५० ॥

प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययानुया-
यित्वात्प्रभूतविषयः ॥ ५१ ॥

प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवम्भूतात् समभिरूढस्तदन्यार्थ-
स्थापकत्वान्महागोचरः ॥ ५२ ॥

नयवाक्यमपि स्वविषये प्रवर्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजति

प्रमाणवदस्य फलं व्यवस्थापनीयम् ॥ ५४ ॥

प्रमाता प्रत्यक्षादिसिद्ध आत्मा ॥ ५५ ॥

चैतन्यस्वरूपः परिणामी कर्ता साक्षाद्भोक्ता स्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्‌गलिकादृष्टवांश्चायम् ॥ ५६ ॥

तस्योपात्तपुंस्त्रीशरीरस्य सम्यग्ज्ञानक्रियाभ्यां कृत्स्नकर्मक्षयस्वरूपा सिद्धिः ॥ ५७ ॥

## अष्टमः परिच्छेदः

विरुद्धयोर्धर्मयोरेकधर्मव्यवच्छेदेन स्वीकृततदन्यधर्मव्यवस्थापनार्थं साधनदूषणवचनं वादः ॥ १ ॥

प्रारम्भकश्चात्र जिगीषुस्तत्त्वनिर्णिनीषुश्च ॥ २ ॥

स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां परं पराजेतुमिच्छुर्जिगीषुः

तथैव तत्त्वं प्रतितिष्ठापयिषुस्तत्त्वनिर्णिनीषुः ॥ ४ ॥

अयं च द्वेधा स्वात्मनि परत्र च ॥ ५ ॥

आद्यः शिष्यादिः ॥ ६ ॥ द्वितीयो गुर्वादिः ॥ ७ ॥

अयं द्विविधः क्षायोपशमिकज्ञानशाली केवली च ॥ ८ ॥

एतेन प्रत्यारम्भकोऽपि व्याख्यातः ॥ ९ ॥

तत्र प्रथमे प्रथमतृतीयतुरीयाणां चतुरङ्ग एव, अन्यतमस्याप्यङ्गस्यापाये जयपराजयव्यवस्थादिदौःस्थ्यापत्तेः ॥ १० ॥

द्वितीये तृतीयस्य कदाचिद् द्व्यङ्गः कदाचित् त्र्यङ्गः ॥ ११ ॥

तत्रैव द्व्यङ्गस्तुरीयस्य ॥ १२ ॥

तृतीये प्रथमादीनां यथायोगं पूर्ववत् ॥ १३ ॥

तुरीये प्रथमादीनामेवम् ॥ १४ ॥

वादिप्रतिवादिसभ्यसभापतयश्चत्वार्यङ्गानि ॥ १५ ॥

आरम्भकप्रत्यारम्भकावेव मल्लप्रतिमल्लन्यायेन वादिप्रतिवादिनौ १६ ॥

प्रमाणतः स्वपक्षस्थापनप्रतिपक्षप्रतिक्षेपावनयोःकर्म्म ॥ १७ ॥

वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्वधारणाबाहुश्रुत्यप्रतिभा- क्षान्तिमाध्य स्थ्यैरुभयाभिमताःसभ्याः ॥ १८ ॥

वादिप्रतिवादिनोर्यथायोगं वादस्थानककथाविशेषाङ्गीकारेणाग्रवा दोत्तरवादनिर्देशः साधकबाधकोक्तिगुणदोषावधारणं यथावसरं तत्त्वप्रकाशनेन कथाविरमणम् यथासम्भवं सभायां कथाफलकथनं चैषां कर्माणि

प्रज्ञाज्ञैश्वर्यक्षमामाध्यस्थ्यसम्पन्नः सभापतिः ॥ २० ॥

वादिसभ्याभिहितावधारणं कलहव्यपोहादिकं चास्य कर्म ॥ २१ ॥

सजिगीषुकेऽस्मिन्यावत्सभ्यापेक्षं स्फूर्तौ वक्तव्यम् ॥ २२ ॥

उभयोस्तत्त्वनिर्णिनीषुत्वे यावत्तत्त्वनिर्णयं यावत्स्फूर्ति च वाच्यम् २३

पू.आ.श्रीहेमचन्द्रसूरिविरचिता

# ॥ अयोगव्यवच्छेदद्वात्रिंशिका ॥

अगम्यमध्यात्मविदामवाच्यं, वचस्विनामक्षवतां परोक्षम् ।
श्रीवर्द्धमानाभिधमात्मरूपमहं स्तुतेर्गोचरमानयामि ॥ १ ॥

स्तुतावशक्तिस्तव योगिनां न किं, गुणानुरागस्तु ममापि निश्चलः ।
इदं विनिश्चित्य तव स्तवं वदन्, न बालिशोऽप्येष जनोऽपराध्यति

क्व सिद्धसेनस्तुतयो महार्था ?, अशिक्षितालापकला क्व चैषा ?
तथापि यूथाधिपतेः पथिस्थः, स्खलद्गतिस्तस्य शिशुर्न शोच्यः ३

जिनेन्द्र ! यानेव विबाधसे स्म, दुरन्तदोषान् विविधैरुपायैः ।
त एव चित्रं त्वदसूययेव, कृताः कृतार्थाः परतीर्थनाथैः ॥ ४ ॥

यथास्थितं वस्तु दिशन्नधीश !, न तादृशं कौशलमाश्रितोऽसि ।
तुरङ्गशृङ्गाण्युपपादयद्भ्यो, नमः परेभ्यो नवपण्डितेभ्यः ॥ ५ ॥

जगत्यनुध्यानबलेन शश्वत्, कृतार्थयत्सु प्रसभं भवत्सु ।
किमाश्रितोऽन्यैः शरणं त्वदन्यः, स्वमांसदानेन वृथा कृपालुः ६ ॥

स्वयं कुमार्गंलपिता नु नाम, प्रलम्भमन्यानपि लम्भयन्ति ।
सुमार्गगं तद्विदमादिशन्तमसूययाऽन्धा अवमन्वते च ॥ ७ ॥

प्रादेशिकेभ्यः परशासनेभ्यः, पराजयो यत्तव शासनस्य ।
खद्योतपोतद्युतिडम्बरेभ्यो, विडम्बनेयं हरिमण्डलस्य ॥ ८ ॥

शरण्य ! पुण्ये तव शासनेऽपि, संदेग्धि यो विप्रतिपद्यते वा ।
स्वादौ स तथ्ये स्वहिते च पथ्ये, संदेग्धि वा विप्रतिपद्यते वा ९

हिंसाद्यसत्कर्मपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः ।
नृशंसदुर्बुद्धिपरिग्रहाच्च, ब्रूमस्त्वदन्यागममप्रमाणम् ॥ १० ॥

हितोपदेशात् सकलज्ञक्लृप्तेर्मुमुक्षुसत्साधुपरिग्रहाच्च ।
पूर्वापरार्थेष्वविरोधसिद्धेस्त्वदागमा एव सतां प्रमाणम् ॥ ११ ॥

क्षिप्येत वाऽन्यैः सदृशीक्रियेत वा, तवाङ्घ्रिपीठे लुठनं सुरेशितुः ।
इदं यथावस्थितवस्तुदेशनं, परैः कथङ्कारमपाकरिष्यते ? ॥ १२ ॥

तद्दुःषमाकालखलायितं वा, पचेलिमं कर्म भवानुकूलम् ।
उपेक्षते यत्तव शासनार्थमयं जनो विप्रतिपद्यते वा ॥ १३ ॥

परःसहस्राः शरदस्तपांसि, युगान्तरं योगमुपासतां वा ।
तथापि ते मार्गमनापतन्तो, न मोक्ष्यमाणा अपि यान्ति मोक्षम् १४

अनाप्तजाड्यादिविनिर्मितित्व-सम्भावनासम्भविविप्रलम्भाः ।
परोपदेशाः परमाप्तक्लृप्त-पथोपदेशे किमु संरभन्ते ? ॥ १५ ॥

यदार्जवादुक्तमयुक्तमन्यैस्तदन्यथाकारमकारि शिष्यैः ।
न विप्लवोऽयं तव शासनेऽभूदहो ! अघृष्या तव शासनश्रीः१६ ॥

देहाद्ययोगेन सदाशिवत्वं, शरीरयोगादुपदेशकर्म ।
परस्परस्पर्धि कथं घटेत, परोपक्लृप्तेष्वधिदैवतेषु ॥ १७ ॥

प्रागेव देवान्तरसंश्रितानि, रागादिरूपाण्यवमान्तराणि ।
न मोहजन्यां करुणामपीश !, समाधिमाध्यस्थ्ययुगाश्रितोऽसि १८ ॥

जगन्ति भिन्दन्तु सृजन्तु वा पुनर्यथा तथा वा पतयः प्रवादिनाम् ।
त्वदेकनिष्ठे भगवन् ! भवक्षयक्षमोपदेशे तु परं तपस्विनः॥ १९ ॥

वपुश्च पर्यङ्कशयं श्लथं च, दृशौ च नासानियते स्थिरे च ।
न शिक्षितेयं परतीर्थनाथैर्जिनेन्द्र ! मुद्राऽपि तवान्यदास्ताम्॥ २० ॥

यदीयसम्यक्त्वबलात् प्रतीमो, भवादृशानां परमस्वभावम् ।
कुवासनापाशविनाशनाय, नमोऽस्तु तस्मै तव शासनाय ॥ २१ ॥

अपक्षपातेन परीक्षमाणा, द्वयं द्वयस्याप्रतिमं प्रतीमः ।
यथास्थितार्थप्रथनं तवैतदस्थाननिर्बन्धरसं परेषाम् ॥ २२ ॥

अनाद्यविद्योपनिषन्निषण्णैर्विशृङ्खलैश्चापलमाचरद्भिः ।
अमूढलक्ष्योऽपि पराक्रिये यत्, त्वत्किङ्करः किं करवाणि देव ! २३

विमुक्तवैरव्यसनानुबन्धाः, श्रयन्ति यां शाश्वतवैरिणोऽपि ।
परैरगम्यां तव योगिनाथ !, तां देशनाभूमिमुपाश्रयेऽहम् ॥ २४ ॥

मदेन मानेन मनोभवेन, क्रोधेन लोभेन च सम्मदेन ।
पराजितानां प्रसभं सुराणां, वृथैव साम्राज्यरुजा परेषाम् ॥ २५ ॥

स्वकण्ठपीठे कठिनं कुठारं, परे किरन्तः प्रलपन्तु किञ्चित् ।
मनीषिणां तु त्वयि वीतराग !, न रागमात्रेण मनोऽनुरक्तम्॥ २६ ॥

सुनिश्चितं मत्सरिणो जनस्य, न नाथ ! मुद्रामतिशेरते ते ।
माध्यस्थ्यमास्थाय परीक्षका ये, मणौ च काचे च समानुबन्धाः २७

इमां समक्षं प्रतिपक्षसाक्षिणामुदारघोषामवघोषणां ब्रुवे ।
न वीतरागात् परमस्ति दैवतं, न चाप्यनेकान्तमृते नयस्थितिः२८ ॥

न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमात्रादरुचिः परेषु ।
यथावदाप्तत्वपरीक्षया तु, त्वामेव वीर ! प्रभुमाश्रिताः स्मः २९ ॥

तमःस्पृशामप्रतिभासभाजं, भवन्तमप्याशु विविन्दते याः ।
महेम चन्द्रांशुदृशावदातास्तास्तर्कपुण्या जगदीश ! वाचः ॥ ३० ॥

यत्र तत्र समये यथा तथा, योऽसि सोऽस्यभिधया यया तया ।
वीतदोषकलुषः स चेद्भवानेक एव भगवन् ! नमोऽस्तु ते ३१ ॥

इदं श्रद्धामात्रं तदथ परनिन्दां मृदुधियो,
विगाहन्तां हन्त ! प्रकृतिपरवादव्यसनिनः ।
अरक्तद्विष्टानां जिनवर ! परीक्षाक्षमधिया-
मयं तत्त्वालोकः स्तुतिमयमुपाधिं विधृतवान् ॥ ३२ ॥

पू.आ.श्रीहेमचन्द्रसूरिविरचिता

## ॥ अन्ययोगव्यवच्छेदद्वात्रिंशिका ॥

अनन्तविज्ञानमतीतदोषमबाध्यसिद्धान्तममर्त्यपूज्यम् ।
श्रीवर्द्धमानं जिनमाप्तमुख्यं, स्वयम्भुवं स्तोतुमहं यतिष्ये ॥ १ ॥

अयं जनो नाथ ! तव स्तवाय, गुणान्तरेभ्यः स्पृहयालुरेव ।
विगाहतां किन्तु यथार्थवादमेकं परीक्षाविधिदुर्विदग्धः ॥ २ ॥

गुणेष्वसूयां दधतः परेऽमी, मा शिश्रियन्नाम भवन्तमीशम् ।
तथापि सम्मील्य विलोचनानि, विचारयन्तां नयवर्त्म सत्यम् ३ ॥

स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो, भावा न भावान्तरनेयरूपाः ।
परात्मतत्त्वादतथात्मतत्त्वाद्, द्वयं वदन्तोऽकुशलाः स्खलन्ति॥ ४ ॥

आदीपमाव्योम समस्वभावं, स्याद्वादमुद्राऽनतिभेदि वस्तु ।
तन्नित्यमेवैकमनित्यमन्यदिति त्वदाज्ञाद्विषतां प्रलापाः ॥ ५ ॥

कर्त्ताऽस्ति कश्चिज्जगतः स चैकः, स सर्वगः स स्ववशः स नित्यः
इमाः कुहेवाकविडम्बनाः स्युस्तेषां न येषामनुशासकस्त्वम् ॥ ६ ॥

न धर्मधर्मित्वमतीवभेदे, वृत्त्याऽस्ति चेन्न त्रितयं चकास्ति ।
इहेदमित्यस्ति मतिश्च वृत्तौ, न गौणभेदोऽपि च लोकबाधः॥ ७ ॥

सतामपि स्यात् क्वचिदेव सत्ता, चैतन्यमौपाधिकमात्मनोऽन्यत् ।
न संविदानन्दमयी च मुक्तिः सुसूत्रमासूत्रितमत्वदीयैः ॥ ८ ॥

यत्रैव यो दृष्टगुणः स तत्र, कुम्भादिवन्निष्प्रतिपक्षमेतत् ।
तथापि देहाद् बहिरात्मतत्त्वमतत्त्ववादोपहताः पठन्ति ॥ ९ ॥

स्वयं विवादग्रहिले वितण्डापाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।
मायोपदेशात् परमर्म भिन्दन्नहो ! विरक्तो मुनिरन्यदीयः ॥ १० ॥

न धर्महेतुर्विहिताऽपि हिंसा, नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सासब्रह्मचारि स्फुरितं परेषाम् ॥ ११ ॥

स्वार्थावबोधक्षम एव बोधः प्रकाशते नार्थकथाऽन्यथा तु ।
परे परेभ्यो भयतस्तथापि, प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥ १२ ॥

माया सती चेद् द्वयतत्त्वसिद्धिरथासती हन्त ! कुतः प्रपञ्चः ।
मायैव चेदर्थसहा च तत्किं, माता च वन्ध्या च भवत्परेषाम् ?

अनेकमेकात्मकमेव वाच्यं, द्वयात्मकं वाचकमप्यवश्यम् ।
अतोऽन्यथावाचकवाच्यक्लृप्तावतावकानां प्रतिभाप्रमादः ॥ १४ ॥

चिदर्थशून्या च जडा च बुद्धिः, शब्दादितन्मात्रजमम्बरादि ।
न बन्धमोक्षौ पुरुषस्य चेति, कियज्जडैर्न ग्रथितं विरोधि॥ १५ ॥

न तुल्यकालः फलहेतुभावो, हेतौ विलीने न फलस्य भावः ।
न संविदद्वैतपथेऽर्थसंविद्, विलूनशीर्णं सुगतेन्द्रजालम् ॥ १६ ॥

विना प्रमाणं परवन्न शून्यः, स्वपक्षसिद्धेः पदमश्नुवीत ।
कुप्येत् कृतान्तः स्पृशते प्रमाणमहो ! सुदृष्टं त्वदसूयिदृष्टम्॥ १७ ॥

कृतप्रणाशाऽकृतकर्मभोगभवप्रमोक्षस्मृतिभङ्गदोषान् ।
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छन्नहो ! महासाहसिकः परस्ते॥ १८ ॥

सा वासना सा क्षणसन्ततिश्च, नाभेदभेदाऽनुभयैर्घटेते ।
ततस्तटाऽदर्शिशकुन्तपोतन्यायात् त्वदुक्तानि परे श्रयन्तु ॥ १९ ॥

विनाऽनुमानेन पराभिसन्धिमसंविदानस्य तु नास्तिकस्य ।
न साम्प्रतं वक्तुमपि क्व चेष्टा, क्व दृष्टमात्रं च हहा ! प्रमादः

प्रतिक्षणोत्पादविनाशयोगिस्थिरैकमध्यक्षमपीक्षमाणः ।
जिन ! त्वदाज्ञामवमन्यते यः, स वातकी नाथ ! पिशाचकी वा

अनन्तधर्मात्मकमेव तत्त्वमतोऽन्यथा सत्त्वमसूपपादम् ।
इति प्रमाणान्यपि ते कुवादिकुरङ्गसन्त्रासनसिंहनादाः ॥ २२ ॥

अपर्ययं वस्तु नमस्यमानमद्रव्यमेतच्च विविच्यमानम् ।
आदेशभेदोदितसप्तभङ्गमदीदृशस्त्वं बुधरूपवेद्यम् ॥ २३ ॥

उपाधिभेदोपहितं विरुद्धं, नार्थेष्वसत्त्वं सदवाच्यते च ।
इत्यप्रबुध्यैव विरोधभीता, जडास्तदेकान्तहताः पतन्ति ॥ २४ ॥

स्यान्नाशि नित्यं सदृशं विरूपं, वाच्यं न वाच्यं सदसत्तदेव ।
विपश्चितां नाथ ! निपीततत्त्वसुधोद्गतोद्गारपरम्परेयम् ॥ २५ ॥

य एव दोषाः किल नित्यवादे, विनाशवादेऽपि समास्त एव ।
परस्परध्वंसिषु कण्टकेषु, जयत्यधृष्यं जिन ! शासनं ते ॥ २६ ॥

नैकान्तवादे सुखदुःखभोगौ, न पुण्यपापे न च बन्धमोक्षौ ।
दुर्नीतिवादव्यसनासिनैवं, परैर्विलुप्तं जगदप्यशेषम् ॥ २७ ॥

सदेव सत् स्यात्सदिति त्रिधाऽर्थो, मीयेत दुर्नीतिनय-प्रमाणैः ।
यथार्थदर्शी तु नयप्रमाणपथेन दुर्नीतिपथं त्वमाऽऽस्थः ॥ २८ ॥

मुक्तोऽपि वाऽभ्येतु भवं भवो वा, भवस्थशून्योऽस्तु मितात्मवादे ।
षड्जीवकायं त्वमनन्तसङ्ख्यमाख्यस्तथा नाथ ! यथा न दोषः२९ ॥

अन्योऽन्यपक्षप्रतिपक्षभावाद्, यथा परे मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छन्, न पक्षपाती समयस्तथा ते ॥ ३० ॥

वाग्वैभवं ते निखिलं विवेक्तुमाशास्महे चेन्महनीयमुख्य ।
लङ्घेम जङ्घालतया समुद्रं, वहेम चन्द्रद्युतिपानतृष्णाम् ॥ ३१ ॥

इदं तत्त्वाऽतत्त्वव्यतिकरकरालेऽन्धतमसे,
जगन्मायाकारैरिव हतपरैर्हा ! विनिहितम्
तदुद्धर्त्तुं शक्तो नियतमविसंवादिवचन-
स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः ॥ ३२ ॥

चान्द्रकुलनभोमणिप्रद्युम्नसूरिशिष्यचन्द्रसेनसूरिविरचिता

## ॥ उत्पादादिसिद्धिः ॥

यस्योत्पादव्ययध्रौव्य-युक्तवस्तूपदेशतः ।
सिद्धमाप्तस्वभावत्वं, तस्मै सर्वविदे नमः ॥ १ ॥

यदुत्पादव्ययध्रौव्य-योगितां न बिभर्ति वै ।
तादृशं शशशृङ्गादि-रूपमेव परं यदि ॥ २ ॥

न यत्सत्ताभिसम्बन्धा-न्न शक्तेर्नोपलब्धितः ।
विनोत्पादव्ययध्रौव्यै-र्वस्तुत्वमुपपद्यते ॥ ३ ॥

उत्पादो वस्तुनो भावो, नाशस्तस्य व्ययो मतः ।
ध्रौव्यमन्वितरूपत्व-मेकं नान्योन्यवर्जितम् ॥ ४ ॥

अविनाभावि यद्येन, न तत्तेन विरुध्यते ।
वृक्षत्वेनेव चूतत्व-मिहाप्येवं व्यवस्थितिः ॥ ५ ॥

नाशतः सर्वथा भावो, न नाशः सर्वथा सतः ।
नान्वयोऽपि विनैताभ्यां, प्रमाणे प्रतिभासते ॥ ६ ॥

उत्पादो यदि दृष्टत्वा-दिष्टः प्रामाणिकैः परैः ।
तद्रूपपरिणामोऽयं, तदेष्टव्यस्ततो न किम् ॥ ७ ॥

यदसत्तन्न केनापि, क्रियते वियदब्जवत् ।
उपादानं न चेह स्यात्, सर्वं सर्वत्र वा भवेत् ॥ ८ ॥

कार्यकारणभावादि-व्यवस्थाप्यत्र दुर्घटा ।
शक्तीनां नियमोऽप्येष, स्यात्सत्त्वेन विना कथम् ॥ ९ ॥

भिन्नो भावादभिन्नो वा, नाशः किं वा स एव न? ।
भेदे वस्तूपलभ्येत, तादवस्थ्यप्रसङ्गतः ॥ १० ॥

अभेदे भाव एवाय-मभावः केवलोऽथवा ।
ततः सहावभासेत, भावो यद्वा कदाऽपि न ॥ ११ ॥

अभावेऽपि च नाशस्य, वक्तुमेतदसाम्प्रतम् ।
न तस्य किञ्चिद्भवति, न भवत्येव केवलम् ॥ १२ ॥

विद्युदाद्यपि नात्यन्तं, नाशित्वेन प्रकाशते ।
अन्धकाराद्युपादान-भावेनास्यैव सम्भवात् ॥ १३ ॥

न चैवं तस्य रूपस्य, नाशे पूर्वसमुद्भवः ।
तदन्यस्यापि तन्नाशस्वभावस्य प्रसूतितः ॥ १४ ॥

कर्मतत्फलसम्बन्ध-बन्धमोक्षाद्यसङ्गतिः ।
स्फुटैव सर्वथोच्छेदे, सन्तानः स्वः परो न वा ? ॥ १५ ॥

इन्द्रियाधीनजन्मेय-मभेदग्राहिणी मतिः ।
प्रामाण्यं बाधवैकल्या-दश्नुते भेदबुद्धिवत् ॥ १६ ॥

यदभेदस्य भेदेन, भवनं सोऽयमन्वयः ।
एकान्तेन न नित्यत्वं, प्रमाणानुपपत्तितः ॥ १७ ॥

भावा ज्ञेयस्वभावाश्चे-न्नित्यं तज्ज्ञानसम्भवः ।
त(अ) थाज्ञेयस्वभावास्ते, कदा तज्ज्ञानसम्भवः ? ॥ १८ ॥

सहकारिव्यपेक्षाऽपि, नित्यैकान्ते न युज्यते ।
नाधेयं नापनेयं वा, रूपं तैस्तस्य किञ्चन ॥ १९ ॥

वस्तुतोऽचिन्त्यशक्तित्वादे(त्वमे)व चेदिष्यते परैः ।
द्रव्यरूपस्य पर्यायै-रैक्यं दृष्टं न किं मतम् ? ॥ २० ॥

न हि द्रव्यातिरेकेण, पर्यायाः सन्ति केचन ।
द्रव्यमेव ततः सत्यं, भ्रान्तिरन्या तु चित्रवत् ॥ २१ ॥

पर्यायव्यतिरेकेण, द्रव्यं नास्तीह किञ्चन ।
भेद एव ततः सत्यो, भ्रान्तिस्तद्ध्रौव्यकल्पना ॥ २२ ॥

नाभेदमेव पश्यामो, भेदं नापि च केवलम् ।
जात्यन्तरं तु पश्याम-स्तेनानेकान्तसाधनम् ॥ २३ ॥

सुखदुःखादिसम्बन्धो, युज्यते कथमन्यथा ? ।
व्यर्थः श्रमस्ततोऽन्येषां, दुस्तर्काकुलचेतसाम् ॥ २४ ॥

ननूत्पादादयो धर्मा, भिन्नाः स्युर्धर्मिणो यदा ।
नीरूपत्वं तदा तस्य, वाच्यं वा लक्षणान्तरम् ॥ २५ ॥

अभेदे युक्तता न स्यात्, अस्याभेदव्यपेक्षणात् ।
सम्बन्धशब्दो नायं यद्, न·द्वयेन विना स तु ॥ २६ ॥

किं चोत्पादादियोगित्व-मुत्पादादेर्यदेष्यते ।
अनवस्था तदा मृग्यं, तेनान्यद्वस्तुलक्षणम् ॥ २७ ॥

सत्त्वं हि वस्तुनो रूपं, सदिति प्रत्ययो यतः ।
सत्त्वरूपवियोगेन, नोत्पादादेरपि स्थितिः ॥ २८ ॥

यदुत्पादव्ययध्रौव्य-युक्तं तेभ्यः परं न तत् ।
किन्त्वभेदांशमाश्रित्य, तेषामेव तथा स्थितिः ॥ २९ ॥

भिन्नशब्दप्रवृत्तिश्च, भेदांशस्यापि सम्भवात् ।
निरपेक्षौ न चान्योऽन्यं, भेदाभेदाविमौ क्वचित् ॥ ३० ॥

वस्तुनस्तन्न नैरूप्यं, न चान्यदपि दूषणम् ।
सदिति प्रत्ययोऽप्येष, तत एवोपजायते ॥ ३१ ॥

बोधरूपादयोऽप्येतत्-त्रैरूप्याभेदवर्तिनः ।
कथञ्चित्तेन जैनेन्द्रं, सुदृशं वस्तुलक्षणम् ॥ ३२ ॥

पू.आ.श्रीहेमचन्द्रसूरिश्वरजीविरचितम्

## ॥ प्रमाणमीमांसायाः ॥

### प्रथम स्याध्यायस्य प्रथममाह्निकम्

अथ प्रमाणमीमांसा ॥ १ ॥ सम्यगर्थनिर्णयः प्रमाणम् ॥ २ ॥
स्वनिर्णयः सन्नप्यलक्षणम्, अप्रमाणेऽपि भावात् ॥ ३ ॥
ग्रहीष्यमाणग्राहिण इव गृहीतग्राहिणोऽपि नाप्रामाण्यम् ॥ ४ ॥
अनुभयत्रोभयकोटिस्पर्शी प्रत्ययः संशयः ॥ ५ ॥
विशेषानुल्लेख्यनध्यवसायः ॥ ६ ॥ अतस्मिंस्तदेवेति विपर्ययः ॥ ७ ॥
प्रामाण्यनिश्चयः स्वतः परतो वा ॥ ८ ॥ प्रमाणं द्विधा ॥ ९ ॥
प्रत्यक्षं परोक्षं च ॥ १० ॥
व्यवस्थान्यधीनिषेधानां सिद्धेः प्रत्यक्षेतरप्रमाणसिद्धिः ॥ ११ ॥
भावाभावात्मकत्वाद्वस्तुनो निर्विषयोऽभावः ॥ १२ ॥
विशदः प्रत्यक्षम् ॥ १३ ॥
प्रमाणान्तरानपेक्षेदन्तया प्रतिभासो वा वैशद्यम् ॥ १४ ॥
तत् सर्वथावरणविलये चेतनस्य स्वरूपाविर्भावो मुख्यं केवलम्१५ ॥
प्रज्ञातिशयविश्रान्त्यादिसिद्धेस्तत्सिद्धिः ॥ १६ ॥ बाधकाभावाच्च१७ ॥
तत्तारतम्येऽवधिमनःपर्यायौ च ॥ १८ ॥
विशुद्धिक्षेत्रस्वामिविषयभेदात् तद्भेदः ॥ १९ ॥
इन्द्रियमनोनिमित्तोऽवग्रहेहावायधारणात्मा सांव्यवहारिकम्॥ २० ॥

स्पर्शरसगन्धरूपशब्दग्रहणलक्षणानि स्पर्शनरसनघ्राणचक्षुः-
श्रोत्राणीन्द्रियाणि द्रव्यभावभेदानि ॥ २१ ॥

द्रव्येन्द्रियं नियताकाराः पुद्गलाः ॥ २२ ॥

भावेन्द्रियं लब्ध्युपयोगौ ॥ २३ ॥ सर्वार्थग्रहणं मनः ॥ २४ ॥

नार्थालोकौ ज्ञानस्य निमित्तमव्यतिरेकात् ॥ २५ ॥

अक्षार्थयोगे दर्शनानन्तरमर्थग्रहणमवग्रहः ॥ २६ ॥

अवगृहीतविशेषाकाङ्क्षणमीहा ॥ २७ ॥

ईहितविशेषनिर्णयोऽवायः ॥ २८ ॥ स्मृतिहेतुर्धारणा ॥ २९ ॥

प्रमाणस्य विषयो द्रव्यपर्यायात्मकं वस्तु ॥ ३० ॥

अर्थक्रियासामर्थ्यात् ॥ ३१ ॥ तल्लक्षणत्वाद्वस्तुनः ॥ ३२ ॥

पूर्वोत्तराकारपरिहारस्वीकारस्थितिलक्षणपरिणामेनास्यार्थक्रियोपपत्तिः ३३ ॥

फलमर्थप्रकाशः ॥ ३४ ॥ कर्मस्था क्रिया ॥ ३५ ॥

कर्तृस्था प्रमाणम् ॥ ३६ ॥ तस्यां सत्यामर्थप्रकाशसिद्धेः ॥ ३७ ॥

अज्ञाननिवृत्तिर्वा ॥ ३८ ॥

अवग्रहादीनां वा क्रमोपजनधर्माणां पूर्वं पूर्वं प्रमाणमुत्तरमुत्तरं
फलम् ॥ ३९ ॥ हानादिबुद्धयो वा ॥ ४० ॥

प्रमाणाद्भिन्नाभिन्नम् ॥ ४१ ॥ स्वपराभासी परिणाम्यात्मा प्रमाता ॥ ४२ ॥

## प्रथमस्याध्यायस्य द्वितीयमाह्निकम्

अविशदः परोक्षम् ॥ १ ॥

स्मृतिप्रत्यभिज्ञानोहानुमानागमास्तद्विधयः ॥ २ ॥

वासनोद्बोधहेतुका तदित्याकारा स्मृतिः ॥ ३ ॥

दर्शनस्मरणसम्भवं तदेवेदं तत्सदृशं तद्विलक्षणं
तत्प्रतियोगीत्यादिसङ्कलनं प्रत्यभिज्ञानम् ॥ ४ ॥

उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानम् ऊहः ॥ ५ ॥

व्याप्तिर्व्यापकस्य व्याप्ये सति भाव एव व्याप्यस्य वा तत्रैव भावः६ ॥

साधनात्साध्यविज्ञानम् अनुमानम् ॥ ७ ॥

तत् द्विधा स्वार्थं परार्थं च ॥ ८ ॥

स्वार्थं स्वनिश्चितसाध्याविनाभावैकलक्षणात् साधनात् साध्यज्ञानम्९ ॥

सहक्रमभाविनोः सहक्रमभावनियमोऽविनाभावः ॥ १० ॥

ऊहात् तन्निश्चयः ॥ ११ ॥

स्वभावः कारणं कार्यमेकार्थसमवायि विरोधि चेति पञ्चधा
साधनम् ॥ १२ ॥ सिषाधयिषितमसिद्धमबाध्यं साध्यं पक्षः ॥ १३ ॥

प्रत्यक्षानुमानागमलोकस्ववचनप्रतीतयो बाधाः ॥ १४ ॥

साध्यं साध्यधर्मविशिष्टो धर्मी, क्वचित्तु धर्मः ॥ १५ ॥

धर्मी प्रमाणसिद्धः ॥ १६ ॥ बुद्धिसिद्धोऽपि ॥ १७ ॥

न दृष्टान्तोऽनुमानाङ्गम् ॥ १८ ॥ साधनमात्रात् तत्सिद्धेः ॥ १९ ॥

स व्याप्तिदर्शनभूमिः ॥ २० ॥ स साधर्म्यवैधर्म्याभ्यां द्वेधा ॥ २१ ॥

साधनधर्मप्रयुक्तसाध्यधर्मयोगी साधर्म्यदृष्टान्तः ॥ २२ ॥

साध्यधर्मनिवृत्तिप्रयुक्तसाधनधर्मनिवृत्तियोगी वैधर्म्यदृष्टान्तः॥ २३ ॥

## द्वितिय स्वाध्यायस्य प्रथममाह्निकम्

यथोक्तसाधनाभिधानजः परार्थम् ॥१॥ वचनमुपचारात् ॥२॥

तद् द्वेधा ॥३॥ तथोपपत्त्यन्यथानुपपत्तिभेदात् ॥४॥

नानयोस्तात्पर्ये भेदः ॥ ५ ॥ अत एव नोभयोः प्रयोगः ॥ ६ ॥

विषयोपदर्शनार्थं तु प्रतिज्ञा ॥ ७ ॥

गम्यमानत्वेऽपि साध्यधर्माधारसन्देहापनोदाय
धर्मिणि पक्षधर्मोपसंहारवत् तदुपपत्तिः ॥ ८ ॥

एतावान् प्रेक्षप्रयोगः ॥ ९ ॥

बोध्यानुरोधात् प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चापि ॥ १० ॥

साध्यनिर्देशः प्रतिज्ञा ॥ ११ ॥

साधनत्वाभिव्यञ्जकविभक्त्यन्तं साधनवचनं हेतुः ॥ १२ ॥

दृष्टान्तवचनमुदाहरणम् ॥ १३ ॥

धर्मिणि साधनस्योपसंहार उपनयः ॥ १४ ॥ साध्यस्य निगमनम् १५ ॥

असिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥ १६ ॥

नासन्ननिश्चितसत्त्वो वाऽन्यथानुपपन्न इति सत्त्वस्यासिद्धौ सन्देहे
वाऽसिद्धः ॥ १७ ॥ वादिप्रतिवाद्युभयभेदाच्चैतद्भेदः ॥ १८ ॥

विशेष्यासिद्धादीनामेष्वेवान्तर्भावः ॥ १९ ॥

विपरीतनियमोन्यथैवोपपद्यऽमानो विरुद्धः ॥ २० ॥

नियमस्यासिद्धौ सन्देहे वाऽन्यथाप्युपपद्यमानोऽनैकान्तिकः॥ २१ ॥

साधर्म्यवैधर्म्याभ्यामष्टावष्टौ दृष्टान्ताभासाः ॥ २२ ॥

अमूर्तत्वेन नित्ये शब्दे साध्ये कर्मपरमाणुघटाः
साध्यसाधनोभयविकलाः ॥ २३ ॥

वैधर्म्येण परमाणुकर्माकाशाः साध्याद्यव्यतिरेकिणः ॥ २४ ॥

वचनाद्रागे रागान्मरणधर्मकिञ्चिज्ज्ञत्वयोः
सन्दिग्धसाध्याद्यन्वयव्यतिरेका रथ्यापुरुषादयः ॥ २५ ॥

विपरीतान्वयव्यतिरेकौ ॥ २६ ॥ अप्रदर्शितान्वयव्यतिरेकौ ॥ २७ ॥

साधनदोषोद्भावनं दूषणम् ॥ २८ ॥

अभूतदोषोद्भावनानि दूषणाभासा जात्युत्तराणि ॥ २९ ॥

तत्त्वसंरक्षणार्थं प्राश्निकादिसमक्षं साधनदूषणवदनं वादः ॥ ३० ॥

स्वपक्षस्य सिद्धिर्जयः ॥ ३१ ॥ असिद्धिः पराजयः ॥ ३२ ॥

स निग्रहो वादिप्रतिवादिनोः ॥ ३३ ॥

न विप्रतिपत्त्यप्रतिपत्तिमात्रम् ॥ ३४ ॥

नाऽप्यसाधनाङ्गवचनमदोषोद्भावने ॥ ३५ ॥

स्वेष्टार्थसाधकमबाधितं गूढपदसमूहात्मकं प्रसिद्धावयवोपेतं वाक्यं पत्रम् ॥ ३६ ॥

## द्वितीय स्याध्यायस्य द्वितीयमाह्निकम्

अतिरस्कृतान्य पक्षोऽभिप्रेत पदार्थाशग्राही ज्ञातुरभिप्रायो नयः॥ १ ॥

द्रव्यपर्यायान्यतरस्य उभयस्य वा गौण मुख्य भावेन प्ररुपण प्रवीणो नैगमः ॥ २ ॥

अनिष्पन्न पर्यायस्य संकल्पमात्र ग्राही नेगमः ॥ २ ॥

अभेदरूपतया वस्तुजातस्य संग्राहकःसंग्रहः ॥ ३ ॥

संग्रहग्रहीतार्थानां भेदरुपतया विधिपूर्वकं व्यावहरणं व्यवहारः॥ ४ ॥

वर्तमानमात्र पर्यायग्राही ऋजुसूत्रः ॥ ५ ॥

कालादि भेदेन शब्दस्य भिन्नार्थवाचकत्वेन अभ्युपगमपरः शब्दः ॥ ६ ॥

निरुक्ति भेदजन्य भिन्न पर्यायवाचकशब्दात् पदार्थनानात्व निरुपकः समभिरुढः ॥ ७ ॥

शब्दप्रवृत्ति निमित्त भूत क्रिया युक्तस्य अर्थस्य तच्छब्द वाच्यत्वेन प्ररुपक एवं भूतः ॥ ८ ॥

## द्वितीय स्याध्यायस्य तृतीयमाह्निकम्

संयोग-समवाय-वीशिष्टसामान्यान्यतमावच्छदेन नास्तीति प्रतीतिविषयोऽत्यन्ताभावः ॥ १ ॥

कार्याकारव्यावृत्तिमान् कार्यपूर्वपर्याय एव प्रागभवः [प्रतियोग्युपादाने कार्यप्राक्कालावच्छेदेन एतत्कार्यं भविष्यति इति प्रतीतिविषयत्वं प्रागभावः]

कार्यकारव्यावृत्तिमान् कार्योत्तरपर्यायोध्वंसः [प्रतियोग्युपादाने कार्योत्तर- कालावच्छेदेन एतत्कार्यं न उपलभ्यते (नष्टम्) इति प्रतीतिविषयत्वं ध्वंसः ॥ ३ ॥

स्वरूपावच्छेदन स्वरूपान्तरव्यव्छेदानोऽन्योऽन्यभावः ॥ ४ ॥

ज्ञानदर्शनचारित्रगुणवान् जीवात्मा ॥ ५ ॥

जडत्वे सति आत्मनो विभावदशाजनकत्त्वं कर्म ॥ ६ ॥

मिथ्यात्वाविरतिकषाययोगेन कर्मण आत्मना सह एकीभवनं कर्मबंधः ७

यथाध्यात्मम् असति सत्प्रकारिका बुद्धिः तत्कारणं वा मिथ्यात्वम् ८ ॥

षट्कायवधषडिन्द्रभ्यो यतनया अनिवर्तनं अविरतिः ॥ ९ ॥

जातिम्लानिवृद्धिप्रभतिधर्मवान् सजीवः ॥ १० ॥

प्रमादवशात् प्राणिपीडन्नं हिंसा ॥ १ ॥ [प्रमादयोगेन शुभसंकल्पाभावे इति प्राणव्यपरोपणं हिंसा ॥ ११ ॥]

रागद्वेषजन्यो मनसः परिणामः कषायः ॥ १२ ॥
[भवप्रयोजकाध्यवसायः कषायः]

आत्मपरिस्पन्दनप्रयोजकत्वं योगत्वम् ॥ १३ ॥

जिनवचनविषयकास्तिक्यप्रयोजकत्वं सम्यक्त्वम् ॥ १४ ॥

सम्यक्श्रद्धया यथावस्थितपदार्थावगमः सम्यग्ज्ञानम् ॥ १५ ॥

ज्ञपारिज्ञापूर्वकः पापव्यापारपरिहारः संयमः ॥ १६ ॥

उपाधिमात्रध्वंसो मोक्षः ॥ १७ ॥

आचार्यप्रवरश्रीदेवभद्रसूरिसूत्रितः

# ॥ प्रमाणप्रकाशः ॥

सन्न्यायनगरारम्भमूलसूत्रसनाभयः ।
श्रीनाभेयस्य नन्द्यासुर्देशनावचनक्रमाः ॥ १ ॥

ज्ञान-ज्ञेयस्वरूपं यत् कलयत्येकहेलया ।
त्रैलोक्यमखिलं ज्योतिस्तदार्हतमहं स्तुवे ॥ २ ॥

उपादेयमुपादातुं हेयं हातुमुपास्यते ।
प्रमाणमेव यत् सद्भिस्तदेवातः प्रकाश्यते ॥ ३ ॥

ज्ञानं स्वार्थविनिश्चयरूपमबाधं प्रमाणमेतच्च ।
ज्ञातुः पृथक् कथञ्चित् प्रामाण्यं च स्वतः परतः ॥ ४ ॥

प्रत्यक्षमथ परोक्षं द्विधैव [तत्] तत्र चादिमं द्वेधा ।
नैश्चयिकमथ व्यवहारकारि पूर्वं पुनस्त्रेधा ॥ ५ ॥

अवधि-मनःपर्यय-केवलानि षोढा द्वितीयमन्यत् तु ।
प्रत्यक्षादिनिमित्तं परोक्षमेतच्च पञ्चविधम् ॥ ६ ॥

स्मरणं प्रत्यभिज्ञानं तर्को लैङ्गिकमागमः ।
विषयः फलमाभासाः स्याद्वादो नय-दुर्नयौ ॥ ७ ॥

वादन्यायस्ततः सर्ववित्त्वे [च] भुक्तिसम्भवः ।
पुं-स्त्रियोश्च समा मुक्तिरिति शास्त्रार्थसङ्ग्रहः ॥ ८ ॥

प्रमाणं ज्ञानं प्रामाण्यस्यान्यथानुपपत्तितः ।
नाज्ञानं सन्निकर्षादि न साधकतमं यतः ॥ ९ ॥

अर्थस्य प्रमितौ न साधकतमः स्यात् सन्निकर्षो यतः,
स्वस्यासौ प्रमितौ न साधकतमः कुम्भादिवत् कर्हिचित् ।
अर्थश्चाप्रमितः कथं मतिधनैस्त्यज्येत गृह्येत वा ?,
सम्यग्ज्ञानमतः प्रमाणमपरं नो सन्निकर्षादिकम् ॥ १० ॥

प्रदीप-नयनादिभिर्न च भवत्यनैकान्तिको,
न साधकतमा यतस्त इह मुख्यवृत्त्या मितौ ।
परम्परितकारणे करणता यदि त्विष्यते,
तदा करणलक्षणे बत ! जलाञ्जलिर्दीयताम् ॥ ११ ॥

ये सन्निकर्षमवदन् निपुणाः प्रमाण-
मध्यक्षता किमु न तैर्नभसः प्रपन्ना ?।
यद् भौतिकेन नयनेन वि[हा]यसस्तैः,
शाशक्यते स्खलयितुं नहि सन्निकर्षः ॥ १२ ॥

भूषा(रूपा)भावान्नभसि न यदि स्यादणौ तत्र [....]स्या
नुद्भूतत्वे नयनजमले स्यात् समुद्भूतरूपे ।
तस्मात् स्वार्थग्रहणनियता ज्ञानरूपैव शक्ति
र्ज्ञातुःकर्मापचयजनिता मुख्यवृत्त्या प्रमाणम् ॥ १३ ॥

प्रमाणाभावतो सत्त्वे संयोग-समवाययोः ।
सन्निकर्षाभिदाख्यानं वान्ध्येयगुणवर्णनम् ॥ १४ ॥

दण्डीति मतिस्त्वन्मतसंयोगविमुक्तवस्तुभेदकृता ।
संयुक्ताकारत्वाद् युक्ता प्रासादबुद्धिरिव ॥ १५ ॥

यद् यस्मान्नो भिन्नं समवायस्तत्र तस्य नैव यथा ।
स्वात्मनि पटनवतन्तु[......]विशेषेभ्यः पटो भिन्नः ॥ १६ ॥

यद् वृश्य (दृश्यं) सद् यस्माद् व्यतिरेकेणोपलभ्यते न ततः ।
तदभिन्नं स च तेभ्यस्तथाऽन्यथोच्छिद्यते भेदः ॥ १७ ॥

ज्ञानस्य स्वप्रकाशत्वं केवलव्यतिरेकिणा ।
अर्थप्रकाशकत्वेन सिद्धसङ्केतकः सुधीः ॥ १८ ॥

यच्चोच्यते ज्ञानमिहापरेण, ज्ञानेन वेद्यं खलु मेयभावात् ।
घटादिवत् तत्र महेशबुद्ध्या, नैकान्तिकत्वे स्फुटमेव हेतोः ॥ १९ ॥

पृथग्जनज्ञानमपेक्ष्य साधने, न च स्थितिर्वा व्यभिचार एव वा ।
सुवेदनेऽध्यक्षबलाच्च सुस्थिते, हेतोरकिञ्चित्करता निवार्या ॥ २० ॥

अन्तर्मुखो यः प्रतिभासभेदः, स साधयेद् ज्ञानगतं प्रकाशम् ।
बहिर्मुखस्त्वर्थगतं तदेवं, ज्ञानं प्रसिद्ध्येत् स्व-परप्रकाशम् ॥ २१ ॥

न च द्वयेऽपि प्रतिभासमाने, शक्योऽपलापोऽन्यतरस्य कर्तुम् ।
प्रत्यक्षता संविदि चात्र मुख्या, ज्ञेये पुनः स्यादुपचारवृत्त्या ॥ २२ ॥

यद् यस्मिन्नुपलब्धिलक्षणगताकारेण नाऽऽभासते,
वाच्यं तन्न तदात्मकं किल यथा कुम्भः पटाद्याकृतिः ।
भासन्ते च घटादयो न हि जडा भावाः क्वचित् संविदा,
कारेणेति विभिन्नमूर्त्तय इमे मान्या मनीषाधनैः ॥ २३ ॥

[...............................]ते ज्ञानमेव यदिहावभासते ।
तद्यथा सुखप्रमुखमवभासते च कुम्भादिस्तत् कुतस्त्याऽर्थसिद्धिः?(?)

यद् येन सहोपलभ्यते, नियमात् तन्न ततो विभिद्यते ।
चन्द्राच्चन्द्रो यथा परः, सर्वं वस्तु तथा च संविदा ॥ २५ ॥

वेद्यते यदिह तन्न भिद्यते, ज्ञानतः खलु तदीयरूपवत् ।
वेद्यते च सकलं घटादिकं, बाह्यवस्तु सदिति भ्रमस्ततः ॥ २६ ॥

संवेद्यमानत्वमिदं स्वतश्चेदसिद्धमर्थस्य तथा प्रतीतेः ।
अथापरस्माद् बहिरप्यसिद्धेर्विरुद्धमन्या च गतिर्न काचित् ॥ २७ ॥

ज्ञानस्य स्व-परप्रकाशपरतापक्षेऽपि सम्भाव्यते,
नैयत्येन सहोपलम्भ इति सन्देहादनैकान्तिकः ।

प्रत्यक्षादनुमानतश्च विदिते बाह्ये च कालात्यय
क्षिप्तोऽप्येष सहार्थचिन्तनविधिर्भेदाद् विरुद्धोऽपि च ॥ २८ ॥

नियतः सहोपलम्भो भिन्नास्वपि कृत्तिकासु यद् दृष्टः ।
तेन व्यभिचारित्वं स्फुटं विपक्षेऽपि वृत्तित्वात् ॥ २९ ॥

वेद्यत्वमत्र यदि वेदनकर्म तात् (भावात्),
क्रोडीकृतं ननु भिदैव ततो विरुद्धम् ।
चिद्रूपता यदि पुनस्तदसिद्धमेव,
कुम्भादयः खलु जडा यदमी प्रसिद्धाः ॥ ३० ॥

ज्ञानं विवादपतितं व्यवसायरूपं, बाधाप्रबन्धपरिवर्जितवेदनत्वात् ।
यत् तूक्तसाध्यविकलं तदुपात्तहेतुशून्यं यथा किल विपर्यय-संशयादि

विपर्यया-ऽनध्यवसाय-संशयस्वरूपकारोपविरोधि तावत् ।
विनिश्चयात्मत्वमृते न युज्यते, ज्ञाने विसंवादकता विशेषणम्॥ ३२ ॥

निर्विकल्पमपि निश्चयं विना, न प्रमाणपदवीं समश्नुते ।
भाषमाण इति तत्प्रमाणतां, मा क्षिपंश्च सुगतो न सौगतः ॥ ३३ ॥

किञ्चाविकल्पकमनध्यवसायरूपं,
युञ्जद् विनिश्चितिकृतावलम्बिकल्पम् ।
पुंसः स्वयं सुतकृतावबलस्य शण्ढ
दत्तात्मजप्रजननाधिकृतेः समं स्यात् ॥ ३४ ॥

ज्ञानं व्यवस्यति न व्यवहारकारि, गच्छत्तृणालगन [............ ।
...............] वेदवत्त(त्ता)थागतैरनुगतं खलु निर्विकल्पम् ॥ ३५ ॥

किञ्चाविकल्प-[स]विकल्पकयोरभीष्टौ,
यत् तात्त्विकेतरतनू विषयौ तथा च ।
मिथ्याधिरोपितमहोत्स(?)विकल्पकस्या-
प्रामाण्यमात्तविषयग्रहणेन बौद्धैः ॥ ३६ ॥

यस्मिन् बाधा भवति विपरीतार्थनिर्णायकेन,
ज्ञानं न स्यात् तदिह विलसद्बाधकं न प्रमाणम् ।
आत्मा व्यापी प्रकृतिजनितं विश्वमीशप्रक्लृप्तं,
सर्वं नित्यं क्षणिकमथवेत्यादिसंवेदनं वा ॥ ३७ ॥

शुक्ताविदं रूप्यमिति प्रतीतिं, विपर्ययख्यातिमुशन्ति सन्तः ।
अनेकधा विप्रतिपत्तिरत्र, प्रवादिनां दृष्टिवशात् तथाहि ॥ ३८ ॥

प्राभाकराः प्राहुरिहेन्द्रियोत्थमध्यक्षमेकं विषये पुरस्थे ।
संस्कारजन्या स्मृतिरन्यदस्याः, पूर्वानुभूतं विषयस्वरूपम् ॥ ३९ ॥

हेतुप्रभेदाद् विषयप्रभेदाच्चेदं किल ज्ञानयुगं प्रमातुः ।
स्मृतिप्रमोषाच्च भवेद् विवेकाख्यातिर्न तु ज्ञानमखण्डमेतत् ॥ ४० ॥

अत्रोच्यते कारणभेदमात्रात्, कार्यस्य भेदो यदि साधनार्थः ।
तदा दृगाद्यैर्बहुभिः कृतं सत्, प्राप्तं घटज्ञानमपि ह्यनेकम् ॥ ४१ ॥

सामग्र्यभेदादथ नास्ति सोऽस्मिन्, सामग्रिकैकैव यतोऽत्र तावत् ।
कार्यस्य भेदाद् यदि चात्र हेतुव्रजान्यताऽन्योन्यसमाश्रयस्तत् ॥ ४२ ॥

संस्कारेन्द्रिययोर्विलोकितमथान्यत्र प्रभुत्वं स्मृति
प्रत्यक्षप्रभवे इहापि सुवचस्तत् कार्यभेदस्ततः ।
दत्तस्तर्हि जलाञ्जलिस्तिश्र(?)सनाथः प्रत्यभिज्ञाविदो-
ऽप्येकत्वे यदिहापि सैव सकला तत्कार्यता लोक्यते ॥ ४३ ॥

दृगादयो दोषवशाच्च रूप्यरूपेण शुक्तिं खलु दर्शयन्ति ।
तस्मादसिद्धो विषयप्रभेदः, सिद्धं ततो ज्ञानमखण्डमेतत् ॥ ४४ ॥

ज्ञानस्य सर्वस्य सगोचरत्वे, भङ्ग्या कयाचिद् विहितप्रतिष्ठे ।
बाह्यार्थनिह्नुतृमनोरथद्रून्, विपर्ययख्यातिर(रु)न्मूलयिष्यति ॥ ४५ ॥

आहुर्मध्यमका इदं रजतमित्यख्यातिरेषा यतो,
रूप्यख्यातिमदत्र नो सजति न भ्रान्तित्वमस्यान्यथा ।

नो शुक्तिः कलधौतमित्यधिगतेः स्याद् वस्तु वस्त्वन्तरा
कारेण प्रतिभाति तर्हि न भवेद् वस्तुव्यवस्था क्वचित् ॥ ४६ ॥

अत्रोच्यते यदि न किञ्चिदिहावभाति, तत् स्याद् विशेषभणितेर्विरहप्रसङ्गः
अख्यातिरत्र च मतः किमभाव एव, ख्यातेरथाल्पतमता प्रथमे विकल्पे

न स्याद् भिदा भ्रम-सुषुप्तदशासु हेतु
र्नो वा मना(ता)ऽपि परमार्थसती न यस्मात् ।
पक्षे परे वितथरूपतयाऽर्थभाने,
ख्यातिर्विपर्ययवती स्फुटमेव सिद्धा ॥ ४८ ॥

विपर्यये भाति यदत्र किञ्चित्, तज्ज्ञानधर्मो यदि वाऽर्थधर्मः ।
ना.....नहङ्कारसमाश्रयत्वं, बहिर्मुखत्वप्रतिभासनाच्च ॥ ४९ ॥

न चार्थधर्मोऽर्थविधेयसाध्यवैधुर्यतो बाधकबोधभावे ।
तद्व(द्वा)मतायाश्च विबाधितत्वा[त् त]स्मादसत्ख्यातिरियं प्रपद्या ५०

वि(वै)भाषिकैरुक्तमिदं न युक्तं, न सच्च भातीति च वाग्विरोधात् ।
ज्ञानार्थयोर्भेदकयोरभावे, भ्रान्तेरवैचित्र्यविधे[ः] प्रसङ्गात् ॥ ५१ ॥

अर्थक्रियायां पुनरर्थमात्रनिबन्धनेच्छादिरिहापि सोऽस्ति ।
विशिष्टरूपा तु शिव(विशि)ष्टवस्तुसाध्या यदि स्यान्न विपर्ययः स्यात्

प्रतीत्या यत् सिद्धं तदिह विषयो वस्तु न पुनः,
प्रतीतौ तामन्यां मृगयति बुधो निष्ठितभयात् ।
अथैतद् यद्देशं कलयति न तद्देशगमने,
तथा पश्येन्नैवं कलयति यदाऽस्त्येव हि तदा ॥ ५३ ॥

न चेदेवं विद्युद्विषयमपि विज्ञानमसति,
प्रवृत्तं यत् पश्चान्न खलु तडितः सत्त्वकलता ।
प्रसिद्धार्थख्यातिं जगदुरिति वाचस्पतिसुताः,
शुभोदर्कं तर्कं प्रतिविहितवैरव्यतिकराः ॥ ५४ ॥

भ्रान्ता-ऽभ्रान्तज्ञानवर्ताप्यतानात्, माऽस्मिन् पक्षे भेदकाभावतः स्यात्
यद्देशः ख्यात्येष तं तस्य चिह्नं, पश्येत् पश्चात् प्रागसौ तत्र चेत् स्यात्
शुक्ताविचत्वारमिति (?) प्रतीतौ, बाह्यार्थरूपं न विभाति रूप्यम्।
तद्बाधकप्रत्ययबाधितत्वादनाद्यविद्यावशविप्लवात् तु ॥ ५६ ॥

संवेदनाकार इहावभाति, तस्माद् बहीरूपतयेव नान्यः।
बौद्धास्तृतीया इति युक्तिमात्मख्यातौ वदन्तः प्रतिषेधनीयाः ॥ ५७ ॥

प्रमाणतो बाह्यपदार्थसिद्धेः, स्वाकारमात्रग्रहणाप्रसिद्धेः।
मिथ्येतरज्ञानकथाप्रणाशादेस(श)त्वतस्त्वा(स्ता)त्विकवासनायाः ५८

नीलादिकृतः सारूप्यलक्षणो ज्ञानगत इहाकारः।
प्रत्यक्षो नीलादिः स्वतः परोक्षाबहीरूपः ॥ ५९ ॥

ज्ञानाकारख्यातेरात्मख्यातिरि[ह] वर्णिता निपुणैः।
सौत्रान्तिकैरियं पुनरतिकलुषा ख्यातिरिव तेषाम् ॥ ६० ॥

सारूप्यं द्वयदर्शने सति विनिश्चेतुं ध्रुवं शक्यते,
नीलादिस्तु परोक्ष एव भवतामर्थः सदा सम्मतः।
सारूप्याधिगमादनन्तरमथो जानाति नीलादिकं,
व्यक्तोऽन्योन्यसमाश्रयस्तदिति न ख्यातिर्मता सिद्ध्यति ॥ ६१ ॥

ज्ञाने यत् प्रतिभासते तदसदित्यक्षोऽपि किं भाषते ?,
बाधा यस्य च सम्भवे तदपि सद् ब्रूयात् कथं शिक्षितः ?।
वक्तुं नो सदसद्विरोधभयतो वाञ्छत्यतुच्छाशयाः(य)
स्तेनाख्यातिरवाच्यवस्तुविषये वेदान्तिकैराक्षि(हि)ता ॥ ६२ ॥

सत् सत्त्वेन ग्रहीतुं गदितुमपि तथा सर्वथात्वेन वक्तुं,
ज्ञातुं वा शक्यमेव प्रकटमपरथोच्छिद्यते शिष्टमार्गः।
किञ्चेदं रूप्यमेवं वचनपरिगतीपूर्वदृष्टं सदेव,
स्मृत्वा रूप्यं प्रवृत्ते किल सदृशतया तत् कथं ख्यातिरिष्टा ?॥ ६३ ॥

ख्यात्यन्तराणामतिदुस्थितत्वादन्तर्बहिर्वाऽप्यति(नि)रूपितस्य ।
अलौकिकार्थस्य वदन्ति केचिल्लोकायताः ख्यातिमहातिरूढाः॥ ६४ ॥

अर्थस्यालौकिकत्वं यदि विशदमतिं लोकमाश्रित्य मिथ्या,
ज्ञानेऽप्यन्तर्बहिर्वा विषयमतितरां ख्यापयत्येष तर्हि ।
ख्यातिक्षेपादथैवं वदसि वद परं युक्तियुक्ताऽऽर्हतैर्या,
ख्यातिः प्रोक्ताऽत्र तां चेद् विघटयसि तदा ज्ञास्यते चाऽऽदिता ते६५

कलुषिनयनवृत्तेश्चाकचिक्यावलोको-
ल्लसितकलिततारानुस्मृतेः शुक्तिकायाम्
रजतमिव(द)मितीदं ज्ञानमत्र प्रमातु[ः],
कथयति विपरीतख्यातिमाराध्यवर्गः ॥ ६६ ॥

तीव्राभ्यासदशा भवेद् यदि ततः प्रामाण्यमस्य स्वतः,
सा चेन्नास्ति ततः परादधिगतप्रामाण्यभावात् स्वतः ।
उत्पत्तौ परतोऽथवाऽर्थविषयच्छित्तौ स्वकार्ये च तत्,
स्वभ्यासे....क्वचित्म(त् स ?)तः क्वचिदिदं स्यादन्यतो पाटवे॥ ६७ ॥

कर्तृभोक्तृपरिणामिदेहितो, भिन्नभिन्नमविनाशि नाशि यः ।
आत्मवस्तु न हि मन्यते प्रमासिद्धिमस्य वि(धि)गहो ! विवेकिता६८

निःसन्देहमबाधितं सुखमहं संवेदयामीति यद्,
ज्ञानं तन्न शरीरगोचरमहङ्कारास्पदं तन्न तत् ।
स्थूरोऽस्मीति यदौपचारिकमिदं भृत्येऽपि राजेतिवत्,
स्वात्मान्तःकरणेन बाह्यकरणाभावे [.....]तद् गृह्यते ॥ ६९ ॥

रूपादिविज्ञानमिहाश्रितं क्वचिद्, गुणत्वतो रूप-रसादिवत् तथा ।
ज्ञानाद्युपादानविशेषपूर्वकं, कार्यत्वहेतोः कलसा(शा)दिकं यथा ७०

आत्मद्रव्यमनन्तपर्ययममी चास्मात् कथञ्चित् पृथक्,
ते यस्मादुदयन्ति केचिदपरे नश्यन्ति चानुक्षणम् ।

द्रव्यं तु ध्रुवमेतदप्यतितरां तेभ्यो न वे(चेद्) भिद्यते,
यन्न क्वापि विलोक्यते जगति तत् पर्यायपिण्डं विना ॥ ७१ ॥

आत्माविज्ञानयोर्भेदाभेदेऽनुभवस्विस्थिते(?) ।
कर्तृत्वे करणत्वादिलक्ष्मीमपहरेत कः ? ॥ ७२ ॥

द्वेधा वस्तु विनिश्चयेन भवति प्रत्यक्षमत्यक्षमि-
त्यन्तर्भावविधेश्च निर्न(र्ण)यकृतां शेषप्रमाणामिह ।
ये त्वेकादिषडन्तमभ्युपगताश्चार्वाकमुख्याः परे,
मानं तान्न विमुञ्चतीह बलवान्न व्याप्तिदोषग्रहः ॥ ७३ ॥

प्रत्यक्षं विशदं ज्ञानं प्रत्यक्षत्वेन हेतुना ।
यन्नोक्तसाध्यं तन्नोक्तसाधनं लिङ्गिकादिवत् ॥ ७४ ॥

ज्ञानान्तराव्यवहित[......]मथो विशेष
[........]त्वमस्य विशदत्वमुशन्ति सन्तः ।
सर्वात्मना क्वचिदिदं क्वचिदंशतः स्याद्,
द्रव्यादिकारणकलापवशात् प्रमातुः ॥ ७५ ॥

आत्मानमक्षमवदत् प्रति तं गतत्वादध्यक्षमक्षवचनाद्यनपेक्षमेव ।
स्वावारकत्रुटिकृतां पटुतां दधानं, स्वे गोचरेऽवधिमतो गमकैवलाख्यम्

रूपि द्रव्यमवैति सर्वमवधिज्ञानी मनःपर्यय,
ज्ञानीमानुषलोकसंज्ञिमनसां जानाति तान् पर्ययान् ।
द्रव्यं क्षेत्रमतीत-भावि-भवि(व)तः कालान् गुणान् पर्ययान्,
सर्वान् केवलिनः क्षतावृतितया जानन्ति पश्यन्ति च ॥ ७७ ॥

यच्चेन्द्रियैः स्वविषयेषु मनःसहायैरक्षानपेक्षमनसा च किल क्रियेत ।
कर्मक्षयोपशमचित्रतया विचित्रं, तद्व्यावहारिकमिहाहुरवग्रहादि ७८

अक्षार्थयोगःकिल निर्विशेषसत्त्वाश्रयालोचनदर्शनोत्थम् ।
संस्थान-वर्णादिविशिष्टवस्तुज्ञानं यद(दा)द्यं तदवग्रहः स्यात्॥ ७९ ॥

तदन्वितानन्वितधर्मचिन्तनादवग्रहात्तार्थविशेषकाङ्क्षणम् ।
ईहा ततः काङ्क्षितवस्तुगोचरं, विनिश्चितज्ञानमता(वा)यमूचिरे॥ ८० ॥

अवायनिर्नी(र्णी)तपदार्थगोचरं, कालान्तरेऽपि स्मृतिकारि धारणाम् ।
वदन्ति विज्ञानमियं त्वनेकधा, बह्वादिभेदप्रविकल्पनावशात्॥ ८१ ॥

ज्ञानं परोक्षमविशदरूपमिति ब्रूमहे परोक्षत्वात् ।
यन्नाविशदं तन्न परोक्षमतीन्द्रियमिवाध्यक्षम् ॥ ८२ ॥

पूर्वानुभूतविषया संस्कारोद्बोधहेतुका ।
संवादतः प्रमाणं स्यात् तदित्युल्लेखिनी स्मृतिः ॥ ८३ ॥

मलधारिश्रीराजशेखरसूरिविरचितः

## ॥ षड्दर्शनसमुच्चयः ॥

नत्वा निजगुरून् भक्त्या, स्मृत्वा वाङ्मयदेवताम् ।
सर्वदर्शनवक्तव्यं, वक्ति श्रीराजशेखरः ॥ १ ॥

धर्मः प्रियः सर्वलोके, तं ब्रूयुर्दर्शनानि षट् ।
तेषां लिङ्गे च वेषे च, आचारे दैवते गुरौ ॥ २ ॥

प्रमाणतत्त्वयोर्मुक्तौ, तर्के भेदो निरीक्ष्यते ।
मुक्तिरष्टाङ्गयोगेनेत्येतत् साधारणं वचः ॥ ३ ॥

जैनं साङ्ख्यं जैमिनीयं, यौगं वैशेषिकं तथा ।
सौगतं दर्शनान्येवं, नास्तिकं तु न दर्शनम् ॥ ४ ॥

तत्र जैनमते लिङ्गं, रजोहरणमादिमम् ।
मुखवस्त्रं च वेषश्च, चोलपट्टादिकः स्मृतः ॥ ५ ॥

विस्तारस्त्वोघनिर्युक्तेर्ज्ञेयो वेषादिगोचरः।
आचारः पञ्चसमितिगुप्तित्रितयलक्षणः ॥ ६ ॥

ईर्याभाषैषणाऽऽदाननिक्षेपोत्सर्गसंज्ञिका: ।
पञ्चाहु: समितीस्तिस्रो, गुप्तीस्त्रियोगनिग्रहात् ॥ ७ ॥

तीर्थङ्कराश्चतुर्युक्ता, विंशतिर्वृषभादय: ।
क्लिष्टाष्टकर्मनिर्मुक्ता:, केवलज्ञानभास्करा: ॥ ८ ॥

महाव्रतधरो धीर:, सर्वागमरहस्यवित् ।
क्रोधमानादिविजयी, निर्ग्रन्थो गुरुरुच्यते ॥ ९ ॥

प्रत्यक्षं च परोक्षं च, द्वे प्रमाणे इह स्मृते ।
तत्र प्रमेयं स्याद्वादाधिष्ठितं द्रव्यषण्मयम् ॥ १० ॥

धर्माधर्मो नभ: काल:, पुद्गलश्चेतनस्तथा ।
द्रव्यषट्कमिदं ख्यातं, तद्भेदास्त्वागमे स्मृता: ॥ ११ ॥

जीवाजीवौ तथा पुण्यं, पापमाश्रवसंवरौ ।
बन्धो विनिर्जरामोक्षौ, नवतत्त्वी मताऽर्हताम् ॥ १२ ॥

चैतन्यलक्षणो जीव:, स्यादजीवस्ततोऽन्यथा ।
सत्कर्मपुद्गला: पुण्यं, पापं दुष्कर्मपुद्गला: ॥ १३ ॥

कषाया विषया योगा, इत्याद्या आश्रवा मता: ।
आश्रवाद्विरमणं यत्, तत् संवर इति स्मृत: ॥ १४ ॥

शुभाशुभानां ग्रहणं, कर्मणां बन्ध इष्यते ।
पूर्वोपार्जितकर्मौघजरणं निर्जरा स्मृता ॥ १५ ॥

कर्मक्षयेण जीवस्य, स्वस्वरूपस्थिति: शिवम् ।
एषां नवानां श्रद्धाने, चारित्रात् तत्तु लभ्यते ॥ १६ ॥

श्वेताम्बरा वन्द्यमाना, धर्मलाभं प्रचक्षते ।
शुद्धां माधुकरीं वृत्तिं, सेवन्ते भोजनादिषु ॥ १७ ॥

ख्याता: प्रमाणमीमांसा, प्रमाणोक्तिसमुच्चय: ।
नयचक्रवालतर्क:, स्याद्वादकलिका तथा ॥ १८ ॥

प्रमेयपद्ममार्तण्डस्तत्त्वार्थः सर्वसाधनः ।
धर्मसंग्रहणीत्यादि, तर्कौघा जिनशासने ॥ १९ ॥

जैने मते उभौ पक्षौ श्वेताम्बरो दिगम्बरः ।
श्वेताम्बरःपुरा प्रोक्तः, कथ्यतेऽथ दिगम्बरः ॥ २० ॥

दिगम्बराणां चत्वारो, भेदा नान्यव्रतस्पृशः ।
काष्ठासङ्घो मूलसङ्घः, सङ्घौ माथुरगोप्यकौ ॥ २१ ॥

पिच्छिका चमरीवालैः, काष्ठासङ्घे प्रतिष्ठिता ।
मूलसङ्घे मयूराणां, पिच्छैर्भवति पिच्छिका ॥ २२ ॥

पिच्छिका माथुरे सङ्घे, मूलादपि हि नादृता ।
मयूरपिच्छिका गोप्याः, धर्मलाभं भणन्ति ते ॥ २३ ॥

धर्मवृद्धिगिरः शेषाः, गोप्याः स्त्रीमुक्तिभाषिणः ।
गोप्यादन्ये त्रयः सङ्घाः, प्राहुर्नो निर्वृतिः स्त्रियाः ॥ २४ ॥

शेषास्त्रयश्च गोप्याश्च, केवलिजिनभुक्तिं न मन्वते ।
नास्ति चीवरयुक्तस्य, निर्वाणं सद्व्रतेऽपि हि ॥ २५ ॥

द्वात्रिंशदन्तरायाः स्युर्मलाश्चैव चतुर्दश ।
भिक्षाऽटने भवन्त्येषां, वर्जनीयास्तदागमे ॥ २६ ॥

शेषं श्वेताम्बरैस्तुल्यमाचारे दैवते गुरौ ।
श्वेताम्बरप्रणीतानि, तर्कशास्त्राणि मन्वते ॥ २७ ॥

स्याद्वादविद्याविद्योतात्, प्रायः साधर्मिका अमी ।
परमष्टसहस्री या, न्यायकैरवचन्द्रमाः ॥ २८ ॥

सिद्धान्तसार इत्याद्यास्तर्काः परमकर्कशाः ।
तेषां जयश्रीदानाय, प्रगल्भन्ते पदे पदे ॥ २९ ॥

जिनकल्पादयो भेदा, व्युच्छिन्नाः साम्प्रतं कलौ ।
वर्त्तमानं ततः प्रोक्तं, सर्वं ज्ञेयं जिनागमात् ॥ ३० ॥

सम्यग् जैनं मतं ज्ञात्वा, योगेऽष्टाङ्गे रमेत यः ।
स कर्मलाघवं कृत्वा, लब्धा सौख्यपरम्पराम् ॥ ३१ ॥

अथ साङ्ख्यमतं ब्रूमस्ते त्रिदण्डैकदण्डकाः ।
कौपीनं वसनं तेषां, धातुरक्ताम्बराश्च ते ॥ ३२ ॥

क्षुरमुण्डा एणचर्मासना द्विजगृहाशनाः ।
पञ्चग्रासीपराश्चैव, द्वादशाक्षरजापिनः ॥ ३३ ॥

ॐ नमो नारायणाय, तद्भक्ताः प्रवदन्त्यदः ।
प्रणामकाले तेऽप्याहुः, पदं तत्तु नमोऽन्तकम् ॥ ३४ ॥

बीटेति भारते ख्याता, दारवी मुखवस्त्रिका ।
दयानिमित्तं भूतानां, मुखनिःश्वासरोधिका ॥ ३५ ॥

यदाहुस्ते-घ्राणादनुप्रयातेन, श्वासेनैकेन जन्तवः ।
हन्यन्ते शतशो ब्रह्मन्नणुमात्राक्षरवादिना ॥ ३६ ॥

दयार्थं जलजीवानां, गलनं धारयन्ति ते ।
शास्त्रेषूपदिशन्त्येवं, भक्तानां पुरतः सदा ॥ ३७ ॥

षट्त्रिंशदङ्गुलायामं, विंशत्यङ्गुलविस्तृतम् ।
दृढं गलनकं कुर्याद्, भूयो जीवान् विशोधयेत् ॥ ३८ ॥

म्रियन्ते मिष्टतोयेन, पूतराः क्षारसम्भवाः ।
क्षारतोयेन तु परे, न कुर्यात् सङ्करं ततः ॥ ३९ ॥

लूताऽऽस्यतन्तुगलितैकबिन्दौ सन्ति जन्तवः ।
सूक्ष्मा भ्रमरमानास्ते, नैव मान्ति त्रिविष्टपे ॥ ४० ॥

कुसुम्भकुङ्कुमाम्भोवन्निचितं सूक्ष्मजन्तुभिः ।
न दृढेनापि वस्त्रेण, शक्यं शोधयितुं जलम् ॥ ४१ ॥

साङ्ख्या निरीश्वराः केचित्, केचिदीश्वरदेवताः ।
ये ते निरीश्वरास्तेऽमी, नारायणपरायणाः ॥ ४२ ॥

विष्णोः प्रतिष्ठां कुर्वन्ति, साङ्ख्यशासनसूरयः ।
चैतन्यप्रमुखैः शब्दैस्तेषामाचार्य उच्यते ॥ ४३ ॥

प्रत्यक्षमनुमानं च, शाब्दं चेति प्रमात्रयम् ।
अन्तर्भावोऽत्र शेषाणां, प्रमाणानां सयुक्तिकः ॥ ४४ ॥

अमीषां साङ्ख्यसूरीणां, तत्त्वानां पञ्चविंशतिः ।
सत्त्वं रजस्तमश्चेति, ज्ञेयं तावद् गुणत्रयम् ॥ ४५ ॥

एतेषां या समाऽवस्था, सा प्रकृतिः किलोच्यते ।
प्रधानाव्यक्तशब्दाभ्यां, वाच्या नित्यस्वरूपिका ॥ ४६ ॥

ततः संजायते बुद्धिर्महानिति यकोच्यते ।
अहङ्कारस्ततोऽपि स्यात्, ततः षोडशको गणः ॥ ४७ ॥

स्पर्शनं रसनं घ्राणं, चक्षुः श्रोत्रं च पञ्चमम् ।
पञ्च बुद्धीन्द्रियाण्याहुस्तथा कर्मेन्द्रियाणि च ॥ ४८ ॥

पायूपस्थवचःपाणिपादाख्यानि मनस्तथा ।
अन्यानि पञ्च रूपादितन्मात्राणीति षोडश ॥ ४९ ॥

रूपात्तेजो रसादापो, गन्धाद् भूमिः स्वरान्नभः ।
स्पर्शाद्वायुस्तथा चैवं, पञ्चभ्यः पञ्चभूतकम् ॥ ५० ॥

एवं चतुर्विंशतितत्त्वरूपं, निवेदितं साङ्ख्यमते प्रधानम् ।
अन्यस्त्वकर्ता विगुणश्च भोक्ता, तत्त्वं पुमान् नित्यचिदभ्युपेतः॥ ५१ ॥

अमूर्त्तश्चेतनो भोगी, नित्यः सर्वगतोऽक्रियः ।
अकर्त्ता निर्गुणः सूक्ष्म, आत्मा कापिलदर्शने ॥ ५२ ॥

प्रकृतेर्विरहो मोक्षस्तन्नाशे स स्वरूपगः ।
बध्यते मुच्यते चैव, प्रकृतिः पुरुषो न तु ॥ ५३ ॥

साङ्ख्यानां मतवक्तारः, कपिलासुरिभार्गवाः ।
उलूकः पञ्चशिखश्चेश्वरकृष्णस्तु शास्त्रकृत् ॥ ५४ ॥

तर्कग्रन्था एतदीया, माठरस्तत्त्वकौमुदी ।
गौडपादाऽऽत्रेयतन्त्रे, साङ्ख्यसप्ततिसूत्रयुक् ॥ ५५ ॥

काश्यां प्राचुर्यमेतेषां, बहवो मासोपवासिकाः ।
धूम्रमार्गानुगा विप्रा, अर्चिर्मागानुगास्त्वमी ॥ ५६ ॥

वेदप्रियास्ततो विप्रा, यज्ञमार्गानुगामिनः ।
हिंसादिवेदविरताः, साङ्ख्या अध्यात्मवादिनः ॥ ५७ ॥

स्वकीयस्य मतस्यैते, महिमानं प्रचक्षते ।
यदि साङ्ख्यमते भक्तिस्तदा मुक्तिर्विना क्रियाम् ॥ ५८ ॥

हस पिब लल खाद मोद नित्यं, भुङ्क्ष्व च भोगान् यथाऽभिलाषम् ।
यदि विदितं ते कपिलमतं तत्, प्राप्स्यसि मोक्षसौख्यमचिरेण॥ ५९ ॥

अथ मीमांसकं ब्रूमो, जैमिनीयापराभिधम् ।
जैमिनीया एकदण्डास्त्रिदण्डा अपि साङ्ख्यवत् ॥ ६० ॥

मीमांसको द्विधा कर्म, ब्रह्ममीमांसकस्तथा ।
वेदान्ती मन्यते ब्रह्म, कर्म भट्टप्रभाकरौ ॥ ६१ ॥

ते धातुरक्तवसना, मृगचर्मोपवेशिकाः ।
कमण्डलुधरा मुण्डा, भट्टाः प्राभाकराश्च ते ॥ ६२ ॥

वेदान्तध्यानमेवैकमाचारस्तैरुरीकृतः ।
तेषां मते नास्ति देवः, सर्वज्ञादिविशेषणः ॥ ६३ ॥

तस्मादतीन्द्रियार्थानां, साक्षाद्द्रष्टुरभावतः ।
नित्येभ्यो वेदवाक्येभ्यो, यथार्थत्वविनिर्णयः ॥ ६४ ॥

अत एव पुरा कार्यो, वेदपाठः प्रयत्नतः ।
ततो धर्मस्य जिज्ञासा, कर्तव्या धर्मसाधनी ॥ ६५ ॥

नोदनालक्षणो धर्मो, नोदना तु क्रियां प्रति ।
प्रवर्त्तकं वचः प्राहुः, स्वःकामोऽग्निं यथा यजेत् ॥ ६६ ॥

वेद एव गुरुस्तेषां, वक्ता कश्चित्परो न हि ।
ततः स्वयं ते संन्यस्तं, संन्यस्तमिति भाषिणः ॥ ६७ ॥

यज्ञोपवीतं प्रक्षाल्य, पिबन्ति तज्जलं शुचि ।
एते साङ्ख्यानुगा वेषात्, तत्त्वेऽतिमहती भिदा ॥ ६८ ॥

षट्प्रमाणस्पृशो भाट्टास्तन्नामानि प्रचक्ष्महे ।
प्रत्यक्षमनुमानं च, शाब्दं चोपमया सह ॥ ६९ ॥

अर्थापत्तिरभावश्च, भाट्टानां षट् प्रमाः स्मृताः ।
प्रभाकरमते पञ्च, ते ह्यभावं न मन्वते ॥ ७० ॥

एकमेवाद्वितीयं स्याद्, ब्रह्म तत्त्वं महाफलम् ।
प्रपञ्चः स्तम्भकुम्भादिस्तेषां शास्त्रे निरर्थकः ॥ ७१ ॥

मीमांसको द्विजन्मैवेत्यतः शूद्रान्नवर्जकः ।
न पौरुषकृता वेदाः, पारम्पर्येण तद्ग्रहात् ॥ ७२ ॥

मीमांसकानां चत्वारो, भेदास्तेषु कुटीचरः ।
बहूदकश्च हंसश्च, तथा परमहंसकः ॥ ७३ ॥

कुटीचरो मठावासी, यजमानपरिग्रही ।
बहूदको नदीतीरे, स्नातो नैरस्यभैक्ष्यभुक् ॥ ७४ ॥

हंसो भ्रमति देशेषु, तपःशोषितविग्रहः ।
यः स्यात्परमहंसस्तु, तस्याचारं वदाम्यहम् ॥ ७५ ॥

स ईशानीं दिशं गच्छन्, यत्र निष्ठितशक्तिकः ।
तत्रानशनमादत्ते, वेदान्तध्यानतत्परः ॥ ७६ ॥

परः पर इहोत्कृष्टो, याज्यास्तेषां तु वाडवाः ।
साङ्ख्यवत्प्रकृतेर्भेदाद्, मोक्षो जीवस्य तन्मते ॥ ७७ ॥

त्रिदण्डी सशिखो यस्तु, ब्रह्मसूत्री गृहच्युतः ।
सकृत् पुत्रगृहेऽश्नाति, यो याति स कुटीचरः ॥ ७८ ॥

कुटीचरस्य रूपेण, ब्रह्मभिक्षो जिताशनः ।
बहूदकः स विज्ञेयो, विष्णुजापपरायणः ॥ ७९ ॥

ब्रह्मसूत्रशिखाहीनः, कषायाम्बरदण्डभृत् ।
एकरात्रिं वसेद् ग्रामे, नगरे च त्रिरात्रिकम् ॥ ८० ॥

विप्राणामावसथेषु, विधूमेषु गताग्निषु ।
ब्रह्मभिक्षां चरेद्धंसः, कुटिकावासमाचरेत् ॥ ८१ ॥

हंसस्य जायते ज्ञानं, तदा स्यात्परमो हि सः ।
चातुर्वर्ण्यप्रभोक्ता च, स्वेच्छया दण्डभृत्तदा ॥ ८२ ॥

प्रपञ्चमिथ्या कठवल्लिका च, ख्यातं जने भागवतं पुराणम् ।
इत्यादिशास्त्राणि बहूनि तेषां, तत्सम्प्रदायस्तु कृशोऽत्र लोके॥ ८३ ॥

अथ योगमतं ब्रूमः, शैवमित्यपराभिधम् ।
ते दण्डधारिणः प्रौढकौपीनपरिधायिनः, ॥ ८४ ॥

ते कम्बलिप्रावरणा, जटापटलशालिनः ।
भस्मोद्धूलनकर्त्तारो, नीरसाहारसेविनः ॥ ८५ ॥

दोर्मूले तुम्बकभृतः, प्रायेण वनवासिनः ।
आतिथ्यकर्मनिरताः, कन्दमूलफलाशनाः ॥ ८६ ॥

सस्त्रीका अथ निःस्त्रीका, निःस्त्रीकास्तेषु चोत्तमाः ।
पञ्चाग्निसाधनपराः, प्राणलिङ्गधराः करे ॥ ८७ ॥

विधाय दन्तपवनं, प्रक्षाल्यांह्रिकराननम् ।
स्पृशन्ति भस्मनाऽङ्गं त्रिस्त्रिः शिवध्यानतत्पराः ॥ ८८ ॥

यजमानो वन्दमानो, वक्ति तेषां कृताञ्जलिः ।
ॐ नमः शिवायेत्येवं, शिवाय नम इत्यसौ ॥ ८९ ॥

तेषां च शङ्करो देवः, सृष्टिसंहारकारकः ।
तस्यावताराः सारा ये, तेऽष्टादश तदर्चिताः ॥ ९० ॥

तेषां नामान्यथ ब्रूमो, नकुलीशोऽथ कौशिकः ।
गार्ग्यो मैत्र्यः कौरुपश्च, ईशानः षष्ठ उच्यते ॥ ९१ ॥

सप्तमः पारगार्ग्यस्तु, कपिलाण्डमनुष्यकौ ।
अपरकुशीकोऽत्रिश्च, पिङ्गलाक्षोऽथ पुष्पकः ॥ ९२ ॥

बृहदाचार्योऽगस्तिश्च, सन्तानः षोडशः स्मृतः ।
राशीकरः सप्तदशो, विद्यागुरुरथापरः ॥ ९३ ॥

एतेऽष्टादश तीर्थेशास्तैः सेव्यन्ते पदे पदे ।
पूजनं प्रणिधानं च, तेषां ज्ञेयं तदागमात् ॥ ९४ ॥

अक्षपादो गुरुस्तेषां, तेन ते ह्याक्षपादकाः ।
उत्तमां संयमावस्थां, प्राप्ता नग्ना भ्रमन्ति ते ॥ ९५ ॥

प्रमाणानि च चत्वारि, प्रत्यक्षं लैङ्गिकं तथा ।
उपमानं च शाब्दं च, तत्फलानि पृथक् पृथक् ॥ ९६ ॥

तत्त्वानि षोडशामुत्र, प्रमाणादीनि तद्यथा ।
प्रमाणं च प्रमेयं च, संशयश्च प्रयोजनम् ॥ ९७ ॥

दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्कनिर्णयौ ।
वादो जल्पो वितण्डा च, हेत्वाभासाश्छलानि च ॥ ९८ ॥

जातयो निग्रहस्थानान्येषां व्ययस्तु दुस्तरः ।
आत्यन्तिकस्तु दुःखानां, वियोगो मोक्ष उच्यते ॥ ९९ ॥

जयन्ताचार्यरचितो, न्यायतर्कोऽतिदुस्तरः ।
अन्यस्तूदयनाचार्यो, ग्रन्थप्रासादसूत्रभृत् ॥ १०० ॥

भासर्वज्ञो न्यायसारतर्कसूत्रविधायकः ।
न्यायसाराभिधे तर्के, टीका अष्टादश स्फुटाः ॥ १०१ ॥

न्यायभूषणनाम्नी तु, टीका तासु प्रसिद्धिभाक् ।
अयमेषां विशेषस्तु, यत्प्रजल्पन्ति पर्षदि ॥ १०२ ॥

शैवीं दीक्षां द्वादशाब्दीं, सेवित्वा योऽपि मुञ्चति।
दासीदासोऽपि भवति, सोऽपि निर्वाणमृच्छति ॥ १०३ ॥

एतेषु निर्विकारा ये, मीमांसां दर्शयन्ति ते।
तत्र पद्यमिदं चास्ति, मोक्षमार्गप्ररूपकम् ॥ १०४ ॥

न स्वर्धुनी न फणिनो न कपालदाम,
नेन्दोः कला न गिरिजा न जटा न भस्म।
यत्रास्ति नान्यदपि किञ्चिदुपास्महे तद्
रूपं पुराणमुनि शीलितमीश्वरस्य ॥ १०५ ॥

स एव योगिनां सेव्यो, योऽर्वाचीनस्तु योगभाक्।
स ध्यायमानो राज्यादिसुखलुब्धैर्निषेव्यते ॥ १०६ ॥

वीतरागं स्मरन् योगी, वीतरागत्वमश्नुते।
सरागं ध्यायतः पुंसः, सरागत्वं तु निश्चितम् ॥ १०७ ॥

येन येन हि भावेन, युज्यते यन्त्रवाहकः।
तेन तन्मयतां याति, विश्वरूपो मणिर्यथा ॥ १०८ ॥

श्रुतानुसारतः प्रोक्तं, नैयायिकमतं मया।
एतेषामेव शास्त्रेभ्यस्तांस्तान् भावान् विदुर्बुधाः ॥ १०९ ॥

एतेषां यजमानस्तु, सुताराहृदयेश्वरः।
सत्यवादी हरिश्चन्द्रो, रामलक्ष्मणपूर्वजः ॥ ११० ॥

भरटानां व्रतादाने, वर्णव्यक्तिर्न काचन।
यस्य पुनः शिवे भक्तिर्व्रती स भरटो भवेत् ॥ १११ ॥

अमीषां सर्वतीर्थेषु, भरटा एव पूजकाः।
शेषा नमस्कारकराः, सोऽपि कार्यो न सन्मुखः ॥ ११२ ॥

अथ वैशेषिकं ब्रूमः, पाशुपतान्यनामकम्।
लिङ्गादि यौगवत्तेषां, ते ते तीर्थंकरा अपि ॥ ११३ ॥

वैशेषिकाणां योगेभ्यो, मानतत्त्वगता भिदा।
प्रत्यक्षमनुमानं च, मते तेषां प्रमाद्वयम् ॥ ११४ ॥

अवशेषप्रमाणानामन्तर्भावोऽत्र तैर्मतः।
तत्त्वानि तु षडेवात्र, द्रव्यप्रभृतिकान्यहो ! ॥ ११५ ॥

द्रव्यं गुणास्तथा कर्म, सामान्यं च चतुर्थकम्।
विशेषसमवायौ च, तत्त्वषट्कं हि तन्मते ॥ ११६ ॥

तत्र द्रव्यं नवधा भूजलतेजोऽनिलान्तरिक्षाणि।
कालदिगात्ममनांसि च गुणः पुनः पञ्चविंशतिधा ॥ ११७ ॥

स्पर्शरसरूपगन्धाः शब्दः सङ्ख्या विभागसंयोगौ।
परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च ॥ ११८ ॥

बुद्धिः सुखदुःखमिच्छाधर्माधर्मप्रयत्नसंस्काराः।
द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते ॥ ११९ ॥

उत्क्षेपावक्षेपावाकुञ्चनकं प्रसारणं गमनम्।
पञ्चविधं कर्मैतत् परापरे द्वे तु सामान्ये ॥ १२० ॥

तत्र परं सत्ताख्यं द्रव्यत्वाद्यपरमथ विशेषस्तु।
निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिष्टः ॥ १२१ ॥

य इहायुतसिद्धानामाधाराधेयभूतभावानाम्।
संबन्ध इह प्रत्ययहेतुः स च भवति समवायः ॥ १२२ ॥

यौगे वैशेषिके तन्त्रे, प्रायः साधारणी क्रिया।
आचार्यः शङ्कर इति, नाम प्रागभिधापरम् ॥ १२३ ॥

अमीषां तर्कशास्त्राणि, षट् सहस्राणि कन्दली।
श्रीधराचार्यरचिता, प्रशस्तकरभाष्यकम् ॥ १२४ ॥

तत्र सप्तशतीमानं, सूत्रं तु त्रिशतीमितम्।
व्योमशिवाचार्यकृता, टीका व्योममतिर्मता ॥ १२५ ॥

सा स्यान्नव सहस्राणि, परा तु किरणावली ।
सा तूदयनसंदब्धा, उद्देशात् षट्सहस्रिका ॥ १२६ ॥

श्रीवत्साचार्यरचिता, टीका लीलावती मता ।
साऽपि स्यात् षट् सहस्राणि, एकं त्वात्रेयतन्त्रकम् ॥ १२७ ॥

तत्तु संप्रति व्युच्छिन्नं, शिष्या मन्दोद्यमा यतः ।
आचारव्यवहारौ च, प्रायश्चित्तं च ते विदुः ॥ १२८ ॥

जीवस्यात्यन्तिको दुःखवियोगो मोक्ष इष्यते ।
यौगानां च तथैवोक्तः, प्रायः साधर्मिका यतः ॥ १२९ ॥

शिवेनोलूकरूपेण, कणादस्य मुनेः पुरा ।
मतमेतत् प्रकथितं, तत औलूकमुच्यते ॥ १३० ॥

अक्षपादेन ऋषिणा, रचितत्वात्तु यौगिकम् ।
आक्षपादमिति ख्यातं, प्रायस्तुल्यं मतद्वयम् ॥ १३१ ॥

अथ बौद्धमतं वक्ष्ये, मौण्ड्यं कृत्तिः कण्मडलुः ।
लिङ्गं तेषां रक्तवस्त्रं, वेषः शौचक्रिया बहुः ॥ १३२ ॥

धर्मबुद्धसङ्घरूपं, तेषां रत्नत्रयं मतम् ।
तारा देवी पुनस्तेषां, सर्वविघ्नोपघातिनी ॥ १३३ ॥

सप्त तीर्थङ्करास्तेषां, कण्ठे रेखात्रयाङ्किताः ।
विपश्यी १ शिखी २ विश्वभूः ३, ककुच्छन्दश्च ४ काञ्चनः ५ १३४

काश्यपश्च ६ सप्तमस्तु शाक्यसिंहोऽर्कबान्धवः ७ ।
तथा राहुलसूः सर्वार्थसिद्धो गौतमान्वयः ॥ १३५ ॥

मायाशुद्धोदनसुतो, देवदत्ताग्रजश्च सः ।
शौद्धोदनिधर्मकीर्तिप्रमुखा गुरवो मताः ॥ १३६ ॥

प्रत्यक्षमनुमानं च, द्वे प्रमाणे तु तन्मते ।
चतुर्णामार्यसत्यानां, दुःखादीनां प्ररूपकः ॥ १३७ ॥

सर्वज्ञस्तन्मते बुद्धः, स प्रमेयचतुष्कवाक् ।
दुःखं समुदयो मार्गो, निरोधश्चेति तात्त्विकम् ॥ १३८ ॥

दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः ।
विज्ञानं वेदना संज्ञा, संस्कारो रूपमेव च ॥ १३९ ॥

समुदेति यतो लोके, रागादीनां गणोऽखिलः ।
आत्माऽऽत्मीयस्वभावाख्यः, समुदयः स उदाहृतः ॥ १४० ॥

क्षणिकाः सर्वसंस्कारा, इत्येवं वासना तु या ।
स मार्ग इह विज्ञेयो, निरोधो मोक्ष उच्यते ॥ १४१ ॥

सुगताचारलग्नस्य, ज्ञाननिर्मलता हि या ।
सा मुक्तिर्मन्यते बौद्धैः, कैश्चित् कैश्चिच्चितः क्षयः ॥ १४२ ॥

आत्मानं मन्वते नैते, ज्ञानमेव तु मन्वते ।
भवान्तरे सहचरं, संतानस्थं क्षणक्षयि ॥ १४३ ॥

चत्त्वारो बौद्धभेदाः स्युर्भक्तिस्तेषां पृथक् पृथक् ।
काव्यादमुष्माद् ज्ञातव्यास्तन्मतप्रतिपादकात् ॥ १४४ ॥

अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणेष्यते,
प्रत्यक्षेण हि बाह्यवस्तुविसरः सौत्रान्तिकैरादृतः
योगाचारमतानुगैरभिमता साकारबुद्धिः परा,
मन्यन्ते बत मध्यमाःकृतधियः स्वच्छां परां संविदम् ॥ १४५ ॥

तर्कभाषा हेतुबिन्दुर्न्यायबिन्दुस्तथाऽर्चटः ।
तर्कः कमलशैलश्च, तथा न्यायप्रवेशकः ॥ १४६ ॥

ज्ञानपारमिताद्यास्तु, ग्रन्थाः स्युर्दश तन्मते ।
प्रासादा वर्तुलास्तेषां, बुद्धदण्ड इति स्मृताः ॥ १४७ ॥

मृद्वी शय्या प्रातरुत्थाय पेया, मध्ये भक्तं पानकं चापराह्णे ।
द्राक्षाखण्डं शर्करा चार्द्धरात्रे, मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ॥ १४८ ॥

उक्ता लिङ्गादयो भेदा, दर्शनानां शिवैषिणाम् ।
तद्विस्तरस्तु न प्रोक्तो, यथाज्ञानमुदीरितः ॥ १४९ ॥

अष्टाङ्गयोगसिद्धयर्थं, दध्युर्लिङ्गानि लिङ्गिनः ।
सर्वे प्राहुस्तमष्टाङ्गं, तत्स्वरूपं वदाम्यथ ॥ १५० ॥

अहिंसासूनृतास्तेयब्रह्माकिञ्चनता यमाः ।
नियमाः शौचसन्तोषौ, स्वाध्यायतपसी अपि ॥ १५१ ॥

देवताप्रणिधानं च, करणं पुनरासनम् ।
प्राणायामः प्राणयमः, श्वासप्रश्वासरोधनम् ॥ १५२ ॥

प्रत्याहारस्त्विन्द्रियाणां, विषयेभ्यः समाहृतिः ।
धारणा तु क्वचिद् ध्येये, चित्तस्य स्थिरबन्धनम् ॥ १५३ ॥

ध्यानं तु विषये तस्मिन्नेकप्रत्ययसंततिः ।
समाधिस्तु तदेवार्थमात्राभासनरूपकम् ॥ १५४ ॥

एवं योगो यमाद्यङ्गैरष्टभिः संमतोऽष्टधा ।
मोक्षोपायो योगो ज्ञानश्रद्धानचरणात्मकः ॥ १५५ ॥

निर्वर्त्तको भवेद् धर्मो, दर्शनानां शिवैषिणाम् ।
राज्यादिभोगमिच्छूनां, गृहिणां तु प्रवर्तकः ॥ १५६ ॥

सर्वसावद्यविरतिर्धर्मः सिद्ध्यै निवर्त्तकः ।
इष्टापूर्त्तादिको धर्मो, भवेद् भूत्यै प्रवर्त्तकः ॥ १५७ ॥

धर्माधर्मविधातारं, जीवं दर्शनिनो विदुः ।
नास्तिकास्तं न मन्यन्ते, पुण्यापुण्यबहिर्मुखाः ॥ १५८ ॥

तेऽधिपर्षद् वदन्त्येवं, नास्ति जीवो न कर्म च ।
धर्माधर्मौ न विद्येते, ततः किं नु तयोः फलम् ? ॥ १५९ ॥

एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य, यद्वदन्त्यबहुश्रुताः ॥ १६० ॥

पिब खाद च चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥ १६१ ॥

पृथ्वी जलं तथा तेजो, वायुभूतचतुष्टयम् ।
प्रमाणभूतिरेतेषां, मानं त्वक्षजमेव हि ॥ १६२ ॥

पृथ्व्यादिभूतसंहत्यां, तथा देहादिसङ्गतिः ।
मदशक्तिः सुराङ्गेभ्यो, यद्वत् तद्वच्चिदात्मता ॥ १६३ ॥

तस्माद् दृष्टपरित्यागाद्, यददृष्टे प्रवर्त्तनम् ।
तद्धि लोकस्य मूढत्वं, चार्वाकाः प्रतिपेदिरे ॥ १६४ ॥

क्रमेण खण्डनं तेषां, जीवस्तावत्प्रपद्यताम् ।
अहं दुःखी सुखी चाहमिति प्रत्यययोगतः ॥ १६५ ॥

घटं वेद्म्यहमित्यत्र, त्रितयं प्रतिभासते ।
कर्म क्रिया च कर्त्ता च, तत्कर्त्ता किं निषिध्यते ? ॥ १६६ ॥

शरीरमेव चेत्कर्तृ, न कर्तृ तदचेतनम् ।
भूतचैतन्ययोगाच्च, चेतनं तदसङ्गतम् ॥ १६७ ॥

मया दृष्टं श्रुतं स्पृष्टं, घ्रातमास्वादितं स्मृतम् ।
इत्येककर्तृका भावा, भूतचिद्वादिनः कथम् ? ॥ १६८ ॥

स्वसंवेदनतः सिद्धे, स्वदेहे चेतनात्मनि ।
परदेहेऽपि तत्सिद्धिरनुमानेन साध्यते ॥ १६९ ॥

बुद्धिपूर्वा क्रिया दृष्टा, स्वदेहेऽन्यत्र तद्गतिः ।
प्रमाणबलतः सिद्धा, केन नाम निवार्यते ? ॥ १७० ॥

तत्परलोकिनः सिद्धौ, कर्मबन्धो न दुर्घटः ।
विचित्राध्यवसायस्य, स हि बध्नात्यनादितः ॥ १७१ ॥

पुण्यपापमयं कर्म, चीयते वाऽपचीयते ।
तद्वशात् सुखदुःखानि, न तु यादृच्छिकान्यहो ! ॥ १७२ ॥

नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां, कादाचित्कत्वसम्भवः ॥ १७३ ॥

स्तन्यपानाभिलाषो यत्, प्रथमं बालके भवेत् ।
पूर्वजन्माभ्यासतोऽसौ, तस्मिन् जन्मन्यशिक्षणात् ॥ १७४ ॥

तस्मान्नास्तिकवाक्येषु, रतिः कर्तुं न युज्यते ।
आत्मा ज्ञानी कर्ममुक्तः, परलोकी च बुध्यताम् ॥ १७५ ॥

स चाष्टाङ्गेन योगेन, कर्मोन्मूल्य समन्ततः ।
आप्नोति मुक्तिं तत्रोच्चैरानन्दं स्वादयत्यहो ! ॥ १७६ ॥

सादिकमनन्तमनुपममव्याबाधं स्वभावजं सौख्यम् ।
प्राप्तः स केवलज्ञानदर्शनो मोदते मुक्तः ॥ १७७ ॥

सर्वथाऽप्यजिघांसूनां, गुरुदेवहितैषिणाम् ।
अदीर्घमत्सराणां च, मुक्तिरासन्नवर्त्तिनी ॥ १७८ ॥

कालस्वभावनियतिचेतनेतरकर्मणाम् ।
भवितव्यतया पाके, मुक्तिर्भवति नान्यथा ॥ १७९ ॥

बालावबोधनकृते मलधारिसूरिः,
श्रीराजशेखर इति प्रथमानबुद्धिः ।
सम्यग्गुरोरधिगतोत्तमतर्कशास्त्रः,
षड्दर्शनीमिति मनाक् कथयांबभूव ॥ १८० ॥

पू.आ.श्रीराजशेखरसूरिकृता

# ॥ स्याद्वादकलिका ॥

षट्द्रव्यज्ञं जिनं नत्वा स्याद्वादं वच्मि तत्र सः ।
ज्ञानदर्शनतो भेदाऽ-भेदाभ्यां परमात्मसु ॥ १ ॥

सिसृक्षा संजिहीर्षा च स्वभावद्वितयं पृथक् ।
कूटस्थनित्ये श्रीकण्ठे कथं संगतिमङ्गति ॥ २ ॥

गुणश्रुतित्रयोर्व्यादिरूपतापि महेशितुः ।
स्थिरैकरूपताख्याने वर्ण्यमाना न शोभते ॥ ३ ॥

मीनादिष्ववतारेषु पृथग्वर्णाङ्ककर्मताः ।
विष्णोर्नित्यैकरूपत्वे कथं श्रद्दधति द्विजाः ॥ ४ ॥

शक्तेः स्युरम्बिका वामा ज्येष्ठा रौद्रीति चाभिधाः ।
दशाभेदेन शाक्तेषु परावर्त्तं विना न ताः ॥ ५ ॥

चितो निरन्वये नाशे कथं जन्मान्तरस्मृतिः ।
ताथागततमे न्याय्या न च नास्त्येव सा यतः ॥ ६ ॥

इत एकनवते कल्पे शक्त्या मे पुरुषो हतः ।
तेन कर्मविपाकेन पादे विद्धोऽस्मि भिक्षवः ॥ ७ ॥

सुखदुःखनृदेवादि-पर्यायेभ्यो भवाङ्गिषु ।
गतिस्थित्यन्यान्यवर्णा-दिधर्मेभ्यः परमाणुषु ॥ ८ ॥

वर्णगन्धरसस्पर्शै-स्तैस्तैर्भिन्नाक्षगोचरैः ।
स्यात्तादात्म्यस्थितैः स्कन्धे-ष्वनेकान्तः प्रघुष्यताम् ॥ ९ ॥

प्रतिघातशक्तियोगाच्छब्दे पौद्गलिकत्ववित् ।
भेदैस्तारतरमत्वाद्यैः, स्याद्वादं साधयेद् बुधः ॥ १० ॥

तर्कव्याकरणागम-शब्दार्थालङ्कृतिध्वनिच्छन्दः ।
एकत्रपादवाक्यो दृष्टविभागं युतं सर्वम् ॥ ११ ॥

स्वरादिवर्णस्यैकस्य संज्ञास्तास्ताः स्वकार्यगाः ।
शब्दे लिङ्गादिनानात्वं स्याद्वादे साधनान्यहो ॥ १२ ॥

सादित्वान्नाशित्वा-दालोकतमोभिधानराशियुगात् ।
निजसामग्र्योत्पादा-न्नालोकाभावता तमश्छाये ॥ १३ ॥

चाक्षुषभावाद्रसवीर्य-पाकतो द्रव्यतास्त्वनेकान्तः ।
परिणामविचित्रत्वा-दत्राप्यालोकवत्सिद्धः ॥ १४ ॥

उपघातानुग्रहकृति-कर्मणि पौद्गलिकता विषपयोवत् ।
तत्तत्परिणतिवशत-स्तत्रोत्पादव्ययध्रुवता ॥ १५ ॥

मैत्राद्यैर्मुज्जनकं कामक्रोधादिभिः प्रयासकरम् ।
परमाणुमयं चित्तं परिणतिचैत्र्यात्त्रिकात्मकता ॥ १६ ॥

धर्माधर्मलोकखानां तैस्तैः पुद्गलजन्तुभिः ।
स्यात् संयोगविभागाभ्यां स्याद्वादे कस्य संशयः ॥ १७ ॥

अलोकपुष्करस्यापि त्रिसंवलिततां भणेत् ।
तत्तत्संयोगविभाग-शक्तियुक्तत्वचैत्र्यतः ॥ १८ ॥

व्यावहारिककालस्य मुख्यकालस्य चास्तु सा ।
तत्तद्भावपरावर्त-स्वभावबहुलत्वतः ॥ १९ ॥

एककर्तृकयोः पूर्व-काले क्त्वाप्रत्ययः स्थितः ।
स एव नित्यानित्यत्वं ब्रूतेऽर्थे चिन्तयास्तु नः ॥ २० ॥

पीयमानं मदयति मध्वित्यादि द्विगं पदम् ।
स्याद्वादभेरीभाङ्कारै-र्मुखरीकुरुते दिशः ॥ २१ ॥

अनवस्थासंशीति-व्यतिकरसंकरविरोधमुख्या ये ।
दोषाः परैः प्रकटिताः स्याद्वादे ते तु न सजेयुः ॥ २२ ॥

नित्यमनित्यं युगलं स्वतन्त्रमित्यादयस्त्रयो दूष्याः ।
तुर्यः पक्षः शबलद्वयी-मयो दूष्यते केन ॥ २३ ॥

एकत्रोपाधिभेदेन बौद्धा द्वन्द्वं क्षणे क्षणे ।
न विरुद्धं रूपरस-स्थूलास्थूलादिधर्मवत् ॥ २४ ॥

विनाशः पूर्वरूपेणो-त्पादो रूपेण केनचित् ।
द्रव्यरूपेण च स्थैर्य-मनेकान्तस्य जीवितम् ॥ २५ ॥

द्रव्यक्षेत्रकालभावैः स्वैः स्वत्वमपरैः परम् ।
भेदाभेदानित्यनित्यं पर्यायद्रव्यतो वदेत् ॥ २६ ॥

अंशापेक्षमनेकत्व-मेकत्वं त्वंश्यपेक्षया ।
प्रमाणनयभङ्ग्या चानभिलाप्याभिलाप्यते ॥ २७ ॥

विजातीयात्स्वजातीया-द्व्यावृत्तेरनुवृत्तितः ।
व्यक्तिजाती भणेन्मिश्रे एकान्ते दूषणे क्षणात् ॥ २८ ॥

नान्वयः स हि भेदित्वा-न्न भेदोऽन्वयवृत्तितः ।
मृद्भेद्व्यवश्यसंसर्ग-वृत्तिजात्यन्तरं घटः ॥ २९ ॥

भागे सिंहो नरो भागे योऽर्थो भागद्वयात्मकः ।
तमभागं विभागेन नरसिंहं प्रचक्षते ॥ ३० ॥

नरसिंहस्वरूपत्वान्न सिंहो नररूपतः ।
शब्दविज्ञानकार्याणां भेदाज्जात्यन्तरं हि सः ॥ ३१ ॥

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥ ३२ ॥

पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्माद्वस्तु त्रयात्मकम् ॥ ३३ ॥

जन्यत्वं जनकत्वं च क्षणस्यैकस्य जल्पता ।
बौद्धेन युक्त्या मुक्तीश तवैवाङ्गीकृतं मतम् ॥ ३४ ॥

प्रमाणस्यापि फलतां फलस्यापि प्रमाणताम् ।
वदद्भ्यां कणभक्षाक्ष-पादाभ्यां त्वन्मतं मतम् ॥ ३५ ॥

एकस्यां प्रकृतौ धर्मौ प्रवर्त्तननिवर्त्तने ।
स्वीकृत्य कपिलाचार्या-स्त्वदाज्ञामेव बिभीरे ॥ ३६ ॥

अनर्थक्रियाकारित्व-मवस्तुत्वं च तत्कृतम् ।
एकान्तनित्यानित्यादौ जल्पेन्मिश्रे त्वदोषताम् ॥ ३७ ॥

आत्मानमात्मना वेत्ति स्वेन स्वं वेष्टयत्यहिः ।
संबन्धा बहवश्चैक-त्रेति स्याद्वाददीपका: ॥ ३८ ॥

वैद्यकज्योतिषाध्यात्मा-दिषु शास्त्रेषु बुद्धिमान् ।
विष्वग् पश्यत्यनेकान्तं वस्तूनां परिणामतः ॥ ३९ ॥

द्रव्यषट्केऽप्यनेकान्त-प्रकाशाय विपश्चिताम् ।
प्रयोगान् दर्शयामास सूरिः श्रीराजशेखरः ॥ ४० ॥

श्री पद्मसागरगणिकृतः

## ॥ युक्तिप्रकाशः ॥

प्रणम्य व्यक्तभक्त्या श्री-वर्द्धमानक्रमाम्बुजम् ।
*आत्मार्थं तन्यते युक्ति-प्रकाशो जैनमण्डनम्* ॥ १ ॥

चेद् बौद्ध ! वस्तु क्षणिकं मते ते, तत्साधकं मानमदस्तथैव ।
तथा च तेन ह्यसता कथं तत्, प्रमेव धूमेन हुताशनस्य ॥ २ ॥

तत्संततिर्नैव पदार्थसंततेः, संग्राहिकाद्यक्षण एव नष्टा ।
नाशग्रहौ नो युगपद् भवेतां, विरुद्धभावादिव बालवृद्धते ॥ ३ ॥

प्रामाण्यमुच्चैर्वदताऽपरोक्षा-नुमानयोरेव निषिद्धमेतत् ।
शब्देषु बौद्ध त्वयका तथा चा-ऽप्रामाण्यमासं तकयोर्न दृष्टम् ॥ ४ ॥

नान्तर्भवत्येव किलानुमाने, शाब्दं प्रमाणं विपरीतरूपम् ।
प्रत्यक्षवत्तस्य यतो विभिन्ना, समग्रसामग्र्यपि सुप्रतीता ॥ ५ ॥

न संनिकर्षोऽपि भवेत्प्रमाणं, प्रमाकृतौ तद्व्यभिचारदर्शनात् ।
अप्राप्यकार्यम्बकसंनिकर्षो, घटादिनाऽर्थेन कथं भवेत् पुनः ॥ ६ ॥

चेत्प्राप्यकार्यम्बकमस्ति यौगात्यासन्नमर्थं हि कथं न पश्यति ।
तथाविधं सत्किमु तेषु गत्वा, गृह्णाति वा यान्त्यथ तेऽत्र देशे ॥ ७ ॥

द्विधाप्ययुक्तं हि गतस्य तस्य, वह्न्यादिकार्थेषु कथं न दाहः ।
भूभूधराद्यर्थसमागमेऽपि, नाच्छादनं स्यात्किमु तस्य चक्षुषः ॥ ८ ॥

न तैजसत्वादथ तस्य दाहो वह्न्यादिना चेदिति नैवमेतत् ।
न तैजसं स्यात्तमसो ग्रहाद्यत-स्तेजो न गृह्णाति च तत् क्षणोति॥ ९ ॥

बोधस्य बोधान्तरवेद्यतायां, यौगत्वया नो ददृशेऽनवस्था ।
सौवग्रहव्यग्रतया पदार्था-ग्रहश्च शम्भोरसमग्रवित्त्वम् ॥ १० ॥

सकर्तृकत्वेऽवनिभूधरादिषु, साध्येऽत्र हेतुर्बत कार्यभावः ।
न्यस्तस्त्वया तत्र कथं न दृष्टः शरीरिजन्यत्वमुपाधिरेषः ॥ ११ ॥

चेदेक एवास्ति हरस्तदाऽसौ, न जीवभावं भजतेऽन्तरिक्षवत् ।
अथेश्वरश्चेत् स्ववशः कथं न , करोति लोकं सुखिनं समग्रम्॥ १२ ॥

चेत्सर्वगत्वं हि हरस्य मन्यसे-ऽविज्ञानविज्ञानविभक्त आत्मा ।
मान्यस्तदीयोऽथ समग्रगत्वे, ज्ञानस्य तत्त्वं विजहाति तत्पुनः॥ १३ ॥

चिच्छक्तिसंक्रान्तिवशेन बुद्धि-र्जडापि साङ्ख्यस्य तवाऽजडैव ।
आभासते यन्न च युक्तमेत-च्चिच्छक्तिराप्नोति न संक्रमं यतः॥ १४ ॥

तस्या अथो संभवनेऽपि बुद्धि-र्जडत्वतो न क्रियते सचेतना ।
सचेतनस्यापि नरस्य संक्रमात्, यद्दर्पणो नैव भवेत् सचेतनः॥ १५ ॥

यदि स्तः प्रकृतेरेव, बन्धमोक्षौ तदा ध्रुवम् ।
वन्ध्याजस्येव जीवस्या, ऽवस्तुत्वं न भवेत्कथम् ॥ १६ ॥

न स्तश्चेदात्मनो बन्ध-मोक्षौ तर्हि कथं त्वया ।
भोगीति मन्यते बद्धं, प्रकृत्या भोगमस्ति यत् ॥ १७ ॥

स्वयं च विहितं कृत्यं, स्वयं भोक्तव्यमेव भोः ।
दृश्यते ह्यत्र लोकेऽपि, तद्भोगस्तस्करादिषु ॥ १८ ॥

*एकान्तनित्यं गगनादिवस्तु, स्वभावभेदात्किमु कार्यकारि ।*
स्वभावभेदस्तु न तत्र चेद् भवेद्भवेत्तदा तज्जनितार्थसंकरः ॥ १९ ॥

न सर्वथाऽनित्यतया प्रदीपा-दिकस्य नाशः परमाणुनाशात् ।
तद्दीपतेजःपरमाणवोऽमी, आसादयन्त्येव तमोऽणुभावम् ॥ २० ॥

द्रव्यं तमो यद् घटवत् स्वतन्त्र-तया प्रतीतेरथ रूपवत्त्वात् ।
नाऽभावरूपं प्रतियोगिनोऽपि, तथा स्वरूपं किल केन वार्यम्॥ २१ ॥

काणाद शब्दस्तव चेन्नभोगुणो-ऽनातीन्द्रियः स्यात् परिमाणवत्कथम् ।
गुणोऽपि चेत्तर्हि तदाश्रये च, द्रव्येऽगृहीते किमु गृह्यतेऽसौ ॥ २२ ॥

द्रव्यं हि शब्दो गतियुक्तभावाद्, व्याघातकत्वाच्च गुणान्वितत्वात् ।
अर्थक्रियाकारितया च किंचा-नुद्भूतरूपादिगुणान्वितोऽसौ ॥ २३ ॥

नभः प्रदेशश्रेणिष्वा-दित्योदयवशाद् दिशाम् ।
पूर्वादिको व्यवहारो, व्योम्नो भिन्ना न दिक्ततः ॥ २४ ॥

आत्मा महापरिमाणा-धिकरणं न संभवी ।
असाधारणसामान्य-वत्त्वेऽनेकत्वतः सति ॥ २५ ॥

नास्त्यात्मनश्चेत्तव सक्रियत्वं, देशान्तरे चेह भवान्तरे वा ।
गतिः कथं तर्हि भवेत्तथा च, वायोरिवास्मान्न विभुत्वमस्य ॥ २६ ॥

जीवेऽत्र मध्यं परिमाणमस्त्य-विभुत्वतः कुम्भ इवावदातम् ।
पर्यायनाशादथ पिण्डभावा-न्नानित्यता नापि च नित्यतास्मिन्॥ २७ ॥

इति स्फुरद्वाचकधर्मसागर-क्रमाब्जभृङ्ग-कविपद्मसागरः ।
युक्तिप्रकाशं स्वपरोपकारं कर्तुं चकारार्हतशासनस्थः ॥ २८ ॥

अज्ञातकर्तृकः

# ॥ षड्दर्शनपरिक्रमः ॥

जैनं मैमांसकं बौद्धं साङ्ख्यं सै(शै)वं च नास्तिकम् ।
स्वं स्वं च तर्कभेदेन जानीयाद(द्द)र्शनानि षट् ॥ १ ॥

बल-भोगोपभोगानामुभयोर्दान-लाभयोः ।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सनम् ॥ २ ॥

हासो रत्यरती राग द्वेषाववव(वि)रति[:]स्मरः ।
शोको मिथ्यात्वमेतेऽ ष्टादश दोषा न यस्य सः ॥ ३ ॥

जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः ।
ज्ञान-दर्शन-चारित्राण्यपवर्गस्य वर्त्तिन (वर्त्तनी) ॥ ४ ॥

स्याद्वादश्च प्रमाणे द्वे प्रत्यक्षं चो(च) परोक्षकम् ।
नित्यानित्या(त्यं) जगत् सर्वं नव तत्त्वानि सप्त वा ॥ ५ ॥

जीवाजीवौ पुण्यपापे आश्रवः संवरोऽपि च ।
बन्धो निर्जरणं मुक्तिरेषां व्याख्याऽधुनोच्यते ॥ ६ ॥

चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः ।
सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्ययः ॥ ७ ॥

आश्रवः कर्मसम्बन्धः कर्मरोधस्तु संवरः ।
कर्मणां बन्धनाद् बन्धो निर्जरा तद्वियोजनम् ॥ ८ ॥

अष्टकर्मक्षयान्मोक्षोऽप्यन्तर्भावश्च कश्चन ।
पुण्यस्य संवरे पापस्याऽऽश्रवे क्रियते पुनः ॥ ९ ॥

लब्धानन्तचतुष्कस्य लोकाग्रस्थस्य चाऽऽत्मनः ।
क्षीणाष्टकर्मणो मुक्तिरव्यावृत्तिर्जिनोदिता ॥ १० ॥

सरजोहरणा भैक्ष्यभुजो लुञ्चितमूर्द्धजाः ।
श्वेताम्बराः क्षमाशीलाः निस्सङ्गा जैनसाधवः ॥ ११ ॥

लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः ।
ऊर्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः ॥ १२ ॥

भुङ्क्ते न केवली न स्त्री मोक्षगेति दिगम्बराः ।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः समम् ॥ १३ ॥

मीमांसकौ द्विधा कर्म-ब्रह्ममीमांसकस्ततः ।
वेदान्ती मन्यते ब्रह्म कर्म भट्ट-प्रभाकरौ ॥ १४ ॥

प्रत्यक्षमनुमानं च वेदाश्चोपमया सह ।
अर्थापत्तिरभावश्च भट्टानां षट्प्रमाण्यसौ ॥ १५ ॥

प्रभाकरमते पञ्च तान्येवाऽभाववर्जनात् ।
अद्वैतवादी वेदान्ती प्रमाणं तु यथा तथा ॥ १६ ॥

सर्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिनाम् ।
आत्मन्येव लयो मुक्तिर्वेदान्तिकमते मता ॥ १७ ॥

अकुकर्मा सषट्कर्मा शूद्रान्नादिविवर्जकः ।
ब्रह्मसूत्री द्विजो भट्टो गृहस्थाश्रमसंस्थितः ॥ १८ ॥

भगवन्नामधेयास्तु द्विजा वेदान्तदर्शने ।
विप्रगेहभुजस्त्यक्तोपवीतादव्र(ता ब्र)ह्मवादिनः ॥ १९ ॥

चत्वारो भगवद्भेदाःकुटीचर-बहूदकौ ।
हंसः परमहंसश्चाऽधिकोऽमीषु परः परः ॥ २० ॥

बौद्धानां सुगतो देवो विश्वं च क्षणभङ्गुरम् ।
आर्यसत्याख्यया तत्त्वचतुष्टयमिदं क्रमात् ॥ २१ ॥

दुःखमायतनं चैव ततः समुदयो मतः ।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः ॥ २२ ॥

दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना सञ्ज्ञा संस्कारो रूपमेव च ॥ २३ ॥

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्मायतनमेतानि द्वादशाऽऽयतनानि तु ॥ २४ ॥

रागादीनां गणो यस्मात् समुदेति नृणां हृदि ।
आत्मा(त्मना)ऽऽत्मीयस्वभावाख्यः स स्यात् समुदयः पुनः॥ २५ ॥

क्षणिकाः सर्वसंस्काराः इति या व(वा)सना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥ २६ ॥

प्रत्यक्षमनुमानं च प्रमाणद्वितयं पुनः ।
चतुःप्रस्थानका बौद्धाः ख्याता वैभाषिकादयः ॥ २७ ॥

अर्थो ज्ञानान्वितो वैभाषिकेण बहुमन्यते ।
सौत्रान्तिकेण प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥ २८ ॥

आकारसहिता बुद्धिर्योगाचारस्य सम्मता ।
केवलं संविदं स्वस्थां मन्यन्ते मध्यमाः पुन ॥ २९ ॥

रागादिज्ञानसन्तानवासनोच्छेदसम्भवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता ॥ ३० ॥

कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्वाह्णभोजनम् ।
सङ्घो रक्ताम्बरत्वं च शिश्र(श्रि)ये बौद्धभिक्षुभिः ॥ ३१ ॥

साङ्ख्ये देवः शिवः कैश्चिन्मत्तो(तो) नारायणः परैः ।
उभयो [:] सर्वमप्यन्यत्तत्त्वप्रभृतिकं समम् ॥ ३२ ॥

स(सा)ङ्ख्यानां स्युर्गुणाः सत्त्वं रजस्तम इति त्रयः ।
साम्यावस्था भवे(व)त्येषां त्रयाणां प्रकृति(तिः) पुनः ॥ ३३ ॥

प्रकृतेश्च महांस्तावदहङ्कारस्ततोऽपि च ।
पञ्च बुद्धीन्द्रियाणि स्युश्चक्षुरादीनि पञ्च च ॥ ३४ ॥

कर्मेन्द्रियाणि वाक्-पाणिचरणोपस्थ-पायवः ।
मनश्च पञ्च तन्मात्राः शब्द(ब्दो) रूपं रसस्तथा ॥ ३५ ॥

स्पर्शो गन्धोऽपि तेभ्यः स्यात् पृथ्व्याद्यं भूतपञ्चकम् ।
इयं प्रकृतिरेतस्यां परस्तु पुरुषो मतः ॥ ३६ ॥

पञ्च विंशतितत्त्वीयं नित्यं साङ्ख्यमते जगत् ।
प्रमाणत्रितयं चाऽत्र प्रत्यक्षमनुमाऽऽगमः ॥ ३७ ॥

यदे(दै)व ज्ञायते भेदः प्रकृते(:) पुरुषस्य च ।
मुक्तिरुक्ता तदा साङ्ख्यैः ख्यातिः सैव च भण्यते ॥ ३८ ॥

साङ्ख्यः शिखी जडी मुण्डी कषायाद्यम्बरोऽपि च ।
वेषे नी(नाऽऽ)स्थैव साङ्ख्यस्य पुनस्तत्त्वे महाग्रहः ॥ ३९ ॥

शैवस्य दर्शने तर्कावुभौ न्याय-विशेषकौ ।
न्याये षोडशतत्त्वी स्यात् षट्तत्त्वी च विशेषकैः(के) ॥ ४० ॥

अन्योन्यतत्त्वान्तर्भावात् द्वयोर्भेदोऽस्ति नाऽस्ति वा ।
द्वयोरपि शिवो देवो नित्य(:) सृष्ट्यादिकारकः ॥ ४१ ॥

नैयायिकानां चत्वारि प्रमाणानि भवन्ति च ।
प्रत्यक्षमागमोऽन्यश्चाऽनुमानु(न)मुपमाऽपि च ॥ ४२ ॥

प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ।
दृष्टान्तोऽप्यथ सिद्धान्तावयवौ तर्क - निर्णयौ ॥ ४३ ॥

वादो जल्पो वितण्डा च हेत्वाभासच्छलानि च ।
जातयो निग्रहस्थानानीति तत्त्वानि षोडश ॥ ४४ ॥

वैशेषके मते तावत् प्रमाणत्रितयं भवेत् ।
प्रत्यक्षमनुमानं च तार्त्तीयकमथाऽऽगमः ॥ ४५ ॥

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायश्च षट्तत्त्वी तद्व्याख्यानमथोच्यते ॥ ४६ ॥

द्रव्यं नवविधं प्रोक्तं पृथ्वी-जल-वह्नयस्तथा ।
पवनो गगनं कालो दिगात्मा मन इत्यपि ॥ ४७ ॥

नित्यानित्यानि चत्वारि कार्यकारणभावतः ।
मनो-दिग्(क्) काल आत्मा च व्योम नित्यानि पञ्च तु॥ ४८ ॥

स्पर्शो रूपं रसो गन्धः सङ्ख्याऽथ परिमाणकम् ।
पृथक्त्वमथ योगः विभागोऽथ परत्र(त्व)कम् ॥ ४९ ॥

अपरत्वं बुद्धिसौख्ये (दुःखे)च्छे द्वेष-यत्नकौ ।
धर्मा-धर्मौ च संस्कारा गुरु(त्वं) द्रव इत्यपि ॥ ५० ॥

स्नेहः शब्दो गुणा एवं विंशतिश्चतुरन्विता ।
अथ कर्माणि वक्षा(क्ष्या)मः प्रत्येकमभिधानतः ॥ ५१ ॥

उत्क्षेपणावक्षेपणा-कुञ्चन प्रसारणम् ।
गमनानीति कर्माणि पञ्चोक्तानि तदागमे ॥ ५२ ॥

सामान्यं भवति द्वेधा परं चैवाऽपरं तथा ।
प्र(पर)माणुषु वर्तन्ते विशेषा नित्यवृत्तयः ॥ ५३ ॥

भवेदयुतसिद्धानामाधाराधेयवर्तिनाम् ।
सम्बन्धः समवायाख्य इहप्रत्ययहेतुकः ॥ ५४ ॥

विषयेन्द्रियबुद्धीनां वपुषः सुख-दुःखयोः ।
अभावो(वा)दात्मसंस्थानं मुक्ति नै(नै)यायिकैर्मता ॥ ५५ ॥

चतुर्विंशवैशेषिकगुणान्तर्गुणा(न्तरगुणा)नव ।
बुद्ध्यादयस्तदुच्छेदो मुक्तिर्वैशेषिकी तु सा ॥ ५६ ॥

आधार-भस्म-को(कौ)पीन जटा-यज्ञोपवीतिनः ।
मन्त्राचारादिभेदेन चतुर्धा स्युस्तपस्विनः ॥ ५७ ॥

शैवाः पाशुपताश्चैव महाव्रतधरास्तथा ।
तुर्याः कालमुखा मुख्या भेदा एते तपस्विनाम् ॥ ५८ ॥

पञ्चभूतात्मकं वस्तु प्रत्यक्षं च प्रमाणकम् ।
नास्तिकानां मते नान्यदन्यत्रा(दत्रा)ऽमुत्र शुभाशुभम् ॥ ५९ ॥

प्रत्यक्षमविसंवादि ज्ञानमिन्द्रियगोचरम् ।
लिङ्गतोऽनुम(मि) तिर्धूमादिव वह्नेरवस्थितिः ॥ ६० ॥

अनुमानं त्रिधा पूर्वं शेषं सामान्यतो यथा ।
दृष्टेः सस्यं नदीपूराद् वृ-ष्टिरस्ताद्रवेर्गतिः ॥ ६१ ॥

ख्यातं सामान्यतः साध्यं साधनं चोपमा यथा ।
स्याद् गोवद् गवयः स्नानादिमत्त्वमुभयोरपि ॥ ६२ ॥

आगमश्चाऽऽप्तवचनं स च कस्याऽपि कोऽपि च ।
वाच्याप्रति(ती)तौ तत्सिद्ध्यै प्रोक्ताऽर्थापत्तिरुत्तमैः ॥ ६३ ॥

बहुपीनोऽह्नि नाऽश्नाति रात्रावित्यर्थतो यथा ।
पञ्चप्रमाणसामर्थ्ये वस्तुसिद्धिरभावतः ॥ ६४ ॥

स्थापितं वादिभिः स्वं स्वं मतं तत्त्वप्रमाणतः ।
तत्त्वं सत्परमार्थेन प्रमाणं तत्त्वसाधकम् ॥ ६५ ॥

सन्तु सर्वाणि शास्त्राणि सरहस्यानि दूरतः ।
एकमप्यक्षरं सम्यक् शिक्षितं नैव निष्फलम् ॥ ६६ ॥

अज्ञातकर्तृका

## ॥ अनुमानमातृका ॥

अविनाभूताल्लिङ्गाद्विज्ञानं लिङ्गिनोऽनुमानं स्यात् ।
लिङ्गस्य लिङ्गिना सह या व्याप्तिः सोऽविनाभावः ॥ १ ॥

यौगदृगपेक्षया तत्पञ्चांशं ते प्रतिज्ञया (१) हेतुः (२) ।
दृष्टान्तः (३) सोपनयो (४) निगमनम् (५) इति निगदिता विदुरैः २

श्रितसाध्यधर्म्मपक्षाऽपरनामकधर्मिगीः प्रतिज्ञाख्यः ।
प्रथमो यथेह पृथ्वीधरे बृहद्भानुरिति हेतुः ॥ ३ ॥

हेतुत्वाभिव्यञ्जकविभक्तिका लिङ्गवाग् यथा धूमात् ।
तद्व्याप्ते रुपदर्शनभूर्दृष्टान्तोऽथ सा द्वेधा ॥ ४ ॥

हेतौ सति साध्यस्याऽवश्यम्भावित्वमन्वयव्याप्तिः ।
यद्वद् धूमो यत्राऽग्निस्तत्रेत्यत्र पाकगृहम् ॥ ५ ॥

व्यतिरेकव्याप्तिः स्याद्धेतौ साध्येऽसति ध्रुवमभावः ।
यद्वद्यत्राग्निर्नो न तत्र धूमोऽपि कूपोऽत्र ॥ ६ ॥

धूमश्चात्रेत्युपसंहरणं हेतोश्च धर्म्मिणि तुरीयः ।
साध्यस्य तन्निगमनं स्यात्तस्मादग्निरत्रेति ॥ ७ ॥

हेत्वाभासाः पञ्चाऽसिद्धोऽनैकान्तिको विरुद्धश्च ।
कालात्ययाऽपदिष्टः प्रकरणसम इति मताश्चतुरैः ॥ ८ ॥

सोऽसिद्धश्चिद्रूपैरनिश्चिता पक्षवर्तिता यस्य ।
यद्वदनित्यः शब्दश्चक्षुर्दृश्यत्वतो घटवत् ॥ ९ ॥

स विरुद्धः साध्यविपर्ययेण सह यस्य जायते व्याप्तिः ।
यद्वच्छब्दो नित्यः कृतकत्वादन्तरिक्षमिव ॥ १० ॥

सोऽनैकान्तिकनामा पक्ष-सपक्षवदितो विपक्षं यः ।
व्योमवदव्ययशब्दं साधयत इव प्रमेयत्वम् ॥ ११ ॥

प्रत्यक्षादिनिराकृतसाध्यः कालात्ययापदिष्टाख्यः ।
जलवच्छीतलमनलं यथा पदार्थत्वतो वदतः ॥ १२ ॥

साध्यविपर्यययोः स्यात्तुल्यः प्रकरणसमो यथा नित्यः ।
शब्दः पक्षसपक्षाऽन्यतरत्वादन्तरिक्षमिवं ॥ १३ ॥

महोपाध्यायश्रीसूरचन्द्रगणिविरचितः

# ॥ जैनतत्त्वसारः ॥

## ॥ प्रथमोऽधिकार ॥

संशुद्धसिद्धान्तमधीशमिद्धं, श्रीवर्धमानं प्रणिपत्य सत्यम् ।
कर्मात्मपृच्छोत्तरदानपूर्वं, किञ्चिद्विचारं स्वविदे समूहे ॥ १ ॥

आत्मायमार्याः किल कीदृशोऽस्ति, नित्यो विभुश्चेतनवानरूपी ।
तथा च कर्माणि तु कीदृशानि, जडानि रूपीणि चयाचयीनि ॥ २ ॥

जीवाः पृथिव्यादिमसूक्ष्मवृद्ध-निगोदभिन्ना हि भवन्त्यनन्ताः ।
नानाविधाऽवाससजातियोनि-भिन्नाः समस्ताः किल केवलीक्ष्याः॥३॥

कर्माणि तेभ्यो यदनन्तकानि, समग्रलोकाम्बरसंस्थितानि ।
घनं किमङ्ग्र्येकतरप्रदेशे-ऽप्यनन्तसङ्ख्यानि शुभाशुभानि ॥ ४ ॥

अनन्तसङ्ख्याः किल कर्मवर्गणा, जीवप्रदेशे परिकल्प्य एकके ।
शुभाशुभाः केवलदृष्टिदृष्टा, मुक्ता अमूभ्यः खलु ते हि सिद्धाः॥ ५ ॥

अतस्तु कर्माणि समग्रलोका-काशाश्रितानीह निरन्तराणि ।
तेनैव जीवा हि भवन्ति कर्मा-वृता वसूनीव मृदाविलानि ॥ ६ ॥

कथं विभो ! कर्मण आत्मनश्च, योगोऽयमेषोऽजनि भिन्नजात्योः ।
अनादिसंसिद्ध इहोच्यते यो, हेमाश्मनोवारणिचित्रभान्वोः ॥ ७ ॥

दुग्धाज्ययोर्वा युगपद्भवोऽस्त्ययं, यथा पुनः पावकसूर्यकान्तयोः ।
सुधा सुधाभृच्छिलयोः सहोत्थितः, कर्तुर्गुणानामथ कर्तृवादिनाम्॥८॥

कर्मात्मनोरेवमनादिसिद्धो, योगोऽस्त्ययं केवलिनः समूचुः ।
अस्यापि भेदो विदितस्तथाविधात्, सामग्र्ययोगात् कनकाश्मनोरिव ९

## ॥ द्वितीयोऽधिकारः ॥

ताद्दक्स्वभावान्नियतेर्भविष्य-त्कालाच्छुभाशोभनभुक्तिहेतोः ।
जीवस्तु कर्माणि समाददीत, शुभाशुभानीह पुरःस्थितानि ॥ १० ॥

कर्माणि योगीन्द्र ! जडानि सन्ति, तानि स्वयं नाश्रयितुं क्षमन्ते ।
आत्मा तु बुद्धः स्वयमेव जानन्, कर्माण्यशस्तानि कथं हि लाति ॥११॥

को नाम विद्वानशुभं हि वस्तु, गृह्णाति मत्वा किल यः स्वतन्त्रः ।
सत्यं विजानन्नपि भावि ताद्दक्-कालादिनोदादशुभं हि लाति॥ १२ ॥

तथाहि कश्चिद् धनवानपीह, खादेद् भविष्यन्नियतिप्रणुन्नः ।
खलं विबोधन्नपि मोदकादि-स्वादिष्टवस्तूनि यतः स्वतन्त्रः ॥ १३ ॥

अनन्यमार्गश्च तथैव कश्चित्, स्थानं निजेष्टं प्रयियासुराशु ।
शुभाशुभान् स्थानभरान् विजानन्, विलङ्घते स्वीयपदासिनोदात्॥१४॥

तथा च चौराः परदारगा अपि, व्यापारिणो दर्शनिनो द्विजास्तथा ।
विदन्त एते हि तथाविधायतेः, शुभाशुभं कर्म समाचरन्ति ॥ १५ ॥

भिक्षुस्तथा बन्दि ऋषिश्च भिक्षां, स्निग्धां च रूक्षां परिबुध्य भुङ्क्ते ।
शूरस्तथा युद्धगतोऽवगच्छन्, शत्रूनशत्रूंश्च निहन्ति रोधे ॥ १६ ॥

रोगी यथा वा निजरोगशान्ति-मिच्छन्नपथ्यं ह्यपि सेवतेऽसौ ।
रोगाभिभूतत्ववशादपायं, जानन्स्त्वयं भाविनमात्मगामिनम् ॥ १७ ॥

एवं हि कर्माण्यसुमान् विलाति शुभाशुभानि प्रविदन्नवश्यम् ।
जीवस्य कर्मग्रहणे स्वभावो, ज्ञानं विनाऽप्यस्ति निदर्शनं यत्॥ १८ ॥

यथैव लोके किल चुम्बकोऽप्ययं, संयोजकैर्योजितमञ्जसा भृशम् ।
सारं तथाऽ सारमयोऽविचारितं, गृह्णाति येनाव्यवधानमात्मनः॥ १९ ॥

कालात्मभावादिनियोजितान्यहो, स्वभावशक्तेश्च शुभाशुभानि यत् ।
कर्माणि सामीप्यसमाश्रितान्यय-मात्माऽपि गृह्णाति तथाऽविचारितम् २०॥

## ॥ तृतीयोऽधिकारः ॥

स्वामिन्ननाकारतया हि जीवो, निरिन्द्रियः केन च लाति कर्म ? ।
निरीक्ष्य पूर्वं तत आत्मलेयं, पाण्यादिना न्याददते पुमांसः ॥ २१ ॥

आत्मा तु नेदृक् घटते न चैतत्, सत्यं विनाऽपीन्द्रियतोऽप्यथात्मा ।
भाव्याश्रितं कर्म समाददीत, शक्तेः स्वभावात् च शृणु स्वरूपम्॥ २२

यथेन्द्रियाकारविवर्जितोऽयं, कर्ता श्रुणोत्येव निजाङ्गिजापम् ।
भक्तं निरीक्ष्याऽथ विलाति पूजां, पाणिं विना चोद्धरतीह भक्तान्॥ २३

पापं हरत्याशु कृतं स्वकैर्य-दनन्तशक्तेः सहजात्तथाऽऽत्मा ।
लोके यथा वा गुडको रसस्य, सिद्धो निरक्षेन्द्रियपाणिमुक्तः ॥ २४ ॥

दुग्धादिपायी त्रपुनीरशोषी, स शब्दवेधी बलशुक्रदश्च ।
सूतोऽपि चैतत्कुरुते निरक्षो, जीवस्तु शक्तो न करोति किं किम् ?२५

वनस्पतीनामपि वा यथाहृति-र्यन्नालिकेर्य्यादिषु दृश्यतेऽपि च ।
यद्वा घनं किं किल वस्तु सर्वं, सङ्गृह्य नीरं स्वयमार्द्रितं स्यात् २६

न चेति वाच्यं पयसोऽस्ति शक्ति-स्तद्भेदने यद् व्यभिचारितास्ति ।
न भेदनं मुद्गशिलासु तद्वत्, धान्येऽम्भसः किं कटुका न भेद्याः॥ २७

सिद्धं तथेदं ग्रहणीयमेव, वस्त्वत्र यस्यास्ति तदेव लाति ।
किं चुम्बको लोहमथोज्झ्य धातू-नन्यांश्च गृह्णाति तथा स्वभावात् २८

अप्येवमात्मा परपुद्गलोत्करान्, विहाय गृह्णाति हि कर्मपुद्गलान् ।
यादृक्षयादृक्षभविष्यदायतिः, तादृक्षसम्प्रेरणपारवश्यतः ॥ २९ ॥

सुप्तो यथा वा किल कश्चिदङ्गभृत्, स्वप्नान् प्रपश्यन् कुरुते समाःक्रियाः
नोइन्द्रियेणैव न तत्र किञ्चने-न्द्रिय द्बयप्राणमहो प्रवर्तते ॥ ३० ॥

जीवस्तथा कर्मभरं हि लाति, स्वप्नो भ्रमोऽयं ननु मैवमाख्यः ।
महत्तमे तस्य फले च दृष्टे, मा ब्रूहि-यत्स्वप्नमयं स्मरत्यहो ॥ ३१ ॥

यथा गृहीतं न हि कर्म स स्मरेत्, न स्मर्यते प्रायश एव दृष्टः ।
स्वप्नस्तथा कर्मभरोऽपि चात्तः, कश्चित्स्मरेत् स्वप्नमिमं यथेक्षितम्॥३२॥

कर्म स्मरेत् ज्ञानविशेषतस्तथा, प्रधानपुंसेक्षित एव यद्वत् ।
स्वप्नो यथार्थः फलतीह नूनं, तथैव कर्मात्तमिदं कृतार्थम् ॥ ३३ ॥

स्यादर्ङ्गिनः संशय एव नात्र, व्यर्थीभवत्स्वप्नभरस्य जन्तोः ।
स्वप्नो यथा केवलिनस्तथास्ति, कर्मग्रहस्तत्क्षणनाशतो यत् ॥ ३४ ॥

तथा निजात्मन्यपि पश्यतोऽत्र, सम्मील्य चेतः परिकल्प्य सुस्थम् ।
उत्पत्तिकालादवसानसीमा-मात्मा सृजेत्कार्मणतैजसाभ्याम् ॥ ३५ ॥

गर्भस्थितः शुक्ररजोन्तरागतो यथोचिताहारविधानतो द्रुतम् ।
धातूंश्च सर्वानपि सर्वथा स्वय-मात्मा विधत्तेऽत्र विनाक्षवीर्यतः॥३६॥

गर्भात्कृते जन्मनि सर्वदैव, गृह्णन् किलाहारमथोपलब्धम् ।
ततस्ततस्तत्परिणामतः स्वयं, धात्वादि संपाद्य करोति पुष्टिम्॥ ३७ ॥

तथार्हति रोमभिरादधद्यकः, खलं परित्यज्य रसान् समाश्रयेत् ।
पुनः पुनः प्रोज्झति तन्मलं बलात्, दधद्रजः सात्त्विकतामसान् गुणान्

सज्ज्ञानविज्ञानकषायकामान्, हिताहिताचारविचारविद्याः ।
रोगान् समाधींश्च दधान एव-मास्ते कथं सक्रिय एष देहे ॥ ३९ ॥

किं देहमध्येऽस्य करेन्द्रियादिकं, समस्ति येनैव करोति तादृशम् ।
विवेचनं प्राप्य च वस्तु तादृशं, प्रासावधिर्याति गृहेश्वरो यथा॥ ४० ॥

यदीदृशोऽपौद्गलिकोऽप्यमूर्तो निराकृतिः सक्रिय एष जीवः ।
देहस्य मध्ये स्थित एव सर्व-मङ्गं परिव्याप्य करोति कृत्यम्॥ ४१ ॥

द्रव्याणि रूपीणि गुरूणि तद्वत्, सूक्ष्माणि वा लाति पुरान्तरासुमान् ।
कर्माणि तत् सूक्ष्मतमानि नो कथं, गृह्णात्ययं तैजसकार्मणाङ्गतः॥ ४२ ॥

जीवः पुना रूपकरादिवर्जित, ईदृग्वपूरूपि कथं प्रवर्तयेत् ।
आहारपानादिक इन्द्रियार्थके, शुभाशुभारम्भककर्म्मणीह ॥ ४३ ॥

*चेदिन्द्रियैः पाणिमुखैरथाङ्गैः, समाः क्रियाः स्युर्भविनं विनैव ।*
तदा समस्ताः कुणपैरजन्तुकैः, क्रियाः क्रियन्ते न कथं करेन्द्रियैः॥४४॥

सिद्धं तथैतद्यदशस्त-शस्तं, कर्मात्मनैव क्रियते न चाङ्गैः ।
अरूपिणा रूपि ततश्च कर्म, सूक्ष्मं कथं नाम न गृह्यते तत् ॥ ४५ ॥

ध्यानी पुनर्बाह्यगतेन्द्रियैर्विना, करोति कर्माणि यथेप्सितानि यत् ।
जिह्वां विना ध्यायति मानसं जपं, शृणोति तं तं श्रवसी ऋते तदा॥४६॥

विना जलैः पुष्पफलैश्च दीपैः, सद्भावपूजां सफलीकरोति ।
ध्यात्वाऽथ ब्रह्मापि च ब्रह्मवादी, न ब्रह्मतामेष लभेद्विना खैः॥ ४७ ॥

जीवोऽयमेवं करणैः करादिभि-र्विनैव कर्माणि समाश्रयत्यलम् ।
अचिन्त्यशक्त्या नियतिस्वभाव-कालैश्च जात्या च कृतप्रणोदः ॥ ४८ ॥

कर्माणि जीवैकतरप्रदेशे-ऽप्यनन्तसङ्ख्यानि भवन्ति चेत्तदा ।
कथं न दृश्यानि हि तानि पिण्डी-भूतानि दृष्ट्या निगदन्तु कोविदाः॥४९॥

सत्यं कृतिन् ! सूक्ष्मतमानि तानि, पश्यन्ति नो चर्मदृशो हि मादृशाः ।
ज्ञानी तु सज्ज्ञानदृशो भृशोदया-त्पश्येद्यथात्रैव निदर्शनं शृणु ॥ ५० ॥

पात्रे च वस्त्रादिषु गन्धपुद्गलाः, सौगन्ध्यदौर्गन्ध्यवतो हि वस्तुनः ।
ज्ञेया नसा ते न हि पिण्डभावं, गता अपीक्ष्या नयनादिभिस्तु ॥ ५१ ॥

ज्ञानेन जानात्ययमेवमेतं, कर्मोच्चयं जीवगतं तु केवली ।
त(य)था पुनः सिद्धरसान्निपीतं, स्वर्णादि नो तत्र दृशाभिदृश्यते ॥ ५२ ॥

यदा तु कश्चिद्रससिद्धयोगी, कर्षेद्यदैतन्ननु तस्य सत्ता ।
एवं हि कर्माण्यपि जीवगानि, ज्ञानी विजानाति न चापरोऽत्र ॥ ५३ ॥

## ॥ चतुर्थोऽधिकारः ॥

कर्माणि मूर्त्तान्यसुमानमूर्त्तः, साकृत्यनाकृत्यभियुक्तिरेषा ।
न्याय्या कथं येन हि वस्तु भिन्नं, नाधारकाधेयकतां लभेत ॥ ५४ ॥

आकर्ण्यतामुत्तरमस्य विज्ञाः !, कर्मस्वभावादथ जीवशक्तेः ।
गुणाश्रयो द्रव्यमिति प्रवादात्, संसारिजीवस्य गुणस्तु कर्म ॥ ५५ ॥

यद्वा हि ये केचन विश्वमेतत्, सकर्तृकं प्राहुरहो ! समस्तम् ।
कल्पान्तकाले महति प्रवृत्ते, भाव्येव लीनं खलु विष्णुनाम्नि॥ ५६ ॥

तदा यथा भूतगणा गुणाश्च, स्थास्यन्ति लीना ननु कर्तृनाम्नि ।
यद्वा नभोऽमूर्त्तमिदं गुरोर्लघो-र्मूर्त्तस्य चामूर्त्तिमतो निरन्तरम्॥ ५७ ॥

अर्थस्य सर्वस्य यथा विचक्षणा, आधारमाख्यन्नविनश्वरं महत् ।
कथं तथात्मैष न रूपवानपि, रूपीणि सर्वाणि वहत्यनारतम्॥ ५८ ॥

मिथ्यात्वदृष्टिभ्रमकर्ममत्सराः, कषायकन्दर्पकला गुणास्त्रयः ।
क्रियाः समग्रा विषया अनेकधा, किं किं न धत्तेऽत्र वपुर्गतोऽप्ययम् ५९

मा वोच एतद्धि शरीरजा गुणा, अमी यतोऽस्मिन् गतपञ्चके घने ।
दृश्यन्त एते न हि केचनाश्रिता-स्ततो वपुर्गा न गुणास्तु जीवगाः॥ ६०

संदृश्यमानं पुनरीदृशं वपु-रदृश्य एवैष भवी दधाति चेत् ।
अरूपिरूपिद्वयसङ्गमो ह्यसौ, विचार्यमाणः कुरुते न कौतुकम्॥ ६१ ॥

कर्पूरहिङ्ग्वादिकसुष्टुदुष्टु-वस्तूत्थगन्धा गगनं श्रिता यथा ।
तिष्ठन्ति यावत्स्थिति तद्वदेव भोः, कर्माणि जीवं परिवृत्य सन्ति ६२

इत्यादिभिर्दृष्टनिदर्शनैस्तथा-गुणात्मकैः कर्मभिरेष आत्मकः ।
आश्रीयते निर्गुणकोऽपि निश्चित-मात्मा ततः कर्मचितो भवी भवेत् ६३

चेदाश्रयाश्रेयकभाव एवं, सिद्धोऽस्ति कर्मात्मकयोरवश्यम् ।
जीवास्तु सिद्धा अपि सन्त्यनन्त-चतुष्टयेद्धाः परमेष्ठिसंज्ञा(:)॥ ६४ ॥

पृच्छामि पूज्याः ! खलु तर्हि सिद्धा-त्मानो न कर्माणि समाददन्ते ।
कथं तदेषामपि सौख्यसत्त्वा-ल्लातां सुकर्माणि निषेधकः कः ?॥ ६५

सत्यं यतस्तैजसकार्मणाख्य-शरीरयोगस्य विनाशभावः ।
सुकर्मणां तेन गृहीत्ययोगा-ज्ज्योतिश्चिदानन्दभरैश्च तृप्त्याः ॥ ६६ ॥

सुखासुखप्रापणहेतुकाल-प्रयोक्त्रभावादथ निष्क्रियत्वात् ।
यद्वाप्यनन्तानि सुखानि तेषां, कर्माणि सान्तानि भवन्त्यमूनि ॥ ६७ ॥

इतीव तत्सौख्यभरस्य कर्म, हेतुर्भवेन्नो यदतुल्यमानात् ।
इत्यादिकैर्हेतुभिरेव सिद्धा-त्मानो न कर्माणि हि लान्ति नित्याः॥ ६८

लोके यथा क्षुत्तृषया विमुक्ता-त्मानः सुतृप्तस्य न तृप्तिकालम् ।
जितेन्द्रियस्याप्यथ योगिनोऽपि, तुष्टस्य किञ्चिद् ग्रहणे न वाञ्छा॥ ६९

यद्वा न पात्रे परिमाति किञ्चित्, पूर्णे तथा सिद्धिगता हि सिद्धाः ।
सदा चिदानन्दसुधाप्रपूर्णा, गृह्णन्ति नो किञ्चिदपीह कर्म ॥ ७० ॥

तथा च सिद्धेषु सुखं यदस्ति, तद् वेद्यकर्मक्षयजं वदन्ति ।
तत्कर्म हेतुर्न हि सिद्धसौख्ये, यत्कर्म सान्तं सुखमेष्वनन्तम् ॥ ७१ ॥

यद्विश्ववृत्तान्तसमुत्थनृत्त-प्रेक्षाप्रभूतं सुखमाश्रितानाम् ।
सिद्धात्मनां नित्यसुखं प्रवर्त्तते, यथा नृणामद्भुतनृत्यदर्शिनाम्॥ ७२ ॥

सिद्धेषु पूज्या ! न किल क्रियेन्द्रियं, बुद्धीन्द्रियं नो न च किञ्चनाङ्गम् ।
अनन्तसौख्यं कथमाप्यते तै-र्यज्ज्ञानमेतेषु तदेव सौख्यम् ॥ ७३ ॥

यथेह लोके किल कश्चिदङ्गी, ज्वरादिबाधाविधुरः कदाचित् ।
निद्रां प्रकुर्वन्निति तज्जनैस्तु, सुखं करोत्येष न बोधनीयः ॥ ७४ ॥

इत्युच्यते तस्य न तत्र किञ्चि-च्छ्रोतःसुखं नापि क्रिया निरीक्ष्यते ।
तथापि सुप्तस्य नरस्य सौख्यं, वाच्यं यथा स्याद् भुवि तद्वदेव॥ ७५ ॥

जाग्रस्तु सिद्धेषु सदैव सौख्यं, विनेन्द्रियद्वैतसमुत्थभोगम् ।
यद्वा हि योगी निजकात्मबोधा-मृतं पिबन्नस्मि सुखीति मन्ता॥ ७६ ॥

तथा च कोऽपीह मुनिर्यथोक्तः, सन्तुष्टिपुष्टो विजितेन्द्रियार्थः ।
अन्येन पुंसा परिपृच्छ्यते चेत्, त्वं कीदृशोऽसीति सुखी स जल्पेत् ७७

तस्मिन् क्षणे तस्य न कोऽपि वस्तुनः स्पर्शः सतो नैव च भुक्तियुक्तिः।
गन्धग्रहो नो न च दृक्छ्रुती तदा, न पाणिपादादिभवा क्रियापि च ७८

तथापि सन्तोषवताहमस्मि, सुखीति भूयः प्रतिगद्यतेऽतः ।
तज्ज्ञानसौख्यं हि स एव वेत्ति, न ज्ञानहीनो गदितुं समर्थः ॥ ७९ ॥

इत्थं हि सिद्धेषु विनेन्द्रियार्थै-स्तथा क्रियाभिः सुखमस्त्यनन्तम् ।
त एव तत्सौख्यभरं विदन्त्यपि, ज्ञानी न शक्तो वदितुं यतोऽसमम् ८०

## ॥ षष्ठोऽधिकारः ॥

जीवस्य कर्मग्रहणे स्वभाव-स्तदा स मौलं सहजं विहाय ।
कर्मग्रहाख्यं कथमेष सिद्धो, भवेद्विचारः परिपठ्यतां भोः ॥ ८१ ॥

कर्मात्मनोर्यद्यपि मौलसङ्ग-स्तथापि सामग्र्यतथोपलम्भात् ।
कर्मग्रहं प्रोज्झ्य शिवं समेतः, सिद्धो भवेदत्र निदर्शनं यत् ॥ ८२ ॥

सूते यथा चञ्चलतास्वभावो, मौलस्तथाग्न्यस्थिरभावसंज्ञः ।
यदा तु तादृक्परिकर्मणा कृत-स्तदा स्थिरो वह्निगतश्च तिष्ठेत् ॥ ८३ ॥

यथा पुनर्दाहकतागुणोऽग्ना-वस्ति स्वभावो ननु मूलजातः ।
अस्यापि नाशोऽस्ति तथाप्रयोगात्, सन्तं सतीं नैव दहेत्कदापि॥ ८४ ॥

बद्धो यथाप्येष च मन्त्रयोगात्, तथौषधीभिर्न दहेद्विशन्तम् ।
अश्नन्तमग्निं च चकोरकं तथा, वह्निर्दहेन्नो विगतस्वभावः ॥ ८५ ॥

तथाभ्रकं हेम च रत्नकम्बलं, सिद्धं च सूतं न दहेद्धुताशनः ।
तदा तु या दाहकता विभावसौ, मौली व्रजेत्क्वाथ निगद्यतामिति॥ ८६

यश्चुम्बकग्रावणि लोहग्राही, स्वभाव आस्ते सहजः सकोऽस्ति ।
तस्मिन्मृते वेतरयोगयुक्ते,-ऽपैतीत्थमेतेष्वपि कर्मयोगः ॥ ८७ ॥

बीजं तथाङ्कुरभवं दधाति, मौलात्स्वभावादविकारि यावत् ।
तस्मिंस्तु दग्धे न किलाङ्कुरोद्भव-एवं तु सिद्धेषु न कर्मबन्धः:८८

वायोस्तथा चञ्चलतास्वभावो, यो वर्तमानः सहजः समस्ति ।
खलस्य मध्ये पवने निरुद्धे, कथं प्रयात्येष चलस्वभावः ? ॥ ८९ ॥

आहारमुख्याः सहजाश्चतस्रः, संज्ञा इमाः प्रोज्झ्य शुकादयोऽमी ।
सिद्धाः प्रसिद्धाः, परब्रह्मरूपाः जातास्ततोऽपैति निजस्वभावः॥ ९० ॥

इत्यादिदृष्टान्तभरैः स्वभावो, मौलो यथा याति तथैव जन्तोः ।
कर्मग्रहोऽयं सहजः प्रयाति, सिद्धत्वमाप्तस्य किमत्र चित्रम् ?॥ ९१ ॥

## ॥ सप्तमोऽधिकारः ॥

प्रश्नस्तथैकः परिपृच्छ्यतेऽसकौ, सिद्धान्समाश्रित्य निजोपलब्धये ।
सर्वज्ञवाक्यात् किल मुक्तिमार्गको, वहन् सदास्ते करकस्य नालवत् ९२

नो पूर्यते मुक्तिरसौ कदापि, संसार एषोऽपि च भव्यशून्यः ।
परस्परद्वेषिवचोविलासै-र्न सङ्गतिं मङ्गति वाक्यमेतत् ॥ ९३ ॥

न हि व्यलीकं भगवद्वचोऽस्त्यदः, परं न चित्तेऽल्पधियामभिव्रजेत् ।
दृश्योऽस्ति दृष्टान्त इहैव लौकिको, यं शृण्वतां श्रोतृनृणां मनः स्थिरम् ९४

सिद्धालयः स्याल्लवणोदसोदरः संसार एषोऽस्ति नदीह्रदोदरः ।
नदीप्रवाहाश्च यथा महोदधौ, पतन्ति निर्गत्य नदीह्रदान्तरात् ॥ ९५ ॥

नदीह्रदा नैव भवन्ति रिक्ता, न चाम्बुधिः कर्हिचिदस्ति पूर्णः ।
नदीप्रवाहोऽपि निरन्तरं य-द्वहत्यविच्छिन्नतयाऽतिशीघ्रम् ॥ ९६ ॥

इत्थं हि भव्याः परियन्ति मुक्तौ, नदीप्रवाहा इव सागरान्तः ।
संसार एष ह्रदवन्न रिक्तः, पयोधिवन्नैव भृतापि मुक्तिः ॥ ९७ ॥

दृष्टान्तदार्ष्टान्तिकयोरितीदं, साम्यं समालोचयतां नराणाम् ।
भवेत्प्रतीतिः परमार्हताना-मर्हद्वचस्येव न चापरत्र ॥ ९८ ॥

अन्योऽपि दृष्टान्त इहोच्यतेऽय-माकर्णनीयो विदितप्रमाणैः ।
यथा हि कश्चित्प्रतिभान्वितः स-न्नाजन्ममृत्यूद्भवमात्मशक्त्या॥ ९९ ॥

हिन्दूकषड्दर्शनपारशीक-शास्त्राणि सर्वाणि पठंस्त्रिलोक्याः ।
असङ्ख्यमायुर्निवहन्नपीह, ह्रदस्य पूर्णं न भवेत्कदाचित् ॥ १०० ॥

शास्त्राक्षरैरप्यथ योजनैवं, यथैव शास्त्राणि भवस्तथाऽयम् ।
भवन्ति शास्त्राक्षरवद्विमुक्ताः, सुबुद्धिवक्षोवदियं हि सिद्धिः॥ १०१ ॥

अश्रान्ततत्पाठवदेव मुक्ति-मार्गो वहन्नस्ति निरन्तरायः ।
शास्त्रेष्वधीतेषु न शास्त्रनाश-स्तथैव सिद्धेषु भवस्य नान्तः॥ १०२ ॥

दृष्टान्तदार्ष्टान्तिकभावनेयं, विज्ञैः स्वयं चेतसि चिन्तनीया ।
एवं ह्यनेकेऽभिनिषन्ति भूयो, दृष्टान्तसङ्घा अपरेऽपि योज्याः॥ १०३

## ॥ अष्टमोऽधिकारः ॥

स्वामिन् ! परब्रह्म किमुच्यते तत्, लीनं जगद्यत्र भवेद्युगान्ते ।
तदेव हेतुः पुनरेव सृष्टेः, स्यादीदृशं केन गुणेन वाच्यम् ? ॥ १०४ ॥

निशम्यतामार्य ! मनीषिणामपि, सिद्धान्तवेदान्तविचारवेदिनाम् ।
स्वरूपमेतस्य निवेदितुं यतो, वाचः स्फुरन्तीह न चर्मचक्षुषाम्॥ १०५

ये योगिनो निर्मलदिव्यदृष्टय-श्चराचराचारविवेकचिन्तकाः ।
लब्धाष्टसिद्धिप्रथना हि तेऽप्यहो !, विचारयन्तो न हि पारमिय्रति१०६

तथापि ये लोकविलोकनक्षमाः, सर्वार्थयाथार्थ्यसमर्थनार्थनाः ।
सत्केवलज्ञानविशिष्टदृष्टयो, नीरागिणोऽन्योपकृतौ परायणाः॥ १०७ ॥

ते त्वीदृशं ब्रह्म परं न्यवेदयन्, निर्विक्रियं निष्क्रियमप्रतिक्रियम् ।
ज्योतिर्मयं चिन्मयमीश्वराभिध-मानन्दसान्द्रं जगतां निषेवितम्॥ १०८ ॥

निर्मायऽनिर्मोहमहंकृतिच्युतं, सम्यग्निराशंसमनीहितार्चनम् ।
महोदयं निर्गुणमप्रमेयकं, पुनर्भवप्रोज्झितमक्षरं यतः ॥ १०९ ॥

विभु प्रभावत्परमेष्ठ्यनन्तकं, निर्मत्सरं रोधविरोधवर्जितम् ।
ध्यानप्रभावोत्थितभक्तनिर्वृति, निरञ्जनानाकृति शाश्वतस्थिति॥ ११० ॥

एवंविधं ब्रह्म तदेव तत्कथं, हेतुर्भवेत्सृष्टिकुलालकर्मणि ।
प्रयोजको ब्रह्मण एव नास्ति य-त्स्वस्मिन्गतत्वात्सकलस्य वस्तुनः१११

कुर्याद्यदीदं जगतां हि सर्जनं, तदेदृशं केन करोति विष्टपम् ।
जन्मात्ययव्याधिकषायकैतव-कन्दर्पदौर्गत्यभियाभिराकुलम्॥ ११२ ॥

परस्परद्रोहिविपक्षलक्षितं, दुःश्वापदव्यालसरीसृपालिकम् ।
साखेटिकैमैंनिकसौनिकैश्चितं, दुश्चोरजारादिविकारपीडितम्॥ ११३ ॥

कस्तूरिकाचामरदन्तचर्मणे, सारङ्गधेनुद्विपचित्रकान्तकम् ।
दुर्मारिदुर्भिक्षकविड्वरादिकं, दुर्जातिदुर्योनिकुकीटपूरितम् ॥ ११४ ॥

अमेध्यदौर्गन्ध्यकलेवराङ्कितं, दुष्कर्मनिर्मापणमैथुनाञ्चितम् ।
समाश्रयद्धातुकृताङ्गिपुद्गलं, सनास्तिकं सर्वमुनीशनिन्दितम्॥ ११५ ॥

कियत्स्वकीयाह्वयबद्धवैरं, कियत्स्वपूजाप्रवणाङ्गिजातम् ।
नानात्महिन्दूकतुरुष्कलोकं, कियत्परब्रह्मनिरासहासम् ॥ ११६ ॥

षड्दर्शनाचारविचारडम्बरं, प्रचण्डपाषण्डघटाविडम्बनम् ।
सत्पुण्यपापोत्थितकर्म भोगदं, स्वर्गापवर्गादिभवान्तरोदयम्॥ ११७ ॥

वितर्कसम्पर्ककुतर्ककर्कशं, नानाप्रकाराकृतिदेवतार्चनम् ।
वर्णाश्रमाचीर्णपृथक्पृथग्वृषं, सद्रव्यनिर्द्रव्यनरादिभेदभृत् ॥ ११८ ॥

अनेन किं पल्लवितेन येन, यद् दृश्यते तद् विपरीतमेव।
कार्ये पुनः कारणजा गुणाः स्यु-र्विद्वांस एवं निगदन्ति तज्ज्ञाः॥ ११९

यदत्र दृश्यं किल वस्त्वनित्यं, तद् ब्रह्मणो जातमिदं हि सृष्टौ।
तद्योगिनः केन विहाय शीघ्रं, जुगुप्स्यमेतद् वृणते विरागम्॥ १२० ॥

यद् द्वेषरागादिविरूपमुज्झ्यं, जगत्स्वरूपं वरयोगवद्भिः।
तदेव सर्वं खलु ब्रह्मणैव, स्वस्मिन्कथं धार्यमहो युगान्ते ?॥ १२१ ॥

तदा विवेकोऽस्ति न ब्रह्मरूपे-ऽसौ वा शुकाद्येषु न योगवत्सु।
कार्यं च धार्यं च यदादिपुंसो, निन्द्यं च हेयं च तदन्यपुंसाम्॥ १२२ ॥

तद्ब्रह्मजा सृष्टिरथापि कल्प-स्तज्जो वदद्भिस्त्विति ब्रह्म मूढम्।
विज्ञाप्यते किं न च तैस्तथैषां, वान्ताहृतेर्ब्रह्मणि किं न दोषः ?॥ १२३

लोके तथैकादिकब्राह्मणादि-घातेऽत्र हत्या महती निगद्या।
तन्निघ्नतो ब्रह्मण एव सृष्टिं, सा कीदृशी स्याददया दयालोः ?॥ १२४

तज्जातसृष्टिं न हि तस्य हिंसा, निर्हिंसतश्चेद् भवतीति चोद्यते।
सम्पाद्य सम्पाद्य सुतान्स्वकीया-न्पितुर्घ्नतस्तर्हि न कोऽपि दोषः १२५

लीलेयमस्यास्ति यदीति चेद्गी-र्निर्हिंसतस्तस्य न चास्ति पापम्।
एवं हि राज्ञो मृगयां गतस्य, जीवान्घ्नतः पातकमेव न स्यात्॥ १२६ ॥

अथ स्वभावादथ कालतो वा, सृष्टिं घ्नतो नास्ति विभोरघाप्तिः।
स्वभावकालौ यदि चेद् बलिष्ठौ, ब्रह्माप्यशस्ते नुदतः क्षयेऽस्मिन् १२७

एतौ तदेवात्र च हेतुभूतौ, किं ब्रह्मणा युक्त्यसहेन कार्यम्।
तद्ब्रह्मणः सृष्टिविधिं तथैव, संहारकत्वं च वदन्ति ये तैः ॥ १२८ ॥

न ब्रह्ममहिमा प्रकटीकृतः किं, निर्दूषणे दूषणमादधे यत्।
वन्ध्या ममाम्बेति समं निगद्यते, यन्निष्क्रियं ब्रह्म निगद्य कर्त्रिति १२९

ये केऽपि विज्ञानभृतो भवन्ति, सर्वे च ते ब्रह्म विचिन्तयन्ति।
ब्रह्मांशकास्ते यदि कोऽस्ति भेदः, कस्मै विचारः क्रियते तदेभिः १३०

अंशास्तदीया यदि जन्तवोऽमी, स्वयं स्वपार्श्वं हि तदेव नेतृ ।
विनैव कष्टं यदि तस्य लब्ध्यै, नीरागता निःस्पृहता निकामम्॥ १३१ ।

निर्द्वेषता निष्क्रियता च तद्व-ज्जितेन्द्रियत्वं च समानभावः ।
इत्यादि कार्यं यदि तस्य प्रीति-रेष्वेव सिद्धं तदिहाक्रियत्वम्॥ १३२

चेद् वक्ष्यसि ब्रह्मगतः स्वभावो-ऽयमीदृशः सक्रियनिष्क्रियादिः ।
कर्तुस्त्वनेकैश्च तदा स्वभावै-रनित्यतापीह भवेत्कदाचित् ॥ १३३ ॥

द्वेषोऽपि रागोऽपि दृशापि वीक्षा, नित्यं तदेवास्ति यदेकरूपम् ।
आकाशवद् व्याप्तिरियं हि यत्र, वाक्येन पञ्चावयवेन क्लृप्ता॥ १३४ ॥

कर्त्तुः स्फुटा सक्रियता मनःस्था, सृष्टौ युगान्ते च तदन्यभावे ।
स्यान्निष्क्रियत्वं च तथैव राग-द्वेषौ जनानां सुखदुःखदृष्ट्या॥ १३५ ॥

यादृक्क्रिया तादृशसौख्यदुःखे, चेदेवमूहो भवतामपि स्यात् ।
कर्त्तुर्बलं किं किल तर्हि सिद्धे, स्वपापपुण्ये सुखदुःखहेतू॥ १३६ ॥

हे ब्रह्मवादिन् ! यदि जन्तवोऽमी, ब्रह्मांशकास्तर्हि समे समाः स्युः ।
तदंशसाम्याद् बहुभेदभिन्ना-श्चेत्तर्हि कश्चिन्ननु तत्करोऽन्यः ॥ १३७ ॥

चेद् ब्रह्मभिन्ना भुवि जन्तवोऽमी, सुखस्य दुःखस्य च कर्तृ ब्रह्म ।
हेतोर्यतो दुःखसुखे विधत्ते, ब्रह्मा स एवाऽस्तु तयोर्विधाता॥ १३८ ॥

निरञ्जनं नित्यममूर्तमक्रियं, सङ्गीर्य्य ब्रह्माऽथ पुनश्च कारकम् ।
संहारकं रागरुडादिपात्रकं, परस्परध्वंसि वचोऽस्त्यदस्ततः ॥ १३९ ॥

अतो विभिन्नं जगदेतदेतद्-ब्रह्मापि भिन्नं मुनिभिर्व्यचारि ।
अतस्तु संसारगता मुनीन्द्राः, कुर्वन्ति मुक्त्यै परब्रह्मचिन्ताम्॥ १४० ॥

ये केऽपि मायामिह विष्णुमाश्रितां, जगद्विधौ हेतुमुदीरयन्त्यथ ।
प्रष्टव्यमेषामिति किं हि मायां, विष्णुः श्रितो विष्णुमथापि माया॥ १४१

माया जडा संश्रयितुं स्वयं नो, शक्ता तु विष्णुः परब्रह्मतुल्यः ।
जानन्स्वयं नाश्रयते हि मायां, यत्पारतन्त्र्यादजडो जडं श्रयेत्॥ १४१ ॥

अथैष विष्णुर्युगपन्नुदेत्तां, पृथक्पृथग्वा प्रतिजीवमीर्त्ते ।
आद्ये यदीमां तु नुदेत्त्रिलोकी, तदैकरूपास्तु न भिन्नरूपा ॥ १४२ ॥

तदैकरूप्याद्यदि तां पृथक्पृथग्, जीवान्प्रतीर्त्ते नु भवेत्तदानीम् ।
आनन्त्यमस्या इयमप्यनेक-रूपा च जीवा अपि भिन्नरूपाः॥ १४३ ॥

नामैवमस्त्वत्र तथापि माया, जडा सती किं चरितुं क्षमा स्यात् ।
कर्त्तुश्च शक्तेरथ सा समर्था, तदैव कर्त्तासुखदुःखदोऽस्तु ॥ १४४ ॥

किं कर्त्तुरेतैरपराद्धमस्ति, चेदीदृशं तां प्रति जीवमीर्त्ते ।
निरागसां प्राणभृतां य ईदृग्-दुःखादि कर्त्ता स कथं हि कर्त्ता ?१४५ ॥

ध्यायन्ति ये नेशमिमेऽस्य सागसा-स्तेषामसौ दुःखकरः प्रथेत्यहो ।
ये त्वीशमेनं प्रति सेवमाना,-स्तेषामयं साततिं विधत्ते ॥ १४६ ॥

द्वेषी च रागी भवतां स कर्त्ता, य ईदृशीमाचरति प्रतिक्रियाम् ।
नामैवमस्त्वस्तु परं य एनं, निन्देन्न वन्देन्न गतिस्तु कास्य ॥ १४७ ॥

लोके त्रिधा स्याद् गतिरेकवस्तुनो यत्सेवकासेवकमध्यमात्मिकाः ।
आद्योर्द्वयोश्चेद्गतिरस्ति तर्हि, मध्यस्थजन्तोरपि साऽस्तु काचित्॥ १४८

अस्यापि काचिन्नियता गतिःस्या-दस्यागतेस्तर्हि च कोऽस्ति कर्त्ता ? ।
तर्हीति वाच्यं सुखदुःखमुख्यं, यथा कृतं कर्म तथैव लभ्यम्॥ १४९ ॥

इत्थं च ये केचन सङ्गिरन्ते, कर्त्ता स्वतो जीवगणान्प्रसृज्य ! ।
संसारिभावं प्रणिदाय तेषां, महालये संहरते पुनस्तान् ॥ १५० ॥

वाच्या अमी किं जगदीश्वरोऽयं, जीवान्सतः किं प्रकटीकरोति ।
किं वा नवानेव करोति कर्त्ता, चेदादिपक्षः शृणु तर्हि वार्त्ताम्॥ १५१ ॥

इष्टे पदे चेत्परिरक्ष्य जीवान्, यः कार्यकाले प्रकटीकरोति ।
सोऽस्मादृशः कर्मणि वस्तुरक्षी, प्रस्तावनोप्राप्तिभयाद्बिभीतः॥ १५२ ॥

अशक्तिरप्यस्य निवेदिता य-न्नो भिन्नभिन्नार्थकमेलवीर्यः ।
कर्त्तुस्त्वचिन्त्या किल शक्तिरस्ति, तत्किं स लोभीति निगद्यतेऽहो ॥१५३॥

कृत्वा नवानेव यदैव जन्तून्, संसारिभावं प्रतिलाभयेच्चेत् ।
मौलान् कथं मोचयितुं क्षमो न, येन स्वक्लृप्तानिति किं विडम्बयेत् ?
कृतानपीत्थं यदि संहरेत् पुनः, कोऽयं विवेको जगदीशितुः सतः ।
बालोऽपि यो वस्तु निजं प्रक्लृप्तं, धर्तुं क्षमस्तावदयं दधाति॥ १५५ ॥
लीलेति चेत्तर्हि जनोऽपि लीलां, कुर्वन्न निन्द्यो भवति प्रवीणैः ।
तपोयमध्यानमुखैः स लभ्य-श्चेत्तानि रुच्यै यदि सन्ति तस्मै॥ १५६ ॥
एतानि यस्मै रुचये भवन्ति, स नेदृशीं जातु करोति लीलाम् ।
लोकेऽपि जीवादिकघातनोत्था, लीला निषिद्धास्ति समैव तेन ॥ १५७
अन्यान्निषेधन्पुनरात्मना सृजं-स्तदासकोऽतीव विनिन्दितः स्यात् ।
एवं त्वनालोचनकर्मकारं, वयं न कर्त्तारमिमं वदामः ॥ १५८ ॥
यत्त्वद्वचोन्यासभरैः स कर्त्ता, पूतः स्वयं स्वीयजनान्पुनानः ।
ज्योतिर्मयाद्योत्थगुणैर्विशिष्टः, सोऽपि स्वकांशान्स्वरसाद्विमोहे॥ १५९ ॥
संसारभावे विरचय्य सद्यो, जीवत्वमेवं बहुदुःखपात्रम् ।
नुदत्ययं चेन्नहि तर्हि कर्त्तु-रंशा इमे प्राणभृतोऽपरे यत् ॥ १६० ॥
कर्त्ता कथं सङ्कटपेटकोदरे, दौर्गत्यदौस्थ्यादिमये भवेऽस्मिन् ।
जानन्निजांशान्सहसैव नुद्यात्, स्वकस्वरूपाद्विनिपात्य रम्यात्॥ १६१ ॥
एषा तु लीलाऽस्ति यदीश्वरस्य, संसार एवैष ततस्तदिष्टः ।
तदा तु संसारिजनैस्तदाप्त्यै, कष्टादि केनाथ विधेयमुग्रम् ॥ १६२ ॥
पूर्वापरानाश्रितवाक्यमेतत्, प्रजल्पतां काऽपि न वाक्प्रतीतिः ।
ये सर्वसद्रूपगुणानदोषान्, कर्त्तुर्वरांशानिति पातयन्ति ॥ १६३ ॥
किं तर्हि वाच्यं शृणु किञ्चिदस्ति, ज्योतिर्मयं चिन्मयमेकरूपम् ।
द्रष्टृ प्रजानां सुखदुःखहेतुं, योगीश्वरध्येयतमस्वभावम् ॥ १६४ ॥
दौर्गत्यदुःखे सुगतिं सुखं च, प्राप्नोति तादृक् कृतकर्मयोगात् ।
जीवो यदा त्वेष समानभावं, श्रयेत्तदा गच्छति ब्रह्मभूयम् ॥ १६५ ॥

तुष्टिर्जनानां परमेश्वरस्य, चेत्सृष्टिसंहारकथाप्रवृत्त्या ।
स्फूर्त्तिप्रभावप्रतिपादनार्थं, तदेति वाच्या स्तुतिरीश्वरस्य ॥ १६६ ॥

आस्तामयं श्रीपरमेष्ठिनामा, तद्ध्यानवानेष जनोऽभिनिष्यात् ।
कर्त्ता सुखस्यात्मनि संविधानात्, संहारकश्चात्मतमोपहारात् ॥ १६७ ॥

यथैव लोके किल कोऽपि शूरः, स्वाम्यात्तशस्त्रैरपि सर्वशत्रून् ।
सञ्जित्य तत्संहृतिकृन्निजाङ्गे, सुखस्य कृत्यापि भवेत्स कर्त्ता ॥ १६८ ॥

यथाऽत्र शस्त्रादिकवस्तुनेतुः, स्थाने स्थितस्यापि न हि प्रयासः ।
तथेश्वरस्यापि भवेन्न काचित्, क्रिया यतो निष्क्रियतापि सिद्धा ॥ १६९ ॥

शूरोऽपि चैवं सति शस्त्रभर्तु-र्महोपकारं किल मन्यतेऽसौ ।
अधीशभक्तोऽपि तदीयनाम-ध्यानोत्थसौख्यस्तकमेव वक्ति ॥ १७० ॥

एवं ह्यनेके खलु सन्ति सन्तो, दृष्टान्तसङ्घाः, सुधिया समुह्याः ।
तथा सतीशो महिमापि विश्रुतो, भक्तुश्च सर्गप्रतिसर्गकर्तृता ॥ १७१ ॥

## नवमोऽधिकारः

किं ब्रह्म सिद्धापरनामकीर्त्तितं, ध्येयं मुनीनामपि शुद्धचेतसाम् ।
भवार्णवे यानवदेव योगिनो, जानन्ति यन्मुक्तिगृहं यियासवः ॥ १७२ ॥

स्वामिन् ! यदीयं न हि सृष्टिरुत्थिता, सकाशतो ब्रह्मण इत्यवाचि चेत् ।
इयं कुतः स्यादपयाति वा कुतो, निगद्यतामद्य रहस्यमेतकद् ॥ १७३ ॥

त्रिकालविज्ञा इति योगिनो ये, निरागिणस्तेऽभिदधुर्विशिष्टाः ।
कालात्स्वभावान्नियतेश्च वीर्यतः, सृष्टिक्षयौ स्तः समवायपञ्चकात् १७४

मुनीश्वराः ! ब्रह्मणि ब्रह्म लीयते, ज्योतिस्तथा ज्योतिषि संविशेदिति ।
कथं प्रवादो घटते महात्मना-मयं विना ब्रह्म पुराणवेदिनाम् ॥ १७५ ॥

निशम्यतां ज्ञानमिदं वदन्ति, ब्रह्मेति वा ज्योतिरथेति विज्ञाः ।
तदेकसिद्धस्य हि ब्रह्म यावत्, क्षेत्रं श्रयेत्सर्वदिशास्वनन्तम् ॥ १७६ ॥

तावद् द्वितीयस्य तृतीयकस्य, सिद्धस्य ब्रह्माश्रयते तदेव ।
एवं ह्यनन्तामितसिद्धनाम्नां, ब्रह्माश्रयेत् क्षेत्रमहो तदाश्रितम्॥ १७७ ॥

तेनेति गीर्ब्रह्मणि ब्रह्म लीयते, ज्योतिस्तथा ज्योतिषि सम्मिलत्यथ ।
अयं प्रवादो मुनिभिः पुरातनैः समाश्रितो ब्रह्मयथार्थवेदिभिः॥ १७८ ॥

एवं सति प्राज्ञवराः ! कथं न तत्, क्षेत्रस्य साङ्कर्यमथो भवेत्तथा ।
परस्परालिङ्गितब्रह्मणोऽप्यहो !, संकीर्णता केन भवेन्न तत्र ॥ १७९ ॥

यथैव कस्याऽपि मनीषिणो हृदि, प्रभूतशास्त्राक्षरसङ्ग्रहे सति ।
साङ्कर्यमस्योरसि नैव जायते, न चाक्षराणां परिपिण्डता भवेत्॥ १८० ॥

एवं चिदाश्लिष्टदिवः समन्ततो, न ब्रह्मभिर्ब्रह्मपरम्पराश्रितैः ।
सङ्कीर्णताऽथो नभसा न ब्रह्मणा-मिह प्रवीणा इति संविदा जगुः१८१

इत्थं हि सिद्धैः परिपूरितं शिव-क्षेत्रं न सङ्कीर्णमहो ! भवेत्कदा ।
सिद्धास्तथा सिद्धपरम्पराश्रिताः, साङ्कर्यबाधारहिता जयन्ति भोः१८२

## दशमोऽधिकारः

प्रश्नः पुनः पृच्छ्यत एष पूज्याः !, निगोदजीवानधिकृत्य तद्वत् ।
निगोदजीवाश्च निगोद एव, तिष्ठन्ति केनाऽशुभकर्मणा ते ॥ १८३ ॥

यत्ते हि जन्मात्ययमाचरन्तः, कर्माणि कर्तुं न लभन्ति वेलाम् ।
तत्कर्मणा केन परेतदुःखा-नन्तव्यथां तेऽनुभवन्ति दीनाः ॥ १८४ ॥

ये तेषु केचिद् व्यवहारराशि-मायान्ति ते स्युः क्रमतो विशिष्टाः ।
राशेः पुनर्ये व्यवहारनाम्नो, निर्गत्य जीवा अभियान्ति तेऽपि ॥ १८५ ॥

निगोदजीवत्वमथो लभन्ते, कथं व्यवस्था कुत आविरस्ति ।
निशम्यतां सम्यगयं विचारो, विचारसञ्चारितचित्तवृत्ते ! ॥ १८६ ॥

निगोदजीवेषु सदैव दुःखं, यदस्ति तत्तादृशजातिभावात् ।
तथाविधक्षेत्रजनिप्रलम्भा-न्महार्त्तिदोदर्कतथाप्रणोदात् ॥ १८७ ॥

यथैव लोके लवणोदवारि, क्षारं सदा दुःसहकर्मयोगात् ।
अनन्तकालेऽपि भवेन्न पेयं, यन्नैव वर्णान्तरमाश्रयेत ॥ १८८ ॥

अनन्ततोऽनन्ततरस्त्वनेहा, बभूव वार्द्धेर्लवणोदनाम्नः ।
विनेदृशं कर्म न नाम वाच्यं, तत्कुत्र दुष्कर्म कृतं जलेन ॥ १८९ ॥

यत्रापि गङ्गादिमहानदीभवं, जलं गतं तद्गतरूपि तद्रसम् ।
निगोदकेषु व्यवहारराशितो, जीवा गतास्तेऽपि भवन्ति तत्समाः॥ १९०

तद्वारि मेघस्य मुखं समाप्य, पेयं भवेच्चाथ सुखीभवन्ति ।
एवं निगोदादपि निर्गता ये, संलभ्य जीवा व्यवहारराशिम् ॥ १९१ ॥

यद्वागमज्ञस्य नरस्य कस्यचित्, हृदन्तरोच्चाटनमन्त्रवर्णाः ।
तिष्ठन्ति तैः किं कृतमत्र दुष्कृतं, यदीदृशं नाम निगद्यते जनैः॥ १९२ ॥

तत्स्था हि वर्णा यदि केऽपि शस्त-मन्त्रस्थितास्ते गदिताः प्रशस्ताः ।
सन्मन्त्रगा येऽपि च मन्त्रवर्णा-स्ते स्युस्तथोच्चाटनदोषदुष्टाः॥ १९३ ॥

क्षेत्रं निगोदस्य यथा तथेदं, दुर्मान्त्रिकस्याशुभवर्णभृद् हृद् ।
दुर्मन्त्रवर्णाभनिगोददेहिनः, सन्मन्त्रवर्णव्यवहारिजन्मिनः ॥ १९४ ॥

दृष्टान्तदार्ष्टान्तिकतेयमात्मना, संयोजनीया समभावभाविना ।
एवं च सूक्ष्मा गुरवश्च पण्डितै-र्दृश्यास्तु दृष्टान्तगणाः स्वबुद्धितः१९५

दक्षाः ! निगोदासुभृतः समस्तं, संव्याप्य लोकं सततं स्थिताश्चेत् ।
ते केन नायान्ति दृशः पथं यके, घनीभवन्तोऽपि न बाधयन्ति १९६

सत्यं निगोदा अतिसूक्ष्मनाम-कर्मोदयात्सूक्ष्मतरा भवन्ति ।
एकां तनुं तेऽधिगता अनन्ता-स्तथाऽप्यदृश्या ननु चर्मदृग्भिः॥ १९७ ॥

यथोग्रगन्धामृतदेहिरामठा-दिकोत्थगन्धो बहुधा यथा मिथः ।
श्लिष्टोऽभितिष्ठेन्न तदन्यवस्तुनः, सङ्कीर्णता नापि नभोभुवस्तथा १९८

एवं निगोदासुमतां परस्परा-श्लेषेऽस्ति तेषामतिबाधनं सदा ।
तथाऽपि चाऽन्यस्य न वस्तुनोऽस्ति, संकीर्णता नैव विहायसश्च १९९

यथाऽत्र गन्धादिकवस्तुसत्ता, ज्ञेया नसा नैव दृशाभिदृश्या ।
एवं निगोदात्मभृतोऽपि जैन-वाक्याद्विबोध्या मनसा न वीक्ष्याः २००

ते केवलज्ञानवता हि दृश्याः, यथा हि सर्वत्र रजोऽतिसूक्ष्मम् ।
उड्डीयमानं न च दृश्यतेऽक्ष्णा, न चापि राशीभवनेऽपि बोध्यम् २०१

परं यदाछन्नशुषीनरश्मि-समुत्थवंशीत्रसरेणुरूपम् ।
प्रकाशयोगादभिवीक्ष्यते तत्, दृश्यास्तथा दिव्यदृशा निगोदाः॥ २०२ ॥

स्वामिन्निगोदाद्यसुमान् न्यदन् सन्, न गौरवं केन लभेद् गुणेन च ।
यथा हि सूतो विविधांश्च धातू-नश्नन् भजत्येष गरिष्ठतां नो॥ २०३ ॥

वस्त्रं यथा चम्पकपुष्पवासितं, यथा च कृष्णागुरुधूपधूपितम् ।
न मौलभारान्ननु याति गौरवं, दृष्टान्त एकः पुनरत्र शास्त्रगः ॥ २०४ ॥

सिद्धो यथा तोलकमानपारदः, स्विन्नः स हेम्नः शततोलकेन ।
न वर्धतेऽसौ निजतोलकाद्भरा-देवं न जीवेऽपि भरःकृताहृतौ॥ २०५

यथा पुनर्मारुतपूर्णमध्या, दृतिः स्वभारादधिकी भवेन्नो ।
तथैव जीवो विहिताशनोऽपि, स्वगौरवान्नाधिकगौरवश्रित् ॥ २०६ ॥

साधो ! निगोदाङ्गभृतोऽतिदुःखिताः, स्युः कर्मणा केन निगद्यतामिदम्
इमं विना केवलिनं न कश्चि-द्विज्ञोऽपि विज्ञातुमलं विचारम्॥ २०७ ॥

तथापि च प्रत्ययहेतवेऽदः, निगद्यते किञ्चन कर्मजातम् ।
यद्यप्यमी अत्र निगोदजीवाः, स्थूलास्त्रवान्सेवितुमक्षमा हि॥ २०८ ॥

परन्त्वमी एकतनुं श्रिता य-त्तिष्ठन्त्यनन्ताः प्रतिजन्तुविद्धाः ।
पृथक्पृथग्देहगृहप्रमुक्ताः, परस्परद्वेषकरात्मसंस्थाः ॥ २०९ ॥

अत्यन्तसङ्कीर्णनिवासलाभा-दन्योन्यसम्बद्धनिकाच्यवैराः ।
प्रत्येकमप्येष्वभिवर्त्तमान-मनन्तजीवैस्तत उग्रवैरम् ॥ २१० ॥

एकस्य जन्तोर्यदपीह वैर-मेकेन जीवेन तदप्यजेयम् ।
एकस्य जन्तोर्यदनन्तजीवै-र्वैरं भवेच्चेत्तदनन्तकालैः ॥ २११ ॥

कथं न भोग्यं पुनरेधमानं, तदेव तेनैव ततोऽप्यनन्तम् ।
एवं निगोदासुमतां न वैरं, सान्तं न दुष्कर्म च नाऽपि कालः॥ २१२ ॥

लोके यथा गुप्तिगृहाश्रिताना-मन्योन्यसंमर्दनिपीडितानाम् ।
प्रत्येकमाबद्धनिकामवैर-भाजां नराणां किल कर्मबन्धः ॥ २१३ ॥

भावस्त्वमीषामलमीदृशः स्या-द्यदेषु कश्चिन्म्रियतेऽपयाति वा ।
तदाहमासीय सुखेन भक्ष्य-मायाति किञ्चिद् घनमंशतश्च ॥ २१४ ॥

इत्यादिकं वैरमतुच्छमीदृक्, प्रवर्धमानं प्रतिबन्दि यत्स्यात् ।
तस्मादमीषामतिदुष्कृतं स्या-देवं निगोदाङ्गभृतामपीक्ष्यम् ॥ २१५ ॥

तथातिसङ्कीर्णकपञ्जरस्थिताः, विद्वेषभाजश्चटकादिपक्षिणः ।
जालादिगा वा तिमयो मिथोभव-द्विबाधनद्वेषचिताः सुदुःखिनः २१६

तथा पुनस्तस्करके निहन्य-माने च सत्यामनले विशन्त्याम् ।
कौतूहलार्थं परिपश्यतां नृणां, द्वेषं विनोत्तिष्ठति कर्मसञ्चयः॥ २१७ ॥

बुधास्तमाहुः किल सामुदायिकं, भोगो यदीयो नियतोऽप्यनेकशः ।
एवं हि चेत्कौतुकतः कृतानां, स्वकर्मणामत्र सुदुर्विपाकः ॥ २१८ ॥

अन्योऽन्यबाधोत्थविरोधजन्मना-मनन्तजीवैः कृतकर्मणां तदा ।
भोगोऽप्यनन्तेऽपगते हि काले, निगोदजीवैर्न हि जातु पूर्यते॥ २१९ ॥

पूज्याः ! निगोदासुमतां मनोऽस्ति नो, केनेदृशं तन्दुलमत्स्यवद् भृशम् ।
प्रजायते कर्म यतस्त्वनन्त-कालप्रमाणं परिपाक एवम् ॥ २२० ॥

सत्यं यदेतन्न मनोऽस्त्यमीषां, तथापि चान्योऽन्यविबाधनोत्थम् ।
दुष्कर्म तूत्पद्यत एव यद्व-द्विषं निहन्त्येव यथा तथाहृतम् ॥ २२१ ॥

सञ्ज्ञाश्चतस्रोऽप्यथवैषु मिथ्या, योगः कषायोऽविरतिश्च सन्ति ।
इमानि सर्वाण्यपि कर्मबन्ध-बीजान्यनन्तैस्त्वधिको विरोधः॥ २२२ ॥

एवं निगोदासुमतां निदर्शनैः, किञ्चित्स्वरूपं गदितं यथामति ।
यतस्त्विदं नो किल कोऽपि वक्तुं, शक्तो विना केवलिनं कुलीनाः२२३

## एकादशोऽधिकारः

स्वामिन्निदं विश्वमशेषमित्थं, पूर्णं निगोदैर्यदि तर्हि तत्र ।
कर्माण्यथो पुद्गलराशयोऽपि, धर्मास्तिकायादि कथं हि मान्ति ? २२४

सत्यं यथा गान्धिकहट्टमध्ये, कर्पूरगन्धः प्रसृतोऽस्ति तत्र ।
कस्तूरिकाजातिफलादिसर्व-वस्तूत्थगन्धो ननु माति किं न ?॥ २२५ ॥

तत्राऽस्ति मार्त्तण्डतपस्तथैव, धूपस्य धूमस्त्रसरेणवोऽपि ।
वायुश्च शब्दश्च सुमादिगन्धो, मातो यथा॰स्यादथ चाऽवकाशः॥ २२६ ॥

पुनश्च कस्याऽपि विचक्षणस्य, वक्षोन्तराशास्त्रपुराणविद्याः ।
वेदाः स्मृतिर्मन्त्रकलाश्च यन्त्र-तन्त्राणि सर्वाण्यभिधानकोषाः॥ २२७ ॥

ज्योतिर्मतिर्व्याकरणादिविद्याः, रागा रसाशीर्विषयाः कषायाः ।
वार्त्ता विनोदा वनिताविलासाः, दानादयो मत्सरमोहमैत्र्यः ॥ २२८ ॥

क्षान्तिर्धृतिर्दुःखसुखे गुणास्त्रय, आम्नायशङ्काभयनिर्भयाधयः ।
ध्यानादयो मान्ति यथैव तद्वद्, द्रव्याणि लोकेऽपि वसन्ति नित्यम्

लोके यथा वा वनखण्डमध्ये, रेणुस्तथामी त्रसरेणवोऽपि ।
सूर्यातपो वह्नितपः सुमानां, गन्धः समीरः पशुपक्षिशब्दः ॥ २३० ॥

वादित्रनादश्छदमर्मरादि, सर्वाणि मान्तीह तथाऽवकाशः ।
एवं च द्रव्यैर्निचितेऽपि लोके-वकाश एषोऽपि च तादृशोऽस्ति२३१

## द्वादशोऽधिकारः

पृच्छामि पूज्यान् प्रणयादिदानीं, जीवस्तु कर्माणि शुभाशुभानि ।
भुङ्क्ते सुखैषी किमु दुःखितः सं-स्तदाऽस्ति कश्चिन्ननु कर्मनोदकः

विधिर्ग्रहो वा परमेश्वरो वा, कर्त्ता यमो वा भगवांनिहाऽस्तु ।
प्रणोदकः कर्मगणस्य येन, दुःखं सुखं वा परिभोज्यते जगत्॥ २३३ ॥

नैवं यदेतानि भवन्ति कर्म-नामानि शास्त्रे पठितानि तद्यथा।
भाग्यं स्वभावो भगवानदृष्टं, कालो यमो दैवतदैवदिष्टम् ॥ २३४ ॥

अहो ! विधानं परमेश्वरः क्रिया, पुराकृतं कर्म विधा विधिश्च।
लोकः कृतान्तो नियतिश्च कर्त्ता, प्राक्कीर्णप्राचीनविधातृलेखाः॥ २३५

इत्यादि नामानि पुराकृतस्य, शास्त्रे प्रणीतानि तु कर्मतत्त्वगैः।
तदात्मनो न स्वकर्मणो विना, सुखस्य दुःखस्य च कारको परः २३६

स्थाने त्वजीवानि पुनर्जडानि, कर्माणि किं कर्त्तुमिह क्षमाणि ? ।
कश्चित्तदेषां परिणोदकोऽस्तु, यच्छक्तितोऽमूनि सहीभवन्ति॥ २३७ ॥

इदं तु सत्यं परमत्र कर्मणा-मेषां स्वभावोऽस्ति सदेदृगेव।
विनेरकं यान्यखिलात्मनः स्वयं, स्वरूपतुल्यं फलमानयन्ति॥ २३८ ॥

यतोऽभिवर्त्तन्त इमेऽत्र जीवाः, अजीवसम्बन्धमधिश्रिताः सदा।
जीवन्त्यजीवन्नथ जीवितार-स्त्रैकालिकः सङ्गम एभिरेषाम्॥ २३९ ॥

षड्द्रव्यमध्ये खलु द्रव्यपञ्चकं, निर्जीवमेवं समवायपञ्चकम्।
एतैरजीवैरपि जीवसङ्कुलं, जगत्समस्तं ध्रियते निरन्तरम् ॥ २४० ॥

जीवास्त्विमे स्वोर्जितकर्मपुद्गलैः सन्तः श्रिता दुःखसुखाश्रयीकृताः।
द्रव्याणि षट् यत्समवायपञ्चक-मेतन्मयं ह्येव जगन्न चाऽपरम्॥ २४१ ॥

ततः सचेतः प्रणिचेत चेतसा, जीवेभ्य एते सबला अजीवाः।
यतो यथाऽजीवबलप्रणोदिता, जीवास्तथा स्युः सुखदुःखभाजः २४२

स्वभाव एषोऽस्ति यतस्तु जीवाः, गृह्णन्ति कर्माणि शुभाशुभानि।
स्वकालसीमानमवाप्य कर्मा-ण्यमूनि चैषां सुखदुःखदानि॥ २४३ ॥

चेदित्थमेवेति तदायमात्मा, गृह्णाति कर्माणि शुभाशुभानि।
आत्माऽपि दुःखानि न भोक्तुकामः, यदेष दुष्कर्म पुरस्करोति॥ २४४ ॥

तदीह कर्माणि कियन्तमुच्चै-र्विलम्ब्य कालं निजकारमात्मकम्।
सुखं तथा दुःखमिमं नयन्ति, कुतो विना प्रेरकमेतदेष्यम् ॥ २४५ ॥

सत्यं तु कर्माणि जडानि सन्ति, नाभोगकालं निजकं विदन्ति ।
आत्माऽपि दुःखानि न भोक्तुकाम-स्तथापि दुःखान्ययमाश्रयेत २४६

द्रव्यादिसामग्र्यतथाऽनिवार्य-शक्त्यैव कर्माणि तु तादृशान्यपि ।
स्फुटानि भूत्वा स्वककर्तृकं बला-दात्मानमेनं ननु दुःखयन्ति २४७

यथोष्णकालादिऋतौ समेते, कश्चिज्जनः शीतलवस्तुसेवी ।
मृष्टादिकाम्लादिकरम्भभोजी, स्यात्तस्य तद्योगसमुत्थवातः ॥ २४८ ॥

वर्षाऋतुं प्राप्य पुरु प्रकुप्यति, प्रायो वपुःस्थः स समीर उग्रः ।
लब्ध्वा च कालं शरदाख्यमेष, प्रायेण संशाम्यति पित्तभावात्॥ २४९ ॥

एवं हि वातादिकवस्तुनस्तू-त्पत्तिस्थितिप्रान्तदशात्रयेऽपि ।
आत्माश्रितस्याऽस्य न कश्चिदन्यः, विनैव कालादिकमत्र हेतुः॥ २५०

कर्मग्रहः स्वेप्सितभुक्तिवत्स्यात्, द्वयोस्तु शान्तिस्थितिकार्यनेहा ।
समस्तदात्मार्जितकर्मणां हि, भुक्तिश्च शान्तिः किल कालद्रव्यैः २५१

एवं तु कालो गदितोऽस्ति कर्मणो, वातादिवस्तुत्रितयस्य चाऽपि ।
परं यदा कश्चन शान्त्युपाय उग्रो भवेत्तर्ह्यपि याति चान्तरात्॥ २५२ ॥

किञ्चित्कदाचित्स्वदनं यदात्मनः, वातादिकृत्तत्क्षणतोऽपि जायते ।
कर्माणि कानीह तथात्मनोऽस्यो-ग्राणि क्षणात्तत्फलदान्यनीरकम्२५३

यदा पुनः स्त्री पुरुषं भजन्ती, यदृच्छया स्वार्थपरा विनेरकम् ।
विपाककाले परिपूर्णतां गते, प्रसूयमाना सुखिताथ दुःखिता॥ २५४ ॥

एवं तु कर्माण्यपि दुष्टशिष्टा-न्यनीरकाण्येव निजात्मगानि ।
स्वं कालमाप्य प्रकटीभवन्ति यद्, दुःखं सुखं वाऽभिनयन्ति देहिनम्

यद्वातुरः कोऽप्यगदान् किलाऽऽहरन्, जानाति नासावहितान् हितानथ ।
तदीयपाकस्य गते तु काले, सुखं तथा दुःखमयं लभेत ॥ २५६ ॥

कर्माण्यपीत्थं पुनरेष आत्मा, गृह्णन् न जानाति शुभाशुभानि ।
यदा तु तेषां परिपाककाल-स्तदा सुखी दुःखयुतोऽथवा स्वयम्२५७

विषं तथा कृत्रिममीदृशं स्या-त्तत्कालनाशाय तथैकमासात्।
द्विमासषण्मासकवर्षकाल-द्विवर्षवर्षत्रयतोऽपि नाशकृत् ॥ २५८ ॥

इत्थं च कर्माण्यपि भूरिभेद-भिन्नस्थितीनीह भवन्ति कर्त्तुः।
निजे निजे काल उपागते तु, तादृक् फलं तानि वितन्वते स्वतः २५९

सिद्धो रसो वैष भवेदसिद्धः, सर्वो गृहीतोऽभ्यमितेन केनचित्।
समागते तत्परिणामकाले, दुःखं सुखं वा भजते तदाशकः॥ २६० ॥

तथात्मगा दुष्पिटिका च वालको, दुर्वातशीताङ्गकसन्निपाताः।
स्वयं त्वमी कालबलं समेत्य, तद्वन्तमात्मानमतिव्यथन्ते ॥ २६१ ॥

अमी तथैते ऋतवोऽपि सर्वे, स्वं स्वं च कालं समवाप्य सद्यः।
मनुष्यलोकाङ्गभृतो नयन्ति, सुखं तथा दुःखमिमान् स्वभावतः२६२

एवं हि कर्माणि निजात्मगानि, स्वकं स्वकं कालमवाप्य सत्वरम्।
विना परप्रेरणमेतमात्मकं, नयन्ति दुःखं सुखमप्यथो स्वयम्॥ २६३ ॥

तथा पुनः शीतलिकादिवाला-मयोद्भवा तस्रिरधिश्रयेत्तनुम्।
षण्मासमात्मानमिमं तथैव, श्रयन्ति कर्माणि समेत्य यत्स्वयम्॥ २६४ ॥

यक्ष्माक्षिबिन्दूद्धतपक्षघाता, अर्धाङ्गशीताङ्गमुखामया ये।
सहस्रघस्रैः परिपाकमेषां, वदन्ति वैद्या विदितागमा विदा ॥ २६५ ॥

इत्थं हि केषामिह कर्मणां परी-पाकं स्वकालं समवाप्य यत्स्वयम्।
विना परप्रेरणमत्र पण्डिताः, पठन्ति सैद्धान्तिकसिन्धुरा ये ॥ २६६ ॥

तापो यथा पित्तभवो दशाहं, सश्लेष्मिको द्वादशरात्रमात्रम्।
सवातिकस्तिष्ठति सप्तरात्रं, त्रैदोषिकः पञ्चदशाहमानम् ॥ २६७ ॥

एवं ज्वराणां परिपाककालः, स्वकः स्वकोऽयं पृथगेष उक्तः।
यथा तथैषां कृतकर्मणामपि पृथक् स्वकीयः स्थितिकाल एष्यः२६८

यथा यथा वा चरितं पुरात्मना, फलं ग्रहाणामिव भुज्यते तथा।
यावत्स्वसीमां सहजादृशान्त-दर्शादियुक्तं परिणोदकं विना॥ २६९ ॥

कर्माणि कर्मान्तरितानि चैवं, यथात्मनानेन ननु क्रियन्ते ।
स्वकालमेषां परिपाकयुक्तं, भुङ्क्ते तथात्मा फलमीरकं विना॥ २७० ॥

कर्मेदमाहुः कतिधा बुधाः सुधा-किरा गिरा त्वं शृणु दक्षिण ! क्षणम् ।
भङ्गीचतुष्केन चतुर्विधं त-त्तत्राऽऽद्यमत्राऽऽचरितं त्विहोदयेत् २७१

शस्तं तथाऽशस्तमहो यथा भुवि, सिद्धाय वा साधुजनाय भूभृते ।
श्रिया इह स्वल्पमपि प्रदत्तं, चौर्याद्यशस्तं पुनरत्र नाशकृत्॥ २७२ ॥

भेदो द्वितीयोऽत्रकृतं परत्र, कर्मोदयेदत्र यथा प्रशस्यम् ।
तपोव्रताद्याचरितं सुरत्वा-दिदं तदन्यन्नरकादिदायि ॥ २७३ ॥

सत्या यथा सत्त्वमिहाश्रितं पुनः शूरेण शौर्यं परजन्मभोगदम् ।
तृतीयभेदस्तु परत्र कर्म, निर्मातमत्रासुखसौख्यदायि ॥ २७४ ॥

एकत्र पुत्रे तु तथा प्रसूते, दारिद्र्यमात्रादिवियोगयोगः ।
अस्य ग्रहा अप्यथ जन्मकुण्डली-मध्ये न शस्ताः कृतकर्मयोगात् २७५

अन्यत्र पुत्रे तु तथा प्रजाते, सम्पत्तिमातादिसुखं प्रभुत्वम् ।
अपि ग्रहा अस्य तु जन्मपत्रिका-मध्ये विशिष्टाः पतिताः सुकर्मतः२७६

चतुर्थभेदस्तु परत्र कर्म, कृतं परत्रैव फलप्रदं भवेत् ।
यदत्र जन्मे विहितं तृतीय-भवे विधत्ते फलमात्मगामुकम्॥ २७७ ॥

येनाऽत्र जन्मे व्रतमुग्रमाश्रितं, प्रागेव तस्मात्प्रतिबद्धमायुः ।
नृदेवपश्वादिभवोत्थमल्पं, तदा ततोऽन्यत्र भवेद्भवेऽस्य तत्॥ २७८ ॥

दीर्घायुषा भोज्यमहो महत्फलं, द्रव्यादिसामग्र्यतथोदयाच्च ।
यथाऽत्र केनाऽपि च वस्तु किञ्चि-त्रातं प्रगे मे भवितेत्यवेत्य २७९

द्रव्यादिकालादितथाविधौजसा-त्यर्थं तु तद्वस्तु न तेन तत्र ।
दिने प्रभुत्त्वं हि ततोऽन्यदा त-द्भोक्तव्यमेतादृगिदं तु कर्म॥ २८० ॥

एवं चतुर्भङ्गिकया स्वकर्म, भोग्यं भवेदाप्तवचःप्रमाणात् ।
कर्मस्वरूपं प्रतिवेदितुं नो, क्षमं विना केवलिनो यथार्थम् ॥ २८१ ॥

ईदृग्विधं कर्म कियद्विधं स्या-त्रिधेति तत्किं शृणु भण्यमानम्।
भुक्तं च भोग्यं परिभुज्यमानं, शुभाशुभं सर्वमिदं सदृक्षम् ॥ २८२ ॥

किंवद्यथा वारिदबिन्दुवृन्दं, वसुन्धरायां पतितं प्रशुष्कम्।
तद्भुक्तवत्तत्र च भोग्यवत्किं, यावत्पतिष्यत्परिशोष्यमस्ति॥ २८३ ॥

निपत्यमानं परिशुष्यमाणं, यावद्यदेतत्परिभुज्यमानवत्।
ग्राह्यो गृहीतः परिगृह्यमाणो, यथा गुडो वा किल कर्म तद्वत्॥ २८४ ॥

संसारिजीवा व्रतिनोऽव्रता वा, तेषां तु कर्मत्रयमेतदस्ति।
वसुन्धराया घनबिन्दुवृन्दवत्, भुक्तं च भोग्यं परिभुज्यमानकम्॥ २८५ ॥

कैवल्यभाजस्तु यके महान्त-स्तेषां तु कर्माणि शिलाग्रवृष्टिवत्।
अल्पस्थितीन्येव तथापि तद्दशा-त्रयं तु तत्राऽपि गवेषणीयम्॥ २८६ ॥

सर्वत्र कर्त्रादिपरप्रणोदनां, विनैव द्रव्यादिचतुष्टयस्य।
तादृक्स्वभावादिह कर्मणां त्रयी, भुक्तादिकाऽसौ भविमुक्तजीवगा

सिद्धात्मनां सिद्धतया दशात्रयी, न कर्मणां तत्कृतपूर्वनाशतः।
भुक्ताऽप्यवस्था भवदेषु केवलि-भवावसानं न तदत्र काऽपि सा२८८

मया विचारोऽयमवाचि कर्मणा-मजानता लोकगतैर्निदर्शनैः।
सामान्यलोकप्रतिबोधनाय, ज्ञेयः प्रवीणैस्तु पुराणयुक्तिभिः॥ २८९ ॥

इत्थं विना प्रेरकमत्र कर्मणां, भुक्ताविहोदाहरणान्यनेकशः।
विचारितान्येव विचारचञ्चुरै-स्तद्वाक्प्रमाणं किल पारमेश्वरी॥ २९० ॥

## त्रयोदशोऽधिकारः

मुनीश! केचिद् भुवि नास्तिका ये, न पुण्यपापे नरकं न मोक्षम्।
स्वर्गं न च प्रेत्यभवं वदन्ति, को नाम तर्कः खलु तैः श्रितोऽस्ति ?

ते नास्तिका दृश्यपदार्थसक्ता, नोइन्द्रियादेयविचारमुक्ताः।
प्रत्यक्षमेकं वृणुते प्रमाणं, पञ्चेन्द्रियाणां विषयोऽस्ति यत्र ॥ २९२ ॥

पृच्छाऽस्ति तैः सार्धमसौ मुनीनां, चेन्नास्तिकैरिन्द्रियगोचरः श्रितः ।
सद्वस्तु दृश्यं यदि तर्हि वस्तु किं, यन्नेन्द्रियाणां विषयः समेषाम्

रामादिके वस्तुनि सर्वश्रोतसां, किं गोचरो नेति यदाह नास्तिकः ।
रात्रावतद्वस्तुनि शब्दरूप-समेऽपि तद्वस्तुभ्रमो न किं स्यात् ? २९४

सत्यं हि रात्रौ सकलेन्द्रियाणि, प्रायेण मुह्यन्त्यवबोधहान्याः ।
तस्मादतद्वस्तुनि तद्ग्रहः स्यात्, तच्छ्रोतसां चिन्न सदैव सत्या॥ २९५

पुनर्यथा पश्य जनेन नीरुजा, शङ्खः सितोऽस्तीति निरीक्ष्य गृह्यते।
पुनश्च तेनैव रुजार्दितेन, स गृह्यते किं न बहूत्थवर्णः ॥ २९६ ॥

यथा पुनः स्वस्थमनाः स्वबन्धून्, जानाति नैवं मधुमत्त एषः ।
सन्त्येषु तान्येव किलेन्द्रियाणि, कथं विपर्यास इयानभिष्यात् ? २९७

पुरातनं ज्ञानमथेन्द्रियाणां, सत्यं तथा चाऽऽधुनिकं प्रमाणम् ।
नेदं वरं किन्तु पुरातनं सत्, तान्येव खानीह तु को विशेषः ?॥ २९८ ॥

पूर्वं मनोऽभूदविकारि यस्मात्, तत्साम्प्रतं यद्विकृतं बभूव ।
अतो मिथो भेद इयान् स कस्य, भेदोऽस्त्ययं मानसिकस्तदत्र॥ २९९

दृश्यं मनो नास्ति न वर्णतो वा, कीदृग् निवेद्यं भवतीति भण्यताम् ।
न दृश्यते चेन्नहि वर्तते तत्, खान्येव तानीह कथं विकारः ?॥ ३०० ॥

अयं विकारस्तु बभूव साक्षाद्, यं सर्व एते निगदन्ति तज्ज्ञाः ।
त्वं पश्य चेद्दृष्टपदार्थकेष्वपि, मोहो भवेदित्थमिहैव खानाम्॥ ३०१ ॥

तर्हीन्द्रियज्ञानमिदं हि केन, सत्यं सता सर्वमितीव वाच्यम् ।
तदेव सत्यं यदिहोपकारिण उपादिशन् दिव्यदृशो गतस्पृहाः॥ ३०२ ॥

स्वस्थं मनस्त्वं बुध ! सन्निधाय, विचारमेतं कुरु तत्त्वदृष्ट्या ।
शब्दा इमे ज्ञानवतोपदिष्टा-स्तेऽमी यथार्था भवताऽपि वाच्याः ३०३

आनन्दशोकव्यवहारविद्या आज्ञाकलाज्ञानमनोविनोदाः ।
न्यायानयौ चौर्यकजारकर्मणी, वर्णाश्च चत्वार इमे तथाश्रमाः॥ ३०४ ॥

आचारसत्कारसमीरसेवा, मैत्रीयशोभाग्यबलं महत्त्वम् ।
शब्दस्तथार्थोदयभङ्गभक्ति-द्रोहाश्च मोहो मदशक्तिशिक्षाः ॥ ३०५ ॥

परोपकारो गुणखेलना क्षमा, आलोचसङ्कोचविकोचलोचाः ।
रागो रतिर्दुःखसुखे विवेक-ज्ञातिप्रियाः प्रेमदिशश्च देशाः ॥ ३०६ ॥

ग्रामः पुरं यौवनवार्धकास्था, नामानि सिद्ध्यास्तिकनास्तिकाश्च ।
कषायमोषौ विषयाः पराङ्मुखा-श्चातुर्यगाम्भीर्यविषादकैतवम् ॥ ३०७ ॥

चिन्ताकलङ्कश्रमगालिलज्जा-सन्देहसङ्ग्रामसमाधिबुद्धि ।
दीक्षापरीक्षादमसंयमाश्च, माहात्म्यमध्यात्मकुशीलशीलम् ॥ ३०८ ॥

क्षुधापिपासार्घमुहूर्त्तपर्व-सुकालदुष्कालकरालकल्यम् ।
दारिद्र्यराज्यातिशयप्रतीति-प्रस्तावहानिस्मृतिवृद्धिगृद्धिः ॥ ३०९ ॥

प्रसाददैन्यव्यसनान्यसूया-शोभाप्रभावप्रभुताभियोगाः ।
नियोगयोगाचरणाकुलानि, भावाभिधा प्रत्यययुक्तशब्दाः ॥ ३१० ॥

इत्यादिशब्दा बहवो भवन्ति ये, जिह्वादिवत्तेन हि शब्दवन्तः ।
स्वर्णादिवन्नो इह रूपवन्तः, पुष्पादिवन्नोऽत्र च गन्धबन्धुराः ॥ ३११ ॥

सितादिवन्नो रसवन्त एवं, न स्पर्शवन्तः यवनादिवच्च ।
किन्त्वेककर्णेन्द्रियरूपग्राह्या-स्ताल्वोष्ठजिह्वादिपदप्रवाच्याः ॥ ३१२ ॥

स्वस्वोत्थचेष्टादिविशेषगम्याः, स्वाभ्याससम्प्राप्तफलानुमेयाः ।
स्वनामयाथार्थ्यकथानिधायिनः, स्वीयप्रतिद्वन्द्विविनाशकारिणः ३१३

सद्यो विरोध्युत्थनिजाह्वयान्ता इतीदृशाः सर्वजनप्रसिद्धाः ।
शब्दाः स्वकीयोत्थगुणप्रधाना वाच्या नैरास्तिकनास्तिकैश्च ॥ ३१४ ॥

यदीदृशा अप्ययि सिद्धशब्दाः, येषां न साक्षात्कृतिरिन्द्रियैः स्वैः ।
तत्पुण्यपापादिकवस्तुनीहा-प्रत्यक्षके कस्य च खस्य वृत्तिः ॥ ३१५ ॥

अतो य एतन्मनुते वदावदः, प्रत्यक्षमेकं हि मम प्रमाणम् ।
तच्चिन्त्यमानं न विवेकचक्षुषाम्, शक्तं भवेत्सर्वपदार्थसिद्ध्यै॥ ३१६ ॥

किं तर्हि सत्यं निजगाद नास्तिक-स्तदुत्तरं यच्छ्तु शुद्धमास्तिकः ।
यदेकशब्देन निगद्यमानं, तत्सृत्पदं प्राहुरिति प्रवीणाः ॥ ३१७ ॥

तद्विद्यते यन्ननु सत्पदेन, वाच्यं भवेद् वस्तु तदत्र किं स्यात् ? ।
यच्छब्दजातं गदितं पुरैव, तथा पुनः किंचिदनुच्यतेऽत्र ॥ ३१८ ॥

कालः स्वभावो नियतिः पुराकृतं, तथोद्यमः प्राणमनोऽसुमन्तः ।
आकाशसंसारविचारधर्मा,-धर्माधिमोक्षा नरकोर्ध्वलोकौ ॥ ३१९ ॥

विधिर्निषेधः परमाणुपुद्गलः, कर्माणि सिद्धाः परमेश्वरस्तथा ।
इत्यादिशब्देषु न चेष्टयाऽपि, केचित्सुधीभिः प्रतिपादनीयाः॥ ३२० ॥

किन्त्वेकतः सत्पदतः प्ररूप्याः तथैककर्णेन्द्रियग्राह्यवर्णाः ।
स्वस्वस्वभावोत्थिततत्तथाविध-फलानुमेयाः किल केवलीक्ष्याः३२१

ये सन्ति शब्दास्तु पदद्वयादिना, संयोगजास्ते भुवि सन्ति वा नो ।
यथा हि वन्ध्याऽस्ति सुतोऽपि चाऽस्ति, वन्ध्यासुतश्चेति न युक्तशब्दः

एवं नभःपुष्पमरीचिकाम्भः-खरीविषाणप्रमुखा अनेके ।
एतादृशा ये किल सन्ति शब्दाः, संयोगजास्ते किल नैव युक्ताः ३२३

कर्णेन्द्रियग्राह्यतयापि नैषां, सत्ताऽस्ति तन्नेन्द्रियगोचरः सन् ।
केचित्तु संयोगभवा हि शब्दाः, सन्त्येव ते तद्विरहो न प्रायः॥ ३२४ ॥

यथाहि गोशृङ्गनरेन्द्रकञ्जा-वनीरुहागोपतिभूधराद्याः ।
संयोगजाः सन्ति वियोगतश्च, शब्दा अनेके विबुधैर्विवेच्याः॥ ३२५ ॥

श्रोत्राक्षिमुख्येन्द्रियरूपग्राह्ये, परन्त्वतन्नामनि तस्य नाम्नि ।
अर्थे तथाऽन्याश्रितरूपवेषके, ज्ञानं न नेत्रश्रवसोस्तदर्थकृत्॥ ३२६ ॥

यथा सिताभ्रादिसुगन्धिवस्तुषु, श्रोत्राक्षिनासारसनासमुत्थम् ।
ज्ञानं यदप्यस्ति तथापि केषुचि-त्तेषु प्रमाणं रसनावबोधनम्॥ ३२७ ॥

स्वर्णादिके वस्तुनि कर्णनेत्र-ज्ञानं स्फुरत्येव तथापि तत्र ।
निर्घर्षणादिप्रभवोऽवबोध-स्तदर्थसत्याय न केवलाक्षम् ॥ ३२८ ॥

माणिक्यमुख्येषु पदार्थराशिषु, समाक्षविद्रत्नपरीक्षिकातः ।
तथापि तेषामधिकोनवक्रयो, निगद्यते रत्नपरीक्षकैः किम् ?॥ ३२९ ॥

सर्वेषु सर्वाणि समानि खानि, तदा कथं भिन्नविभिन्नवक्रयः ।
परन्तु कश्चित्प्रतिभाविशेषो, येनोच्यते तद्गतमूल्यनिश्चयः ॥ ३३० ॥

तथाहि फेनादिकजोटकेषु, प्रायो विमुह्यन्ति समेन्द्रियाणि ।
प्रमाणमेतेषु तदुत्थमत्तता, तेनेन्द्रियज्ञानमृतं न सर्वम् ॥ ३३१ ॥

तथौषधीमन्त्रगुडाविशेषै-र्लोकाञ्जनैर्गुप्ततनोर्नरस्य ।
मूर्तिस्तु नो दृक्पथमेति नृणां, तत्किं स नास्तीति न गृह्यते खैः ३३२

तदाश्रितार्थादिकृतेस्तु तस्य, सत्ता तथा शक्तिमहेशवीराः ।
भूतं सती जाङ्गुलिका सपत्नी, सिद्धायिकादेरपि तद्वदेव॥ ३३३ ॥

एतस्य सिद्धौ हि परोक्षसिद्धिः, तत्सेधनात् स्वर्गपरेतसिद्धिः ।
न दृश्यते यन्नु चेष्टयापि, कथं हि तद्वस्तु सदिष्यते भोः॥ ३३४ ॥

स्थाने परं सर्वमिदं हि केवली, ज्ञानेन जानाति यदेव वस्तु सत् ।
अतस्तदीयं वचनं प्रमाणं, यदुच्यते तेन परावबुध्यै ॥ ३३५ ॥

त्वं पश्य लोकेऽपि जनैर्न चान्यै-र्यज्ज्ञायते तत्किल दृश्यतेऽलम् ।
नैमित्तिकैरेव यथोपरागो, ग्रहोदयो गर्भघनागमादि ॥ ३३६ ॥

तथा व्यतीतं सकलं ब्रवीति, पृष्टं तु चूडामणिशास्त्रवेदी ।
निदानवैद्योऽखिलरुग्निदानं, निवेदयत्याशु न चाऽन्यलोकः॥ ३३७ ॥

परीक्षको वेत्यथ नाणकस्य, यथा परीक्षां न परो मनुष्यः ।
पदं पदज्ञः शकुनं च तज्ज्ञो, यथा विजानाति परो न तद्वत्॥ ३३८ ॥

अतस्त्वकं विद्धि जनोऽखिलोऽन्यः, सर्वेन्द्रियोऽप्यत्र न वेत्ति तद्वत्।
यथैव नैमित्तिकमुख्यलोक-स्तदक्षतः कोऽप्यपरोऽस्ति बोधः॥ ३३९ ॥

एवं परोक्षार्थमिमं समस्तं, ज्ञानी विजानाति न सर्वलोकः ।
प्रायस्त्विदं वेत्ति परोपदेशा-ज्जनः स्वतो नेन्द्रियकेषु सत्सु॥ ३४० ॥

आचारशिक्षागमसाधनानि, रसायनं व्याकरणादिविद्याः ।
चरित्रवृत्ती परदेशवार्त्ता, स्वादिन्द्रियाद् वेत्ति न किन्तु चाऽन्यतः३४१

हेतोरतः सुष्ठु विधाय चित्तं, विचारयेदं स्वविकल्पमुक्तः ।
ग्राह्यं यदेवाऽस्ति नृणां निजैः खै-स्तदेव गृह्णन्ति हि तानि खानि ३४२

ज्ञानं परोक्षं हि यदिन्द्रियाणां, तज्ज्ञायते मङ्क्षु परोपदेशात् ।
शस्तं तथाऽशस्तमिदं समस्तं, विस्तारसंक्षेपत ईक्ष्यतेऽन्यतः॥ ३४३ ॥

यथान्त्रशुक्रं कफपित्तवात-नाडीभ्रमं गुल्मयकृन्मलाशयाः ।
गण्डोलतापाधिकतप्तिवालकाः, कपालरोगा गलरोगविद्रधी॥ ३४४ ॥

इत्यादिकं यत्तनुमध्यवस्तु, सामान्यमर्त्यैर्निजकेन्द्रियैः स्वयम् ।
न ज्ञायते किन्तु परोक्तिश्रुत्या, ज्ञेयं तदस्य प्रशमात्स्वसत्ता ॥ ३४५ ॥

इदं विदां सुन्दर ! स त्वमेदं-पर्य्यं विजानीहि मयोच्यमानम् ।
वस्त्वस्ति यत्प्राणभृदङ्गभाग-भूतं प्रदृश्यं न परन्त्वमूर्त्तम्॥ ३४६ ॥

अतःकिलाकारवतोऽङ्गिनोऽङ्गजं, तदङ्गभूतं च यदस्ति वस्तु ।
दृश्यं तदेवाथ न सन्त्यनाकृते-र्जीवस्य येऽनाकृतयो गुणास्ते॥ ३४७ ॥

इतीयता सिद्धमिदं यदत्र खै-र्ग्राह्यं तदेव प्रतिगृह्यते तैः ।
अन्यद्यदासैरुदितं तदेव, सत्यं नृणां खानि तु सर्वदृंशि नो ॥ ३४८ ॥

## पञ्चदशोऽधिकारः

पुनश्च यद्देहबहिःस्थवस्तु, दृश्यं तदेवाङ्गिभिरीक्ष्यतेऽक्षैः ।
ग्राह्यं तु यन्नास्ति न गृह्यते तत्, परोक्तिशक्त्या तदपीह मन्यते॥ ३४९ ॥

पुंसो यथा कस्यचिदस्ति कन्धरा-पृष्ठस्थितो वंशकमध्यगो वा ।
भृङ्गोऽथवा लक्ष्म च कालकादि, स्वयं न जानाति स तन्निजैः खैः ३५०

यदा तु मात्रादिनिजाप्तवृद्धै-स्तवाऽत्र भृङ्गादि निगद्यतेऽदः ।
तदाऽपि तेनाऽप्यनुमन्यते तत्, परन्तु खैः स्वैर्न कदाचिदीक्ष्यम् ३५१

विद्वन् ! यथास्येक्षकमानवास्ततो-ऽनेके परे सन्ति तथा स्वरीक्षकाः ।
घना न तस्य त्वनिरीक्षकः सको,-ऽङ्क्येवैककस्तेन समं न चोत्तरम्

युक्तं परं नास्तिकतो घना जनाः, सन्त्यास्तिका आप्तवचःप्रमाणकाः ।
तत्प्रेत्यदर्शी निवसन्ति भूरिशो, लक्ष्मेक्षवन्नास्तिकवत्तु लक्ष्मवान्३५३

सत्यं मुने ! तत्फलतोऽपि पृष्ठगं, लक्ष्मावसेयं हि भवेदवश्यम् ।
परन्तु न स्वर्गपरेतलोकौ, कयाऽपि बोध्यौ ननु चेष्टयाऽपि ॥ ३५४ ॥

मैवं वद कोविद ! शक्तिशम्भु-गणेशवीरादिकदेवसंहतिः ।
शेवाङ्गिमान्याऽथ तुरुष्कपूज्याः, फिरस्तपेगम्बरपीरमुख्याः ॥ ३५५ ॥

तदीयसेवोत्थिततादृशेन, फलेन वेद्या न हि सन्ति ते किम् ? ।
सन्तीति चेत्ते त्रिदशा न मर्त्याः, प्रायो न दृश्याः कलिकालयोगतः ३५६

दूरस्थतद्योग्यनिवासभूमे-रगम्यतत्क्षेत्रपथा मनुष्याः ।
परन्तु सिद्धास्त्विदमीयसत्ता, नो मादृशैरत्र गतैः प्रदर्श्या ॥ ३५७ ॥

त्वं चेतसि स्वे परिभावयैवं, लङ्काऽस्ति वा नो ननु वर्तते सा ।
त्वया मया सर्वजनैरपीय-माकर्ण्यते केन न मन्यते सा ? ॥ ३५८ ॥

एवं तदा चेत्त्वमिह स्थितः सन्, लङ्कां पुरीं तां मम दर्शयाऽत्र ।
श्रुत्वेति सोऽभाषत नास्तिकाख्यः, इहस्थितैः कैर्ननु दर्श्यते सा ?३५९

त्वमित्थमेवाऽऽत्मनि मानयात्र, स्थितैस्तु लङ्का न यथा निरीक्ष्यते ।
न स्वर्गमोक्षादिपदं तथैव, छद्मस्थपुम्भिः परिवीक्ष्यमत्रगैः ॥ ३६० ॥

## षोडशोऽधिकारः ।

अथाऽऽस्तिकं नास्तिक आह शस्तधी-रस्त्वस्त्विदं स्वर्गपदादि निश्चितम्।
परं किलैतस्य यदस्ति साधनं, तद् ब्रूहि मे साम्प्रतमादरेण॥ ३६१ ॥

अहो ! त्वया साधु वचः समीरितं, धर्मश्रुतौ ते यदभूदिदं मनः ।
एकाग्रचेतः शृणु तर्हि मद्वचो, यथा तवाऽप्यस्तु सुधीः सुधर्मे॥ ३६२ ॥

हिंसामृषादत्तग्रहाङ्गनागमाः, परिग्रहश्चेति समे समन्ततः ।
विवर्जनीया यदिमान् विवर्ज्य, सिद्धोऽभवच्छ्रीभगवान् प्रसिद्धः ३६३

ये सत्यशीलक्षमतोपकारिता-सन्तोषनिर्दूषणवीतरागताः ।
निःसङ्गता चाऽप्रतिबद्धचारिता-सज्ज्ञानितानिर्विकृतिप्रसन्नताः॥ ३६४ ॥

सद्गोष्ठितानिश्चलताप्रकाशिता-अस्वामिसेवित्वमतीवसत्त्वता ।
निर्भीकताऽल्पाशनताविशिष्टता-संसारसम्बन्धजुगुप्सतादयः॥ ३६५ ॥

अत्रेदृशा अल्पगुणा अभूवन्, सिद्धिश्रितां ते तु भवन्त्यनन्ताः ।
क्षेत्रस्वभावादथ सिद्धभावा-द्यद् वा शिवात्केवलिवाक्प्रमाणात् ३६६

तत्सेवकेनाऽपि तदीयशील-विधायिना भाव्यमिति प्रतीतम् ।
तथा च सिद्धा यदमूर्त्तरूपा, गताशना नीरुषवीतरागाः ॥ ३६७ ॥

निरञ्जना निष्क्रियका गतस्पृहाः, अस्पर्धका बन्धनसन्धिवर्जिताः ।
सत्केवलज्ञाननिधानबन्धुरा, निरन्तरानन्दसुधारसाञ्चिताः ॥ ३६८ ॥

अतस्तदुत्पन्नगुणानुगामिभि-र्महानुभावैर्मुनिभिर्विधीयते ।
तेषां गुणानामनुयानमात्मा-नुरूपशक्त्या तदवाप्तिकाङ्क्षया ॥ ३६९ ॥

यद्यप्यमीषां न गुणान्समस्तान्, पूर्णानिमे सेवितुमत्र शक्ताः ।
तथाप्यमी साधव आत्मयोग्यं, श्रित्वा बलं सिद्धगुणान् श्रयन्ति ३७०

तथाहि सिद्धाः परिभान्त्यमूर्त्ता, अमी तथा देहममत्वमुक्ताः ।
अरूपिणस्ते तदिमे शरीर-संस्कारसत्कारनिकारकाराः ॥ ३७१ ॥

मुक्ताशनास्तेऽत इमे क्वचित्क्वचि-दाहारवर्जाः पुनरेव ते तु ।
विद्वेषमुक्ता इति सर्वसत्त्व-मैत्रीवहा एत इतीव रुच्याः ॥ ३७२ ॥

ते वीतरागा इति बन्धुबन्ध-च्युता इमे ते तु निरञ्जनाख्याः ।
इमे ततः प्रीतिविलेपनाद्यैः, शून्याश्च ते निष्क्रियकास्ततोऽमी॥ ३७३ ॥

आरम्भसँरम्भविलम्भरिक्ता, गतस्पृहास्तेऽत इमे निराशाः ।
अस्पर्धकास्ते तदमी परैस्तु, वादैर्विवादै रहितास्तथा च ॥ ३७४ ॥

निर्बन्धनास्तेऽथ सदैवक्लृप्त-स्वेच्छाविहारास्तदिमेऽथ तेऽपि ।
निःसन्धयोऽमी तु परस्परोत्थ-सख्याद्विरक्ता अथ केवलेक्षाः॥ ३७५ ॥

ते सन्त्यमी सर्वजगत्स्वभावा-नित्यत्वदर्शाः पुनरेव ते तु ।
आनन्दपूर्णास्तदिमे सदान्तराः, सन्तोषपोषात्समभावभाविनः॥ ३७६ ॥

इत्यादिका ये भगवद्गुणौघाः, शास्त्रेषु दृष्टा अथ तान्प्रकल्प्य ।
मुमुक्षवोऽमी अपि शक्तियोग्य-मादृत्य सिद्ध्यन्त्यपि ते क्रमेण ३७७

येऽन्ये गृहस्थाः खलु ते स्वकीय-शक्त्या तथा देशत एतकान् गुणान् ।
दुष्कर्मशान्त्यर्थमनुश्रयन्तः, क्रमेण चैतेऽपि सुखीभवन्ति॥ ३७८ ॥

एवं तु ये केऽपि जनाः स्वशासने, सत्तां श्रिताः श्रीपरमेश्वरस्य ।
तत्प्रीतये तेऽपि गुणानिमान-नुयान्ति विज्ञाः परब्रह्मलिप्सवः॥ ३७९ ॥

साधो ! गृहस्था अपि देशतोऽमी, श्रयन्त्वमूनेव गुणांश्चिराय ।
परन्तु यत्कर्मणि जीवहिंसां, श्रयन्ति चेत्तन्न परं तदेषाम् ॥ ३८० ॥

सत्यं गृहस्थाः खलु ते भवन्ति, प्रायो हि ते स्थूलधियोऽतिचिन्ताः ।
आरम्भवन्तश्च परिग्रहादराः, सूक्ष्मेक्षिकालीकनकुण्ठबुद्धयः॥ ३८१ ॥

एते विनालम्बनमत्र तत्त्व-त्रये विमुह्यन्ति ततः शुभार्थम् ।
साकारपूजां धृतसाधुवेष-सेवां च दानादि सृजन्तु नित्यम्॥ ३८२ ॥

उच्चैः कुलाचारयशोऽवनार्थम्, श्रितो गृहस्थैः सकलोऽपि धर्मः ।
तद् द्रव्यतो भावत आत्मसम्पदे, द्विधापि धर्मं गृहिणः श्रयन्त्वमी३८३

प्रायेण सावद्यरता गृहस्थाः, सदैहिकार्थाधिकृतौ प्रसक्ताः ।
कुटुम्बपोषाद्दतभूरिसङ्ख्यो-च्चनीचवार्ताः परतन्त्रखिन्नाः ॥ ३८४ ॥

तेऽमी स्वचेतःप्रतिभातपुण्य-कार्योद्यता आत्मरुचिप्रवृत्ताः ।
यदेव ते स्वीयमनोऽभितुष्ट्यै, कुर्वन्ति पुण्यं किल कुर्वतां तत्॥ ३८५

एते गृहस्था हृदये विदध्यु-रितीव सङ्कल्प्य च द्रव्यधर्मम् ।
द्रव्येण कर्माणि समाचरय्य, यथा मनस्तुष्टिमिदं निधत्ते ॥ ३८६ ॥

तथैव धर्माण्यपि कानिचिँच्चेद्, द्रव्येण कृत्वा स्वमनः प्रसन्नम् ।
कुर्मोऽत्र येनैव गृहस्थसत्को, व्यापार एष्व द्रविणेन सिध्येत्॥ ३८७ ॥

एषां यतो द्रव्यवतां स्वधर्मं, द्रव्येण सार्द्धं भवतीह चेतः ।
युक्तं ह्यदो यस्य बलं यदीयं, बलेन तेनैव मतं निजं क्रियात्॥ ३८८ ॥

तद्द्रव्यधर्मं गृहिणां प्रकुर्वतां, संसारकार्यान्मनसोऽस्तु संवृत्तिः ।
यथा तथैते दधतां मनः स्वकं, सालम्बने पुण्यविधावपेक्षणम् ३८९

तद्यावतामी निजकेन्द्रियाणि, संवृत्य संसारभवक्रियातः ।
तदेव पूजादिकमाश्रयन्तां, मनः स्थिरं येन मनागपि स्यात्॥ ३९० ॥

यावत्त्वनाकारपदार्थचिन्ता-कृतौ मनो न क्षममस्ति तद्वत् ।
सुसाध्वसाधुप्रतिपत्तियोग्यो, ज्ञानोदयो यावदहो भवेन्नो ॥ ३९१ ॥

तावत्स्वकीयव्यवहाररक्षा, कार्या कुलीनेन सनिश्चयेन ।
सनिश्चयः सव्यवहार एवं, निन्द्यो गृहस्थो न परैर्यतो भवेत्॥ ३९२ ॥

स्थिरं यदा चित्तमनाकृतावपि, तदा तु सिद्धस्मरणं विधेयम् ।
तत्सेधने साधुगृहस्थमुख्यै-रात्मावबोधे परियत्न एष्यः ॥ ३९३ ॥

पौर्वो विधिर्योऽखिलद्रव्यभाव-भिन्नां स हि द्वारधरोपलब्ध्यै ।
निर्वाणधाम्नो वरयानवत्स्या-त्तस्य प्रवेशेऽयमिहाऽऽत्मबोधः॥ ३९४ ॥

तदङ्गने पादविहारवद्यः, शिवालयावस्थितिकृन्महात्मनाम् ।
तेनात्मबोधः परमोऽस्ति धर्मो, यत्सेधनान्निर्वृतिरेव निश्चिता॥ ३९५ ॥

सन्त्यत्र यद्बोधनदर्शनाख्य-चारित्रमुख्याः सकला गुणौघाः ।
स आत्मबोधो जयति प्रकृष्टं, ज्ञानादिशुद्धं यदिहास्त्यनन्तम्॥ ३९६ ॥

तच्छोधनेऽनन्तचतुष्टयाप्ति-र्यदीयपारप्रतिपत्तिकार्ये ।
ज्ञानं न कस्याऽपि सदा प्रभु स्या-त्सर्वात्मनाकाशदृशीव शाश्वतम् ३९७

## सप्तदशोऽधिकारः ।

अथेत्यसौ नास्तिक आख्यदास्तिकं, यदुच्यते भोः प्रतिमार्चनाद्भवेत् ।
पुण्यं न तत्सम्भवतीषदार्या अजीवतः का फलसिद्धिरस्ति ?॥ ३९८ ॥

नैवं स्वचित्ते परिचिन्तनीय-मजीवसेवाकरणाद् भवेत् किम् ? ।
यद्याद्दृशाकारनिरीक्षणं स्या-त्प्रायो मनस्तद्गतधर्मचिन्ति ॥ ३९९ ॥

यथा हि सम्पूर्णशुभाङ्गपुत्रिका, दृष्टा सती तादृशमोहहेतुः ।
कामासनस्थापनतश्च काम-केलिविकारान्कलयन्ति कामिनः॥ ४०० ॥

योगासनालोकनतो हि योगिनां, योगासनाभ्यासमतिः परिष्यात् ।
भूगोलतस्तद्गतवस्तुबुद्धिः, स्याल्लोकनालेरिह लोकसंस्थितिः॥ ४०१ ॥

कूर्माहिकालानलकोटचक्रै-स्तदाश्रितज्ञप्तिरिह स्थितानाम् ।
शास्त्रीयवर्णन्यसनात्समग्र-शास्त्रावबोधस्तदभीक्षकाणाम् ॥ ४०२ ॥

नन्दीश्वरद्वीपपुटात्तथा च, लङ्कापुटात्तद्गतवस्तुचिन्ता ।
एवं जिनेशप्रतिमाऽपि दृष्टा, तत्तद्गुणानां स्मृतिकारणं स्यात्॥ ४०३ ॥

यदा तु साक्षान्न हि वस्तु दृश्यं, तत्स्थापना सम्प्रति लोकसिद्धा ।
तथा च पत्यौ परदेशसंस्थे, काचित्सती पश्यति यत्तदर्चाम्॥ ४०४ ॥

यदन्यशास्त्रेऽपि निशम्यतेऽदः, श्रीरामचन्द्रे परदेशसंस्थे ।
तत्पादुकां सोऽपि च रामवत्तदा-ऽभ्यपूजयत्श्रीभरतो नरेश्वरः॥ ४०५ ॥

सीताऽपि रामाङ्गुलिमुद्रिकां ता-मालिङ्ग्य रामाऽऽप्तिसुखं न्यमंस्त ।
रामोऽपि सीताश्रितमौलिरत्न-मासाद्य सीतासिरतिं व्यजानात्॥ ४०६ ॥

नात्राऽस्ति कश्चित्तु तयोः शरीर-कारस्तथापीह तयोस्तथाविधम् ।
सुखं समायाद्यदजीवतोऽपि, तर्हीश्वरार्चाऽपि सुखाय किं न ?॥ ४०७ ॥

इत्थं चरित्रेऽस्ति च पाण्डवानां, यद्द्रोणसूरिप्रतिमापुरस्तात् ।
भिल्लैकलव्यस्य किरीटिवद्धनु-र्विद्या सुसिद्धेति जगत्प्रतीतम्॥ ४०८ ॥

तथा च चञ्चादिकवस्त्वजीवं, क्षेत्रादिरक्षाकरणे समर्थम् ।
छायाऽप्यशोकस्य च शोकहर्त्री, कलेस्तु सा स्यात्कलहाय नृणाम्

अजारजोमुख्यमथाऽप्यजीवं, पुण्यादिहान्यै भवतीति लोकः ।
अस्पृश्यकच्छायमजीवमेवं, यल्लङ्घमानस्य निहन्ति पुण्यम्॥ ४१० ॥

गुर्वीवधूच्छायमपीह भोगिनः, प्रोल्लङ्घमानस्य निहन्ति पौरुषम् ।
महेश्वरच्छायमथाऽपि तस्य, रुषे व्यतिक्राम्यत एव पुंसः ॥ ४११ ॥

एवं पदार्था बहवोऽप्यजीवाः, सुखस्य दुःखस्य च हेतवः स्युः ।
देवाधिदेवप्रतिमाऽप्यजीवा, सती न किं सा सुखहेतुरत्र ॥ ४१२ ॥

वरं जिनेशप्रतिमाऽपि तर्हि, दृष्टा सती भक्ततमांसि हन्तु ।
परन्तु याऽस्याः क्रियते सपर्या, साऽजीवतः कस्य च किम्फला स्यात्?

नैवं त्वजीवाऽपि सतीश्वरार्चा, समर्चिता पुण्यफलाय नूनम् ।
त्वं विद्धि चित्ते प्रतिमा यदीया, या या सका स्वोत्थगुणप्रदा स्यात्

यथा ग्रहाणां प्रतिमा अजीवाः, सत्योऽपि तत्पूजनतस्तदीयम् ।
गुणं ददत्येव तथा सतीनां, क्षेत्राधिपानामथ पूर्वजानाम् ॥ ४१५ ॥

विधेर्मुरारेश्च शिवस्य शक्ते-र्याः स्थापनास्ता अहिता हिता वा ।
अमानिताश्चाऽप्यभिमानिताः स्युः, स्तूपं तथा वा फलवन्न किं स्यात् ?

रेवन्तनागाधिपपश्चिमेश-श्रीशीतलादिप्रतिमा अजीवाः ।
सम्पूजितास्तद्गतकार्यसिद्धिं, कुर्वन्ति यद्वच्च तथाऽधिपार्चा ४१७

ये कार्मणाकर्षणवेदिनस्तथा, नाम्नैव येषां मदनादिपुत्रके ।
निर्जीवके तं विधिमाचरन्त्यहो, यस्मात्सजीवानपि मूर्च्छयन्ति तान्

एवं जिनेशप्रतिमामजीवां, तन्नामग्राहं स्तवनां विधाय ।
समर्चयद्भिः कुशलैः सपर्यां, सम्प्रापितो ज्ञानमयः प्रभुः स्यात् ४१९

तथा नियोज्यानपि कांश्चिदात्मनो, मूर्तिं प्रभुर्मानयतोऽवसाय ।
तुष्यत्यसौ तेषु तथैवमीशो-ऽर्चितो भवेत्तत्प्रतिमार्चनात्स्यात्॥ ४२० ॥

सत्यं बुधैतत्परमत्र यस्मा-द्विशेष एषोऽभिनिरीक्ष्यते महान् ।
देवा यदेते किल सन्ति रागिणः, पूजार्थिनो नो भगवान्स ईदृशः४२१

तदा त्वतीवाऽस्तु वरं यतः स्या-दनीहसेवा परमार्थसिद्धयै ।
यथाहि सिद्धस्य च कस्यचिद्वा, स्पृहावतः सेवनमिष्टलब्धये॥ ४२२ ॥

सिद्धस्तु साधो ! वरिवर्ति साक्षा-दैशी त्वजीवा प्रतिमा प्रतिष्ठिता ।
नाऽयं विचारः परिपूजनीये, द्रव्ये यतः पूज्यत एव पूज्यः॥ ४२३ ॥

यद्दक्षिणावर्तककामकुम्भ-चिन्तामणिचित्रकवल्लिमुख्याः ।
कानीन्द्रियाणीह वहन्ति यत्ते-ऽर्चिताः प्रकुर्वन्ति मतं जनानाम्४२४

वस्तुस्वभावाद्यदमी अजीवाः, स्वतोऽस्पृहावन्त इहाऽङ्गिकामान् ।
यच्छन्ति यद्वत् खलु पारमेशी, पुण्यस्य सिद्धयै प्रतिमाऽर्चिता तथा

सत्यं मुने ! ऽदोऽस्ति परं य एते, स्युर्दक्षिणावर्त्तमुखाः पदार्थाः ।
अजीववन्तोऽपि विशिष्टजाति-भेदात्तथादुर्लभवस्तुभावात्॥ ४२६ ॥

आराधिता अङ्गिमतं दिशन्ति, नैतादृगर्चा किल पारमेश्वरी ।
अहो यदेषा सुलभोपलादि-मयी तदा किं सदृशी त्वऽमीभिः ?४२७

अहो ! विचारिन्नविचारितं मा, वदस्त्वमेवं जगतीह पश्य ।
यन्मूलतो वस्तु गुणि प्रतीतं, ततोऽपि यत्पञ्चकृतं गुणाढ्यम् ॥ ४२८ ॥

यथाहि कश्चित्किल राजपुत्रः, प्रायेण वीर्यादिगुणास्पदं स्यात् ।
तं प्रोज्झ्य चेद्दुर्बलवंशसम्भवं, पुण्याच्च राज्ये विनिवेशयन्ति॥ ४२९ ॥

प्रामाणिकाः पञ्च यदा तदा त्वयं, राजन्यकं मौलमपि प्रशास्ति ।
यदा तदुक्तं न करोति कश्चित्स शास्यते नन्दवदेव तेन ॥ ४३० ॥

विचार्यते चेन्मनसा मनुष्यै-र्मौलो गुणी राजसुतः स योग्यः।
परन्तु यः क्षुद्रकुलोऽपि राजा, स एव सेव्यः खलु पञ्चपूजितः ४३१

एवं हि चिन्तामणिमुख्यमेतद्, वस्तु प्रधानं निजकस्वभावात्।
ततोऽपि मान्यं भुवि पारमेश्वरं, बिम्बं यतः पञ्चभिरत्र पूजितम्॥ ४३२॥

लोके यदेवादृतमस्ति पञ्चभिः, तदेव मान्यं क्षितिपैरपि ध्रुवम्।
यथा विवाहार्थनृपाः महाजना, न्यायाऽङ्गिपुत्रावपरेऽपि चेत्थम्॥ ४३३॥

ये पञ्चभिस्तत्कृतभाग्यनोदा-त्संस्थापिताः सन्ति त एव मान्याः।
तथा स्वपूजाह्वयकर्मवीर्या-त्कृताऽस्ति यैशी प्रतिमा सकाऽर्च्या४३४

प्राज्ञा य एते गदिताः पदार्था-स्ते सर्व आंकारयुक्ता भवन्ति।
अतस्तदीयाकृतिमन्तरात्मनः कृत्वाऽर्चयन्तेऽत्र तदीयबिम्बम्॥ ४३५॥

आकारमुक्तो भगवान्प्रसिद्ध-स्ततस्तदीयं प्रतिबिम्बमेतत्।
कृत्वा कथं पूज्यत एवमत्र, दोषस्त्वतद्वस्तुनि तद्ग्रहो यः॥ ४३६॥

साधूच्यतेऽदस्त्वयका विचारिणा-ऽनाकारिणस्त्वाऽऽकृतिरेव नेष्टा।
इदं तु यद्भागवतं हि बिम्बं, तच्चावताराकृतिक्लृप्तरूपम्॥ ४३७॥

यादृक्तु संसारकृतावतारोऽभून्न्यासि तादृग्भगवान्महद्भिः।
या या ह्यवस्था रुचिता च येभ्यः, साऽहो तदर्थैः परिपूज्यते तैः ४३८

## अष्टादशोऽधिकारः

यद्वाऽस्त्वनाकारवतोऽपि बिम्बं, सिद्धस्य शुद्धं भगवत्सुनाम्नः।
तत्तत्स्वचित्ताशयचिन्तिताशां, साक्षादिवेदं वितरत्वशङ्कम्॥ ४३९॥

यत्स्थापना सा स्वकचित्तकल्प्या, सतोऽसतो वास्त्विह वस्तुनः सा।
सर्वाऽपि यादृग्निजभावसेविता, तादृक्फलं यच्छति नाऽत्र संशयः४४०

लोकेऽप्यनाकारमयस्य वस्तुनः, आकारभावः परिदृश्यते यथा।
आज्ञास्त्यसौ भागवतीति वाचं-वाचं तु लेखाक्रियते मनुष्यैः॥ ४४१॥

तां लङ्घते यः स तदा न साधु-र्नोल्लङ्घते सैष जनेषु साधुः ।
आम्नायशास्त्रेषु मरुद्यवोः स्यात्, तथाऽऽकृतिर्मण्डलतो विलेख्या
स्वरोदयस्याऽथ विचारशास्त्रे, तत्त्वानि पञ्चाऽपि च साकृतीनि ।
अनाकृतं वस्त्विति साकृतं यथा, स्यादित्थमाकार इहाऽप्यनाकृतेः
पुनर्बुधेक्षस्व यतीह सन्ति, लोकेषु लोकाः किल लब्धवर्णाः ।
सर्वैश्च तैराकृतिवर्जिता अपि, वर्णाः प्रक्लृप्ताः स्वकनामसात्कृताः
यद्याकृतिः स्यान्नियताक्षराणां, तदा समेषां सदृगाकृतिः स्यात् ।
सा नास्त्यतो भिन्नकभिन्निकैव, वर्णाकृतिः काऽपि न तत्र तुल्या ४४५
यावन्ति राष्ट्राणि च सन्ति विश्वे, वर्णाकृतिस्तेष्वपरापरैव ।
तद्व्यक्तिकाले तु समोपदेश-स्तैः कार्यमप्यत्र विधीयते समम्४४६
पुनश्च पश्य त्वमिमाः समा लिपी-र्मिथ्या विधातुं न हि कोऽपि शक्तः।
या येषु सिद्धाः किल तैश्च ताभि-र्नैर्लिपिभिः प्रविधीयते फलम्
लिप्यो विभिन्ना इह यद्यपीमा, व्यक्तिः समैवाऽस्ति तु पाठकाले ।
नृणां तथा कार्यकृतिः समस्ता, ताभिःसमाना भवतीत्यवेहि।। ४४८ ॥
घनं किमाकारविवर्जिताना-मिहाक्षराणामियमाकृतिः कृता ।
अस्या अपि स्थापनमन्यदन्यत्, कृतं बुधैः स्वस्वसुगुप्तवेदने।। ४४९ ॥
पुनश्च रागा अपि शाब्दरूप्या-दाकारमुक्ताश्च तथाऽपि तद्बुधैः ।
ते रागमालाह्वयपुस्तकेषु, न्यस्ताः किलाकारभृतः समस्ताः।। ४५० ॥
एवं त्वनाकारवतोऽप्यधीशितु-राकार एष प्रविकल्प्य सद्भिः ।
यं यं वशं साधु समिष्य पूज्यते, सर्वोऽप्ययं तेषु फलत्यवश्यम्४५१
यद्वा हि पूजा परमेश्वरेऽत्रा-लिप्तेऽथ निन्दा न लगेत्समाऽपि ।
ते यादृशे तत्र कृते तु तादृशे, अभ्येत आत्मानमिमं स्वकीयम्।। ४५२ ॥
कुड्ये यथा वज्रमये नरेण, क्षिप्ता मणिर्वा दृषदप्यथापरा ।
ते द्वे अपि क्षेपकमभ्युपेते, न जातु यातस्तमतीत्य कुत्रचित्।। ४५३ ॥

कश्चिद्रवेः सम्मुखमात्मना रजो-ऽथवा सिताभ्रं क्षिपति क्षमास्थः ।
तत्सर्वमस्यैव समेति सम्मुखं, न याति सूर्यं च तथोच्चखं प्रति ४५४

यद्वा पुनः कश्चन सार्वभौमं, संस्तौति तस्यैव फलाय स स्यात् ।
निन्देदथेशं यदि कश्चिदङ्गी, स्यात्सैव दुःखी जनतासमक्षम्॥ ४५५ ॥

स्तुतेऽधिकं स्यान्नहि सार्वभौमे, विनिन्दितेऽस्मिंस्तु न किञ्चिदूनम् ।
नैवं प्रभौ पूजननिन्दनाभ्या-माधिक्यहानी स्त इमे तु कर्त्तुः॥ ४५६ ॥

यद्वा पुनः कश्चिदपथ्यपथ्या-हारीह दुःखं च सुखं च भुङ्क्ते ।
न स्तस्तु ते आहृतवस्तुनो यद्, एवं च सिद्धार्चनमात्मगामि॥ ४५७ ॥

## एकोनविंशोऽधिकारः

साधो ! वरं प्रोक्तमिदं परं यथा, चिन्तामणिमुख्यमिहार्चकानाम् ।
सद्यः फलत्येव तथाऽत्र पार-मेशी फलेन्नो प्रतिमाऽर्चिताऽसौ॥ ४५८ ॥

सत्यं त्वदुक्तं परमत्र साधो !, संस्थाप्य चेतः स्थिरमित्यवेहि ।
यद्वस्तुनो योऽस्ति फलस्य काल-स्तत्रैव तद्वस्तु फलत्यशङ्कम्

यथाहि गर्भो नवभिस्तु मासैः, पूर्णैर्लभेत् सूतिमिहैव नार्वाक् ।
तथा पुनः काश्चनमन्त्रविद्याः, लक्षेण कोट्याथ फलन्ति जापैः॥ ४५९ ॥

वनस्पतिर्वा समये स्वकीये, सर्वः फलत्येष न चाऽऽत्मशैघ्र्यात् ।
सेवाऽपि राजत्रिदशेश्वरादि-सम्बन्धिनी वा फलतीह काले॥ ४६० ॥

संसाध्यमानोऽत्र रसोऽपि काले, सिद्धः फलायाऽस्ति न साध्यमानः ।
तथाऽन्यदेशव्यवहारकर्म, तत्कालपूर्तौ फलति प्रकामम् ॥ ४६१ ॥

तथैव पूजादिकमत्र पुण्यं, काले स्व एवाऽस्ति भवान्तराख्ये ।
फलप्रदायीति ततो न दक्षै-रौत्सुक्यमेष्यं फलदे पदार्थे ॥ ४६२ ॥

पुनर्बुधाऽवस्य हृदि स्वकीये, पूर्वे प्रणीता य इमे पदार्थाः ।
ते चैहिका ऐहिकदायिनस्तत्, फलन्त्यथाऽत्रैव यतोऽग्रतो न॥ ४६३ ॥

मनुष्यसम्बन्धिभवस्य तुच्छ-कालीनभावादिति तुच्छमेभ्यः ।
प्राप्यं फलं तेन मनुष्यजन्म-न्यैवाऽत्र नैभ्योऽस्ति फलं परत्र ॥ ४६४ ॥

इदं सुहृत् ! पुण्यभवं फलं तु, महत्ततः स्याद् बहुकालभुक्त्यै ।
प्रभूतकालस्तु विना भवान्तरं, देवादिसम्बन्धि न वर्तते यतः ॥ ४६५ ॥

तत्पुण्यलभ्यं फलमेतदस्ति, प्रायोऽन्यजन्मान्तरयातजन्तोः ।
यद्यत्र जन्मन्युपयाति पुण्य-फलं तदा मङ्क्षु विनाशमेव॥ ४६६ ॥

यतो मनुष्यायुरतीव तुच्छं, मानुष्यकं देहमिदं शरारु ।
तद् भुज्यमानं मरणान्तरागमात्, सन्त्रुट्यतीदं पृथुपुण्यजं फलम्४६७

सुखान्तरा दुःखभवो महीयो-दुःखाय यत्स्यादतिभीतिदा मृतिः ।
सा पुण्यजेऽस्मिन्सति नैव युक्ता, तदन्यजन्मे फलमेतदेति भोः४६८

अनेकधोत्पन्नमनेकशो यथो-पभुज्यमानं बहुकालमात्रम् ।
न क्षीयते पुण्यफलं तदेतत्, प्रायोऽन्यजन्मन्युदयं समेति॥ ४६९ ॥

तथा च यत् किञ्चिदुदग्रपुण्यं, साक्षादिहैवाऽर्पयति फलानि ।
यथाहि दिव्ये परिशुद्ध्यति 'क्षणाद्, यः कश्चिदत्राऽस्ति जनेषु सूनृती

शुद्धाय सिद्धाय च साधवे तथा-ऽण्वपि प्रदत्तं सकलार्थसिद्ध्यै ।
स्यादैहिकामुष्मिकसर्वसौख्य-निबन्धनं बन्धनहृद् भवस्य॥ ४७१ ॥

जनेऽपि कस्मैचिदनुत्तराय, क्षत्रादये स्तोकमपि प्रदत्तम् ।
वारे क्व चित्केनचिदेकवेलं, तस्येष्टसिद्ध्यै भवतीह नूनम् ॥ ४७२ ॥

यावत्त्वयं जीवति तावदस्य, स राजपुत्रः सकलार्थकारी ।
घनं हि किं दुष्टविपक्षजाता-न्मृत्यन्तकष्टादपि पात्यशङ्कम्॥ ४७३ ॥

एवं हि कुत्राऽवसरे किलैक-वारं महत्पुण्यमुपार्जितं यैः ।
तेषां तदत्राऽपि परत्र लोके, सत्सौख्यसन्तानविधानहेतुः ॥ ४७४ ॥

पुनस्त्वतीवोग्रतमं यदत्र, पुण्यं च पापं समुपार्जि पुंसा ।
अनेकपुंसामपि भुक्तये त-च्छालेरिव स्त्रैणयुजश्च चोरवत्॥ ४७५ ॥

यथैकक: कश्चन राजसेवां, कृत्वा सुखी स्यात्परिवारयुक्तः ।
एकस्तथा कोऽपि नृपाऽपराधी, निहन्यतेऽसौ सपरिच्छदोऽपि॥ ४७६ ॥

यद्येवमर्चादिकपुण्यमेतत्, सर्वात्मना स्वार्थकरं निरुक्तम् ।
तदैतदेवाद्रियतां जनौघः, किं नामजापे विहिता प्रवृत्तिः ॥ ४७७ ॥

साधूच्यते साधुजन ! त्वयेदं, परं विवेकोऽत्र कृतो महद्भिः ।
इमे गृहस्थाः खलु ये समर्था-स्ते द्रव्यभावाऽर्चनकाधिकारिणः ४७८

ये योगिनो द्रव्यपरिग्रहेण, विना विभान्तीह भवे महान्तः ।
तेषां त्वधीशस्मृतिरेव युक्ता, तयैव तत्स्वार्थकृतिः समस्ता॥ ४७९ ॥

यथा विषं गारुडहंसजाङ्गुली-मन्त्रस्य जापाच्छ्रवणाच्च देहिनाम् ।
मूर्च्छावतां तत्त्वमजानतामपि, विनश्यतीत्थं भगवत्स्मृतेरघम्॥ ४८० ॥

तथाऽस्थिभक्षीति हुमायपक्षी, प्रसिद्धिमान्सन्ततजीवरक्षी ।
उड्डीयमानस्य यदस्य छाया, यन्मूर्द्धगा सोऽत्र भवेन्नरेन्द्रः ॥ ४८१ ॥

नाऽयं खगो वेत्ति यदस्य शीर्षे, छायां करोमीति तथेतरोऽपि ।
जानाति नैवं मम मस्तकेऽसौ, छायां करोतीति मतं द्वयोर्न ॥ ४८२ ॥

तथाऽपि तच्छायमहात्मतोदया-दधीशतोदेति दरिद्रतापहा ।
अजानतोरप्यथ सिद्धिरेवं, कथं स्मृतेर्याति न पापमीशितुः ॥ ४८३ ॥

अस्मिन्गते सर्वत आत्मशुद्धिः, सत्याममुष्यां परमात्मबोधः ।
जातेऽत्र नो कश्चन कर्मबन्धः, कर्मप्रणाशे किल मोक्षलक्ष्मीः॥ ४८४ ॥

अस्यां हि सत्यां स्थितिरक्षया स्याद्, अनन्तविज्ञानमनन्तदृष्टिः ।
एकस्वभावत्वमनन्तवीर्यं, जागर्त्ति सज्ज्योतिरनन्तसौख्यम् ॥ ४८५ ॥

## विंशतितमोऽधिकारः

हे स्वामिनः ! यूयमिति प्रवक्थ, यदात्मबोधान्न विनाऽस्ति मुक्तिः ।
तर्हीतरेऽन्यान्कथमाहुरस्या, हेतूंस्तदुक्तिर्न समा तथाहि ? ॥ ४८६ ॥

ये वैष्णवाः केचन विष्णुवादिनो, विष्णोः सकाशान्निगदन्ति मुक्तिम् ।
ये ब्रह्मनिष्ठाः किल ब्रह्मणस्तां, शैवाः शिवाच्छक्तिकृतां तु शाक्ताः

तेषां न चात्मावगमो निदानं, मुक्तेस्तदा नास्त्यथ निर्णयोऽयम् ।
यदात्मबोधाज्जनितैव मुक्ति-स्ततः किमेवं क्रियते विनिश्चयः॥ ४८८ ॥

सत्यं यदेते किल लोकरूढि-रूढास्तु विष्ण्वादिकभिन्नवीक्षिणः ।
परन्तु तत्त्वार्थत एष आत्मै-वार्थोऽभिवाच्यो ननु विष्णुमुख्यैः॥ ४८९ ॥

कथं हि वेवेष्ट्यथ विष्णुरात्मा, व्याप्तेरथ ब्रह्म तथैष आत्मा ।
शिवोऽपि चात्मा शिवहेतुतः स्या-च्छक्तिस्तथाऽऽत्मश्रितवीर्यमेतत्

इत्थं हि सर्वैरपि विष्णुमुख्यैः, शब्दैरसावात्मक एव बोध्यः ।
ततस्त्वतो मुक्तिरियं न कस्मात्, प्राप्येति तत्त्वं हृदि तैरपीक्ष्यम् ४९१

चेन्नेति विष्णुप्रमुखेभ्य एभ्यः, मुक्तिस्तदा वैष्णवमुख्यलोकाः ।
सन्तो गृहस्था इह विष्णुमुख्यान्, एवाऽर्चयन्तः परितो जपन्तु॥ ४९२ ॥

परं तपः संयमयुक्तता क्षमा, निःसङ्गता रागरुषापनोदौ ।
पञ्चेन्द्रियाणां विषयाद्विरागो, ध्यानात्मबोधादि विधीयते कथं ?४९३

एषैव सेवा ननु विष्णुब्रह्मा-दीनां तदेयं कुत आश्रिताऽस्ति ? ।
भोस्तेभ्य एवेति तदा न तेषाम्, वागस्ति हस्तोऽपि यतोऽन्यबोधः

तद्ध्यायियोगिभ्य इयं प्रवृत्ति-स्तत्तैः कुतोऽसौ निगदोपलब्धा ? ।
अध्यात्मयोगादिति चेत्तदानीं, तस्य प्रणेताऽभवदत्र को भोः ?४९५

निरञ्जनैर्निष्क्रियकैर्न चाऽयं, वक्तुं हि योग्यः खलु विष्णुमुख्यैः ।
सोऽध्यात्मयोगः कुत आविरासीत्, चेदादियोगिभ्य इति प्रवादः ४९६

तैरप्यसावात्मभवावबोधा-दध्यात्मयोगोऽवगतो न चाऽन्यतः ।
अनिन्द्रियान्निष्क्रियकान्निरञ्जना-न्नित्यैकरूपान्न तु विष्णुमुख्यात्४९७

स्वादात्मनो योऽवगमो बभूव, भावात्समाख्याद् गतरागरोषात् ।
अपूर्वलाभान्निखिलार्थदृष्टे-रध्यात्मयोगः स्वत एव सिद्धः॥ ४९८ ॥

एवं हि यश्चाऽऽत्मभवात्मबोध-स्तस्मान्नृणां जायत एव मुक्तिः ।
अस्या न हेतुस्त्वपरोऽस्ति विष्णु-मुख्यस्तदात्माऽवगमस्पृहैष्या ४९९

ये तु स्वभावान्निगदन्ति मुक्तिं, तत्राऽप्यसावेव निवेदितोऽर्थः ।
स्वस्याऽऽत्मनो भाव इहासिरुक्ता, तदात्मलाभान्ननु सिद्धिलक्ष्मीः ५००

एवं समस्तैरपि मुक्तिमिच्छुभि-र्मुक्तिः समेष्या नियतात्मबोधात् ।
अस्या निमित्तं न हि किञ्चिदस्मा-दन्यन्न्यगादि प्रगुणैर्यदुच्यते ५०१

यावत्कषायान्विषयान्निषेवते, संसार एवैष निगद्य आत्मा ।
एतद्विमुक्तोऽजनि यावदात्मा-वबोधयुग्मोक्ष इतीहितोऽयम्॥ ५०२ ॥

ज्ञानं तथा दर्शनकं चरित्र-मात्मैष वाच्यो न हि किञ्चिदस्मात् ।
भिन्नं यदेतन्मय एव देह-मेष श्रितस्तिष्ठति कर्मनिष्ठः ॥ ५०३ ॥

आत्मानमात्मैष यदाऽभिवेत्ति, मोहक्षयादात्मनि चात्मशक्त्या ।
तदेव तस्योदितमात्मविद्धि-र्ज्ञानं च दृष्टिश्चरणं तथाप्तैः ॥ ५०४ ॥

आत्मावबोधेन निवार्यमात्मा-ऽज्ञानोद्भवं दुःखमनन्तकालिकम् ।
अनेककष्टाचरणैरपीदं, विनाऽऽत्मबोधादनिवार्यमस्ति यत्॥ ५०५ ॥

चिद्रूप आत्मायमधिष्ठितस्तनुं, कर्माऽनुभावादसकौ शरीरी ।
ध्यानाग्निनिर्दग्धसमस्तकर्मा, स्याच्छुद्ध आत्मा तु तदा निरञ्जनः५०६

इतीयता सिद्धमिदं विदन्तो ! यदात्मबोधान्न परोऽस्ति सिद्धये ।
हेतुस्ततोऽत्रैव यतध्वमध्वनि, येनाऽऽत्मनः स्थानमहो महोदये ५०७

मुनीश ! साधूदित एष मुक्ते-र्मार्गो जिनेन्द्रागमयुक्तिसिद्धः ।
उत्सर्गनोत्सर्गहठाभिमुक्तः, श्रेयःश्रिये केवलराजयोगात् ॥ ५०८ ॥

परं हि यः सर्वमतानुयायी, मार्गोऽस्ति मुक्तेर्द्रुतमात्मदृष्ट्यै ।
अध्यात्मविद्याधिगमैकहेतुः, स मे निवेद्यः सरलः श्रमं विना॥ ५०९ ॥

अहो ! त्वदीया खलु सूक्ष्मदृष्टि-र्यन्मङ्क्षु मुक्त्यर्थमयं विचारः ।
चित्ते समुत्पन्न इयानिदानीं, मन्ये तदा तेऽत्र मनोऽस्ति मुक्त्यै॥ ५१० ॥

आकर्णय त्वं मयका निगद्य-मानं मुने ! मुक्तिपथं समर्थम् ।
सिद्धान्तवेदान्तरहस्यभूतं, गुरूपदेशादधिगम्य किञ्चित् ॥ ५११ ॥

मुक्तिं समिच्छुर्मनुजः पुरस्तात्, करोतु चित्ते स विचारमेवम् ।
आत्माह्ययं योगिभिरेष शुद्धो, बुद्धश्च मुक्तश्च निरञ्जनश्च ॥ ५१२ ॥

इत्युच्यते तर्हि तु केन बद्धो, मुक्तस्त्वयं बद्ध्यत एष कस्मात् ।
ज्ञातं भ्रमेणेति यमूचुराद्याः, कर्मेति मोहेति भ्रमेत्यविद्या ॥ ५१३ ॥

कर्त्तेति मायेति गुणेति दैवं, मिथ्येति चाऽज्ञानमितीतिशब्दैः ।
सद्योगिनोऽमून्निगदन्ति तज्ज्ञा, भ्रमं ह्यनेनैव निबद्ध आत्मा ॥ ५१४ ॥

भ्रमोऽत्र मिथ्यानिजकल्पनोत्थितो, येनैव बद्धो नलिनीशुको यथा ।
बद्धः पुनर्मर्कटकोऽपि तद्वत्, तथैष आत्मा भ्रमतो निबद्धः॥ ५१५ ॥

भ्रमे तु मुक्ते मनसः सकाशा-दात्मैष मुक्तो भवतीति सिद्धम् ।
अस्मिंस्तु मुक्ते हि भवेदभेद-स्तदात्मनः श्रीपरमात्मनश्च ॥ ५१६ ॥

यदानयोर्वीक्षत एकभावं, योगी तदात्मावगमी निगद्यते ।
स केवलज्ञानमयो मुनीश्वरः, क्रर्मक्रियाभ्रान्तिविमुक्त उक्तः॥ ५१७ ॥

यदा त्वयं मुक्त इति प्रसिद्ध-स्तदा हि सर्वत्र ममत्वमुक्तः ।
घनं हि किं सैष मनःशरीर-सुखासुखज्ञानविमर्शशून्यः ॥ ५१८ ॥

न पुण्यपापे भवतोऽस्य मुक्तितो, मम क्रियेयं मम चैष कालः ।
सङ्गी ममाऽयं सुकृतं ममेद-मित्याद्यभिद्वान्मनसो विनिर्जयात् ५१९

स तावतेहाऽस्ति शरीरधारी, सूक्ष्मक्रियातोऽपि न निष्क्रियो यत् ।
यावद्यदा सूक्ष्मक्रियाऽपि नष्टा, मुक्तस्तदा सिद्ध्यति सिद्धतासेः ५२०

विद्वन् ! विमर्शः क्रियतामयं क्रिया-वन्तोऽथवा निष्क्रियकाश्च सिद्धाः ।
चेन्निष्क्रिया ज्ञानजदर्शनोत्थ-क्रियाऽक्रियेष्वेषु कथं न सिध्येत् ?५२१

सत्यं मुने ! ज्ञानजदर्शनोद्भवा, सैषा क्रिया सिद्धिगतेषु नास्ति ।
कथं यतः सैषु यदा तु लोके, कैवल्यलब्धिः समभूत्तदानीम्॥ ५२२ ॥

क्रिये इमे द्वे युगपत्समास्तां, ये ज्ञेयदृश्ये इह ते अभूताम् ।
ततो नृजातौ किल सक्रियत्व-मभूत्तु सिद्धौ खलु निष्क्रियत्वम्५२३

एवं तु निष्क्रियता प्रसिद्धा, सिद्धेषु सिद्धाऽस्त्यवधारणेन ।
सर्वस्य चैतस्य मनोनिरोधो, हेतुस्ततोऽत्रैव रमध्वमध्वनि ॥ ५२४ ॥

## एकविंशतितमोऽधिकारः

अमुं विचारं मुनयः पुरातना, ग्रन्थेषु जग्रन्थुरतीव विस्तृतम् ।
परं न तत्र द्रुतमल्पमेधसा-मैदंयुगीनानां मतिः प्रसारिणी ॥ ५२५ ॥

मया परप्रेरणपारवश्या-दजानतापीति विधृत्य धृष्टताम् ।
प्रश्ना व्यतायन्त कियन्त एते, परेण पृष्टाः पठितोत्तरोत्तराः॥ ५२६ ॥

शैवेन केनाऽपि च जीवकर्मणी, आश्रित्य पृच्छाः प्रसभादिमाः कृताः ।
मा भूज्जिनाधीशमतावहेले-त्यवेत्य मङ्क्षूत्तरितं मयैवम्॥ ५२७ ॥

यथा यथा तेन हृदुत्थतर्क-माश्रित्य पृच्छाः सहसाऽक्रियन्त ।
तथा तदुक्तं पुरतो निधाय, मया व्यतार्युत्तरमार्हतेन ॥ ५२८ ॥

मया त्विदं केवललौकिकोक्ति-प्रसिद्धमाधीयत पृष्टशासनम् ।
पुराणशास्त्राहितबुद्धयस्तु, पुरातनीं युक्तिमिहाद्रियन्ताम् ॥ ५२९ ॥

परं विचारेऽत्र न गोचरो मे, प्रायेण मुह्यन्ति मनीषिणोऽपि ।
अमुं विना केवलिनं न वक्तुं, व्यक्तोऽपि शक्तः सकलश्रुतेक्षी५३०

अतस्तु वैयात्यमिदं मदीय-मुदीक्ष्य दक्षैर्न हसो विधेयः ।
बालोऽपि पृष्टो निगदेत्प्रमाणं, वार्धेर्भुजाभ्याम् स्वधिया न किं वा५३१

यद्वेदमेवाल्पधियां समस्तु, शास्त्रं यतः शासनमस्त्यथास्मात् ।
यदुक्तिप्रत्युक्तिनिर्युक्तियुक्तं, तद्वाभियुक्ताः प्रणयन्ति शास्त्रम् ५३२

यद्वास्ति पूर्वेष्वखिलोऽपि वर्णा-नुयोग एतन्न्यगदन्विदांवराः ।
इयं तदा वर्णपरम्पराऽपि, तत्राऽस्ति तच्छास्त्रमिदं भवत्वपि॥ ५३३ ॥

आनन्दनायास्तिकनास्तिकानां, ममोद्यमोऽयं सफलोऽस्तु सर्वः ।
आद्येषु चाऽऽस्तिक्यगुणप्रसारणा-दन्त्येषु नास्तिक्यगुणापसारणात् ५३४

चिरं विचारं परिचिन्वताऽमुं, यन्न्यूनमन्यूनमवादि वादतः ।
कदाग्रहाद्वा भ्रमसम्भ्रमाभ्याम्, तन्मे मृषा दुष्कृतमस्तु वस्तुतः ५३५

मया जिनाधीशवचस्सु तन्वता, श्रद्धानमेवं य उपार्जि सज्जनाः ! ।
धर्मस्तदेतेन निरस्तकर्मा, निर्मातशर्माऽस्तु जनः समस्तः ॥ ५३६ ॥

वरतरखरतरगणधरयुगवर-जिनराजसूरिसाम्राज्ये ।
तत्पट्टाचार्यश्रीजिन-सागरसूरिषु महत्सु ॥ ५३७ ॥

अमरसरसि वरनगरे, श्रीशीतलनाथलब्धिसान्निध्यात् ।
ग्रन्थोऽग्रन्थि समर्थः, सुविदेऽयं सूरचन्द्रेण ॥ ५३८ ॥

श्रीमत्खरतरवरगण-सूरगिरिसुरशाखिसन्निभः समभूत् ।
जिनभद्रसूरिराजो-ऽसमः प्रकाण्डोऽभवत्तत्र ॥ ५३९ ॥

श्रीमेरुसुन्दरगुरुः, पाठकमुख्यस्ततो बभूवाऽथ ।
तत्र महीयःशाखा-प्रायः श्रीक्षान्तिमन्दिरकः ॥ ५४० ॥

तार्किकऋषभा अभवन्, हर्षप्रियपाठकाः प्रतिलताभाः ।
तस्यां समभूवन्निह, सुरभिततरुमञ्जरीतुल्याः ॥ ५४१ ॥

चारित्रोदयवाचक-नामानस्तेष्वभुः फलसमानाः ।
श्रीवीरकलशसुगुरवो, गीतार्थाः परमसंविग्नाः ॥ ५४२ ॥

तेभ्यो वयं भवामो, बीजाभास्तत्र सूरचन्द्रोऽहम् ।
गणिपद्मवल्लभपटु-र्द्वितीयीको गुरुभ्राता ॥ ५४३ ॥

अस्मत्तु हीरसार-प्रमुखा अङ्कुरकरणयः सन्ति ।
तेऽपि फलन्तु फलौघैः, सुशिष्य-रूपैः प्रमापटुभिः ॥ ५४४ ॥

तेनासुको वाचकसूरचन्द्र-नाम्ना रसज्ञाफलमित्थमिच्छता ।
ग्रन्थोऽभितोऽग्रन्थि मया स्वकीया-न्यदीयचेतःस्थिरतोपसम्पदे५४५

एवं यथाशेमुषि जैनतत्त्व-सारो मयाऽस्मारि मनःप्रसत्त्यै ।
उत्सूत्रमासूत्रितमत्र किञ्चिद्, यत्तद्विशोध्यं सुविशुद्धधीभिः॥ ५४६ ॥

वर्षे नन्दतुरङ्गचन्द्रिकलामानेऽश्वयुक्पूर्णिमा,
ज्ञे योगे विजयेऽहमेतममलं पूर्णं व्यधामादरात् ।
ग्रन्थं वाचकसूरचन्द्रविबुधः प्रश्नोत्तरालङ्कृतम्,
साहाय्याद्वरपद्मवल्लभगणेरर्हत्प्रसादश्रियै ॥ ५४७ ॥

श्रीविनयविजयोपाध्यायविरचिता

# ॥ नयकर्णिका ॥

वर्धमानं स्तुमः सर्वनयनद्यर्णवागमम् ।
संक्षेपतस्तदुन्नीतनयभेदानुवादतः ॥ १ ॥

नैगमः संग्रहश्चैव व्यवहारर्ज्जुसूत्रकौ ।
शब्दः समभिरूढैवम्भूतौ चेति नयाः स्मृताः ॥ २ ॥

अर्थाः सर्वेऽपि च सामान्यविशेषोभयात्मकाः ।
सामान्यं तत्र जात्यादि विशेषाश्च विभेदकाः ॥ ३ ॥

ऐक्यबुद्धिर्घटशते भवेत्सामान्यधर्मतः ।
विशेषाच्च निजं निजं लक्षयन्ति घटं जनाः ॥ ४ ॥

नैगमो मन्यते वस्तु तदेतदुभयात्मकम् ।
निर्विशेषं न सामान्यं विशेषोऽपि न तद्विना ॥ ५ ॥

संग्रहो मन्यते वस्तु सामान्यात्मकमेव हि ।
सामान्यव्यतिरिक्तोऽस्ति न विशेषः खपुष्पवत् ॥ ६ ॥

विना वनस्पतिं कोऽपि निम्बाम्रादिर्न दृश्यते ।
हस्ताद्यन्तर्भाविन्यो हि नाङ्गुलाद्यास्ततः पृथक् ॥ ७ ॥

विशेषात्मकमेवार्थं व्यवहारश्च मन्यते ।
विशेषभिन्नं सामान्यमसत्खरविषाणवत् ॥ ८ ॥

वनस्पतिं गृहाणेति प्रोक्ते गृह्णाति कोऽपि किम् ।
विना विशेषान्नाम्रादींस्तन्निरर्थकमेव तत् ॥ ९ ॥

व्रणपिण्डीपादलेपादिके लोकप्रयोजने ।
उपयोगो विशेषैः स्यात्सामान्ये न हि कर्हिचित् ॥ १० ॥

ऋजुसूत्रनयो वस्तु नातीतं नाप्यनागतम् ।
मन्यते केवलं किन्तु वर्तमानं तथा निजम् ॥ ११ ॥

अतीतेनानागतेन परकीयेन वस्तुना ।
न कार्यसिद्धिरित्येतदसद्गगनपद्मवत् ॥ १२ ॥

नामादिषु चतुर्ष्वेषु भावमेव च मन्यते ।
न नामस्थापनाद्रव्याण्येवमग्रेतना अपि ॥ १३ ॥

अर्थं शब्दनयोऽनेकैः पर्यायैरेकमेव च ।
मन्यते कुम्भकलशघटाद्येकार्थवाचकाः ॥ १४ ॥

ब्रूते समभिरूढोऽर्थं भिन्नं पर्यायभेदतः ।
भिन्नार्थः कुम्भकलशघटा घटपटादिवत् ॥ १५ ॥

यदि पर्यायभेदेऽपि न भेदो वस्तुनो भवेत् ।
भिन्नपर्याययोर्न स्यात् स कुम्भपटयोरपि ॥ १६ ॥

एकपर्यायाभिधेयमपि वस्तु च मन्यते ।
कार्यम् स्वकीयं कुर्वाणमेवंभूतनयो ध्रुवम् ॥ १७ ॥

यदि कार्यमकुर्वाणोऽपीष्यते तत्तया स चेत् ।
तदा पटेऽपि न घटव्यपदेशः किमिष्यते ॥ १८ ॥

यथोत्तरं विशुद्धाः स्युर्नयाः सप्ताप्यमी तथा ।
एकैकः स्याच्छतं भेदास्ततः सप्तशतान्यमी ॥ १९ ॥

अथैवंभूतसमभिरूढयोः शब्द एव चेत् ।
अन्तर्भावस्तदा पञ्च नयपञ्चशतीभिदः ॥ २० ॥

द्रव्यास्तिकपर्यायास्तिकयोरन्तर्भवन्त्यमी ।
आदावादिचतुष्टयमन्त्ये चान्त्याऽस्त्रयस्ततः ॥ २१ ॥

सर्वे नया अपि विरोधभृतो मिथस्ते, सम्भूय साधुसमयं भगवन् भजन्ते
भूपा इव प्रतिभटा भुवि सार्वभौमपादाम्बुजं प्रधनयुक्तिपराजिता द्राक् ॥ २

इत्थं नयार्थकवचःकुसुमैर्जिनेन्दुर्वीरोऽर्चितः सविनयं विनयाभिधेन ।
श्रीद्वीपबन्दरवरे विजयादिदेवसूरीशितुर्विजयसिंहगुरोश्च तुष्ट्यै ॥ २३ ॥

पू. पण्डितश्रीनयविमलगणिविरचितम्

## ॥ प्रश्नद्वात्रिंशिका ॥

ऐं नमः पार्श्वनाथाय विश्वभावावभासिने ।
यच्छिष्ययुक्तिमाकर्ण्य प्रबुद्धोऽयं प्रदेशिराट् ॥ १ ॥

श्रीमन्मते मदीयोऽभूत् पापात्मा जनको गतः ।
श्वभ्रं पुनरिहागत्य नोक्तवान् तेन संशयः ॥ २ ॥

त्वद्वल्लभारतो जारः क्षिप्तो गुप्तावक् पुनः ।
यामि स्ववर्गमिलने स त्वया किमु मुच्यते ॥ ३ ॥

भवन्मते सवित्री मे धर्मकर्मरता गता ।
स्वर्गे तथापि नागत्य वक्ति द्राक् तेन संशयः ॥ ४ ॥

यथा निषादो राजान-माकारयति मैत्र्यतः ।
परं नायाति तद्गेहे तद्वन्नायान्ति निर्जराः ॥ ५ ॥

एकश्चौरो मया क्षिप्तः कुम्भिकायां मृतस्तथा ।
दृष्टो जीवो न निर्गच्छन् तेनैक्यं जीवदेहयोः ॥ ६ ॥

भूमिवेश्मगतः कोऽपि शङ्खं वादयते यथा।
तच्छब्दः श्रूयते सर्वैः परं छिद्रं न दृश्यते ॥ ७ ॥

संजाताः कृमयश्चौर-शबे तत्रैव भूरिशः।
प्रविश्यमाणा नो दृष्टा स्ततो मे संशयो महान् ॥ ८ ॥

यथाऽयोगोलको वह्नि-रूपः सर्वैरपीक्ष्यते।
पुनः शीतेऽग्निजीवानां छिद्रं न कृमयस्तथा ॥ ९ ॥

दूरं याति शरः क्षिप्तो निकटं चापरस्य च।
कथं तद् घटते स्वामि-न्नस्त्यैक्यं जीवदेहयोः ॥ १० ॥

यथा विहङ्गिकावंशो नव्यो भारं वहेद् गुरुम्।
तथा न प्रतनीभूत-स्तद्वच्छरीरजो गुणः ॥ ११ ॥

तुलारूढः पुनश्चौरो जीवन्नथ मृतोऽपि सः।
लघुगुर्वोर्विशेषो नो दृष्टस्तेनात्र संशयः ॥ १२ ॥

वायुना पूरितश्चर्म-दृती रिक्तीकृतः पुनः।
तुलारूढः समानोऽपि तद्वज्जीवः शरीरगः ॥ १३ ॥

जीवदर्शनबुद्ध्या च खण्डीकृत्य विलोकितः।
एकश्चौरः परं कुत्र जीवदेशो न लक्षितः ॥ १४ ॥

यथारणिगतो वह्नि-र्ज्ञायते न तु लभ्यते।
दृश्यते तदुपायेन तद्वज्जीवः स्वदेहगः ॥ १५ ॥

यथा घटादयः सर्वे पदार्था दृष्टिगोचराः।
तथा प्रत्यक्षलक्ष्यो न जीवस्तेनात्र संशयः ॥ १६ ॥

यथा वायुप्रभावेण प्रकम्पन्ति लतादयः।
प्रत्यक्षेण परं ग्राह्यो नैव तद्वत्प्रदेशिराट् ॥ १७ ॥

कृमिकुन्थुगजादीनां तुल्या जीवा भवन्मते।
तदस्मन्मानसे जीव-संशयः खलु खेलति ॥ १८ ॥

लभेत्तनुमहत्स्थानं प्रकाशं तनुते यथा ।
प्रदीपोऽयं तथा जीवो देहं प्राप्य प्रकाशते ॥ १९ ॥

प्रभो ! कुलक्रमायातं मतं नास्तिकवादकम् ।
मुच्यते कथमुत्तोऽपि छिद्यते किं विषद्रुमः ॥ २० ॥

ताम्ररजतरैरत्नाकरे सत्यपि मूढधीः ।
यथा लोहवणिक् निःस्वो जातस्तद्वत्त्वमप्यसि ॥ २१ ॥

इत्थं नृपः केशिगुरोरिमानि, प्रश्नोत्तराणि प्रतिभापयोधेः ।
त्यक्त्वा मतिं नास्तिकवादमात्म-क्रमागतं निःस्व इवाप्तवित्तः॥ २२ ॥

प्रपाल्य जन्मावधि जैनधर्मं, शुद्धं विधायानशनं च सम्यक् ।
कल्पेऽग्रिमे पल्यचतुष्कजीवी, सूर्याभनामा समभूत्सुरोऽयम्॥ २३ ॥

विज्ञाय तत्रावधिनात्मजम्बू-द्वीपस्थितं वीरजिनं विलोक्य ।
स्वकाभियोगैः सहितः समेत्य, क्ष्मापीठमायोजनमाभिषिच्य ॥ २४ ॥

गन्धाम्बुवर्षं बहुवर्णपुष्प-वृष्टिं च विस्तार्य निजात्मशक्त्या ।
प्रश्नानिमान् सद्बहुमानपूर्व-मपृच्छदन्यूनमुनिसमक्षम् ॥ २५ ॥

सुदृष्टिर्वा कुदृष्टिर्वाऽऽराधको वा विराधकः ।
दुर्बोधो वा सुबोधो वा, चरमोऽचरमस्तथा ॥ २६ ॥

तनुभवो भूरिभवो वेति प्रश्ने जिनोऽब्रवीत् ।
सुदृष्टिश्चरमश्चैक-भवश्चाराधकः पुनः ॥ २७ ॥

सुबोधिस्त्वमिति श्रुत्वा, भक्तिप्राग्भारभासुरः ।
गौतमादिमुनीन्द्राणां, दर्शनार्थं प्रमोदतः ॥ २८ ॥

विस्तार्याऽवामबाहुं शतममरशिशुव्यूहमष्टोत्तरं च
क्लृप्तं दिव्याङ्गनानां शतमपि हि तथाष्टोत्तरं सव्यबाहोः
स्फूर्ज्जत्संगीतवाद्यंततघनशुषिरानद्धतूर्यत्रयोद्य-
न्माङ्गल्यश्रेणिपूर्वं जयजयरवयुक् नृत्यमारब्धवान् यः ॥ २९ ॥

द्वात्रिंशभेदं सदसीह भक्त्या, नृदेवतिर्यङ्मुनिसंभृतायाम् ।
नाट्यं व्यधादामलकल्पनाम्नि, पुरेऽग्रतो वीरजिनेश्वरस्य ॥ ३० ॥

ततश्च्युतः पूर्वमहाविदेहे, लब्धावतारः खलु सेत्स्यतीति ।
गुरोः प्रसाददयोऽपि भव्यः, सदोदयः स्याच्छिवसौख्ययोग्यः॥ ३१ ॥

गच्छेशश्रीविशेषविजयप्रभगुरौ राज्यशोभां दधाने,
क्षेत्रं क्षेत्रज्ञसत्ताप्रकटनपरमोद्दामधान्यव्रजानाम् ।
इत्थं केशिप्रदेशिप्रतिवचनमयं स्तोत्रमेतन्निबद्धं,
राजप्रश्नीयसूत्रात् कविनयविमलेनेदमानन्दकारि ॥ ३२ ॥

पू.मु.श्रीयशस्वत्सागरविरचिता

# ॥ जैनस्याद्वादमुक्तावली ॥

## प्रथमः स्तबकः

प्रणम्य शंखेश्वरपार्श्वनाथं प्रकाशितानन्तपदार्थसार्थं ।
स्वान्यप्रकाशाय तमस्तमार्कः प्रकाश्यते जैनविशेषतर्कः ॥ १ ॥

स्याच्छब्दार्थलसद्रसोद्भवभवा द्रव्यादिभिर्भास्वती
स्वान्यद्रव्यचतुष्टयैक्यकलिता सार्वोक्तिभिः शाश्वती ।
सत्सामान्यविशेषभावललिता स्यात्सप्तभङ्गावली
धार्या सद्भिरियं सुखैककृमिला स्याद्वादमुक्तावली ॥ २ ॥

सत्तर्ककर्कशविचारपदप्रचारै दुर्वादिवादरसनाशनशासनाय ।
अज्ञानसंतमसराशिविनाशनाय स्याद्वादसत्खतिलकाय नमो नमोस्तु

सम्यक्प्रमाणनयतत्त्वसतत्त्वसिद्धिः,
स्यात्सर्वदर्शि समयाध्ययनाभियोगात् ।
तत्रैव वस्तु सकलं समरूपतत्त्व-,
माभासते तदपि मानयुगप्रतीतम् ॥ ४ ॥

सन्त्येव प्राक्तनग्रन्थास्तदुद्बोधप्रबोधकाः ।
गभीरा विस्तृतास्तेषु नाधिकारोऽल्पमेधसाम् ॥ ५ ॥

सुखोपायेन तेषां सन्न्यायशास्त्रार्थकाङ्क्षिणाम् ।
अज्ञानतिमिरोद्भेदद्योतरूपा प्रतन्यते ॥ ६ ॥

चिरन्तनानां विशदोक्तियुक्तेः संक्षेपतो वाप्युपजीव्य तस्याः ।
तल्लक्षणानीह तदीयशब्दैः पर्यायशब्दैःपरिकल्पयामि ॥ ७ ॥

जीवाद्यधिगमोपायौ सत्प्रमाणनयाविमौ ।
विवेक्तव्यौ तथैवान्य-प्रकारासंभवादतः ॥ ८ ॥

जीवादिवस्तुनश्चैवाऽनेकान्तात्मकलक्षणं ।
स्वद्रव्यगुणपर्यायैः स्थित्युत्पादव्ययात्मकैः ॥ ९ ॥

जीवाजीवौ द्वौ पदार्थौ प्रसिद्धौ तत्राऽप्याद्यो द्विप्रभेदप्रभिन्नः ।
अन्त्यस्त्विष्टः पञ्चधा पुद्गलाख्यो धर्माधर्माकाशकालप्रभेदात् ॥ १० ॥

द्रवत्यदुद्रवद्द्रोष्यत्येव त्रैकालिकञ्च यत् ।
तांस्तांस्तथैव पर्यायांस्तद्द्रव्यं जिनशासने ॥ ११ ॥

गुणो द्रव्यगतो धर्मः सहभावित्वलक्षणः ।
पर्येत्युत्पादनाशौ च पर्यायः स उदाहृतः ॥ १२ ॥

द्रव्यं हि सामान्यविशेषरूपं स्वतस्तथाप्रत्ययवेदनेन ।
आद्यं द्विधा स्यादनुवृत्तिहेतुः द्विधा द्वितीयो व्यतिवृत्तिहेतुः ॥ १३ ॥

सामान्यमेतत् किल तिर्यगूर्ध्वता भेदप्रभिन्नं द्विविधं वदन्ति ते ।
व्यक्तौ समानं प्रथमं गवां व्रजे गोत्वं यथाद्रव्यमिदं ततोऽन्यथा१४ ॥

तुल्या सदा परिणतिःप्रथमस्य लक्षणं,
व्यक्तिं प्रतीह गदितं निजजातिवाचकं ।

पूर्वापरात्मनिजपर्यववर्त्तनत्वतः,
द्रव्यं तदेवमपरं मतमूर्ध्वताभिधं ॥ १५ ॥

व्यक्ति विशेषःस्वत एव सद्यो वच्छेदकत्वाद् व्यतिवृत्तिरूपः ।
सोऽपि द्विधा स्याद् गुणपर्यवाभ्यां स्वरूपभेदप्रथितात्मताभ्याम्१६ ॥

द्रव्ये गुणाः सन्ति सदा सहोत्थास्तत्पर्यवास्ते क्रमभाविनःस्युः ।
स्याद् भेदभिन्ना न च धर्म्यपेक्षाकृतोप्यमीषां कथितः प्रभेदः॥१७॥

सर्वं तथान्वयिद्रव्यं नित्यमन्वयदर्शनात् ।
अनित्यमेतत्पर्यायैरुत्पादव्ययसंगतैः ॥ १८ ॥

प्रध्वस्ते कलशे शुशोचतनया मौलौ समुत्पादिते
पुत्रः प्रीतिमवाप कामपि नृपः शिश्राय मध्यस्थताम् ।
पूर्वाकारपरिक्षयस्तदपराकारोदयस्तद्द्वया-,
धारश्चैक इति स्थितं त्रयमतं तथ्यं तथा प्रत्ययात् ॥ १९ ॥

घटमौलिसुवर्णार्थी-नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकं ॥ २० ॥

पयोव्रतो न दध्यत्ति न पयोत्ति दधिव्रतः ।
अगौरसव्रतो नेमे तस्माद्वस्तुत्रयात्मकम् ॥ २१ ॥

उत्पादो न विना व्ययेन न विना ताभ्यां प्रसाध्या स्थितिः,
सन्त्येते हि परस्परं खलु निजैः पर्यायभावाश्रितैः ।
भिन्नास्त्वेकपदार्थगा अपि मिथो भिन्नस्वभावादितः,
सैवेयं त्रिपदी जिनेशगदिता तस्यास्तु वश्यं जगत् ॥ २२ ॥

द्रव्यं पर्यायसंयुक्तं पर्याया द्रव्यसंगताः ।
गुणो द्रव्यगतो धर्मः स्वरूपात्त्रितयं विदुः ॥ २३ ॥

द्रव्यं पर्यायवियुतं, पर्यार्या द्रव्यवर्जिताः ।
क्व कदा केन किंरूपा, दृष्टा मानेन केन वा ॥ २४ ॥

स्वद्रव्यादिचतुष्टयेन परतस्तेनैव तद्धेतुना
भावाभावयुगात्मकस्तु कलशो जातस्तथा प्रत्ययात् ।

इत्थं नैव यदा तदैव कलशः स्तम्भादिरेव स्फुटम्
तस्मान्नात्र विचारणापि सुधिया कार्याविचार्यागमे ॥ २५ ॥

परस्परं यत्र विरुद्धधर्माश्रितस्वभावा गुणिपर्ययेषु ।
न दोषपोषाय विरुद्धधर्माध्यासस्त्वनेकान्तमतानुगानाम् ॥ २६ ॥

सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्व सत्वं स्यात् स्वरूपस्याप्यसंभवः ॥ २७ ॥

पुत्रत्वमपि पितृत्वं मातुलत्वं च पौत्रता ।
भ्रातृव्यत्वं तथा भागि-नेयत्वं च पितृव्यता ॥ २८ ॥

एकस्मिन्नेव पुरुषे धर्मा एते विरुद्धकाः ।
संगच्छन्ते कथं विद्वन्नास्त्यपेक्षाकृता अमी ॥ २९ ॥

पुत्रत्वं च पितृत्वं चा-पेक्षयापि कृतं भवेत् ।
पितुः पुत्रस्य भेदस्यैकस्मिन्नरे हि संगतम् ॥ ३० ॥

भागे सिंहो नरः सिंहो योऽसौ भागद्वयात्मकः ।
तमभागं विभागेन नरसिंहं प्रचक्षते ॥ ३१ ॥

संशयः संकरो वैय-धिकरण्यानवस्थिती ।
अप्रतिपत्तिर्विषयव्यवस्थाहानिरित्यमी ॥ ३२ ॥

यत्कार्यकारणतयाऽपि मतान्तरीया, नित्यत्वमन्यदपि वस्तुनि मन्यमानाः
तत्किं विरुद्धघटना न भवेत्तदानीं, स्वीयाश्रितेपि न मते गुणदोषचिन्ता

एते दोषा न चैवात्र स्याद्वादे संभवन्त्यमी ।
जात्यन्तरत्वान्निरवकाशा एव प्रतिष्ठिताः ॥ ३४ ॥

स्वभावभेदः किलवस्तुनस्तु स्वीयस्वभावव्यतिवृत्तितोपि ।
अतत्स्वभावात् पर कल्पनायां तदानवस्थास्वयमेति वृद्धिम्॥ ३५ ॥

एकान्तनित्ये न गमागमौ स्तः न पुण्यपापे न च बन्धमोक्षौ ।
तथाप्यनित्येपि स एव दोषस्तस्मादनेकान्तमते न दोषः ॥ ३६ ॥

स्यादित्यव्ययमेवेदमनेकान्तप्रदीपकम् ।
अष्टास्वपि पदेष्वेवमियं तत्त्वचतुष्टयी || ३७ ||

नित्याऽनित्यत्वमेवैका-न्या सामान्यविशेषभिद् ।
अभिलाप्यान्यभेदैका भावाऽभावात्मिकापरा || ३८ ||

एकान्तनित्ये सुखदुःखयोस्तु भोगो न जीवे न तथाप्यनित्ये ।
क्रमाक्रमाभ्यां च तथाहि नित्या-नित्ये क्रियावस्तुनि नो घटेत ३९ ||

चित्रं यदेकं तदनेकमत्र प्रामाणिकै रूपमुरीकृतं यैः ।
एकत्र मान्याः सततं त्वदन्यैरुपाधिभेदेन विरुद्धधर्माः || ४० ||

स्वतन्त्रनित्यानित्याभ्यामपरे वादिनः पुनः ।
मिश्राभ्यामपि ताभ्यां तु प्रोचुः स्याद्वादवादिनः || ४१ ||

कुण्डली कुण्डलीकाराऽर्जवावस्थाश्रितोपि वा
व्यतिरिक्ताऽव्यतिरिक्ता नैकान्ते संगतास्तदा || ४२ ||

एकान्तवादो न च कान्तवादोप्यसंभवो यत्र चतुष्टयस्य ।
उपक्रमो वानुगमो नयश्च निक्षेप एते प्रभवन्ति तद्वत् || ४३ ||

महाग्रन्थेषु यत्प्रोक्तं तत्त्वं चतुश्चतुष्टयं ।
विज्ञेयं वृत्तितो विद्भिः सविशेषं विशेषतः || ४४ ||

जीवः पदार्थो गुणिता गुणास्तु विज्ञानशक्तिप्रमुखास्त्वनन्ताः ।
नृदेवतिर्यग्निरयैकरूप पर्यायरूपं-प्रवदन्ति तत्त्वं || ४५ ||

अजीवंश्चापि जीवन्ति जीविष्यन्ति च ये सदा ।
जीवा इति जिनास्तत्त्वं जगुर्हि जगदुत्तमाः || ४६ ||

संसारिणश्च ये जीवाः संसरन्ति पुनः पुनः ।
समसार्षुश्च संसारे संसरिष्यन्ति ते सदा || ४७ ||

संसार्यसंसारितयोपयोगी, द्विधा प्रमाता व्यवहारतोपि ।
कर्त्ता च भोक्ता तनुमानमेयः, शुद्धात्स्वभावोद्र्ध्वगतिस्त्वमूर्त्तः||४८||

चेतना लक्षणोप्यात्मा प्रतिक्षेत्रं पृथग् स्थितः ।
ज्ञातश्चोभयमानेनादृष्टवान् परिणाम्यसौ ॥ ४९ ॥

उद्देशसल्लक्षणतत्परीक्षा द्वारेण तेषां सदुपायमाहुः ।
उद्देशमेवात्र हि नाम मात्र, वस्तु प्रकाशोद्यतमामनन्ति ॥ ५० ॥

तल्लक्षणं यद्व्यतिकीर्णवस्तु, व्यावृत्तिहेतुर्द्विविधं तदेव ।
आत्मानुभूतं तदनात्मभूतमौष्ण्यं यदग्नेः पुरुषस्तु दण्डी ॥ ५१ ॥

तेषां यथा स्यात् सदसद्विचारो युक्तेर्बलात्सैव मता परीक्षा ।
एभिस्त्रिभिर्वस्तु सदैव लक्ष्यं सत्तार्किकाणां किल वृत्तिरेषा॥ ५२ ॥

अव्यापकत्वं हि तदेकदेश्यतिव्यापकत्वं त्वितरानुवृत्ति ।
कृत्राप्यवर्त्तित्वमसंभवस्यैते लक्षणाभासतयात्रयोमी ॥ ५३ ॥

स्वपरव्यवसायिलक्षणं गदितं ज्ञानमिदं प्रमाणकृत् ।
सदसत्सकलार्थसंग्रहग्रहणाभिज्ञमतो विशेषकृत् ॥ ५४ ॥

यत्सन्निकर्षादिरसंविदात्मा प्रामाण्यशाली न भवेत् कदाचित् ।
नार्थान्तरस्यैवमचेतनत्वात् स्वार्थोपपत्तौ करणत्वमस्य ॥ ५५ ॥

किं स्यात्प्रमायाः करणत्वमस्य प्रत्यक्षता वापि कथं घटेत ।
प्रमाणता वापिकुतस्तमांस्यात्, नो सन्निकर्षे त्रितयं कदाचित् ॥ ५६ ॥

असन्निकृष्टं प्रमितेर्हि चक्षुरप्राप्यकारित्वत एव हेतोः ।
तदुद्भवः स्यात्खलु सन्निकर्षाभावेपि तस्यां न घटेत तत्ता॥ ५७ ॥

चक्षुर्मनोवद्विषयोद्भवानुग्रहोपघातानुपलम्भतोपि ।
अप्राप्यकारीन्द्रियमण्डलेषु स्याद् व्यञ्जनावग्रहकश्चतुर्षु ॥ ५८ ॥

न विद्यते चक्षुषि तैजसत्वं न रश्मिवत्ता न च तद्गतिस्तु ।
अप्राप्तवस्तु प्रवरप्रकाशे तद्योग्यतैवं शरणं वदन्ति ॥ ५९ ॥

व्यवसायस्वभावं हि प्रमाणत्वादुदीरितम् ।
परोदितं तथा निर्विकल्पकं व्यवसायहृत् ॥ ६० ॥

समारोपविरुद्धत्वाद् यन्नैवं न तदीदृशम् ।
तस्मिंस्तदध्यवसायो व्यवसायः शितेशितम् ॥ ६१ ॥

अतत्प्रकारे सति तत्प्रकारतान्तः समारोप इति प्रसिद्धः ।
विपर्ययः संशय एव तत्रोपचारतोऽनध्यवसायसंज्ञः ॥ ६२ ॥

विपरीतैकंकोटेस्तु निष्टंकनं विपर्ययः ।
शुक्तिकायां हि रजतं समारोपोयमादिमः ॥ ६३ ॥

अनिश्चितानेककोटि-स्पर्शिज्ञानं च संशयः ।
स्थाणुर्वापुरुषोवेति समारोपो द्वितीयकः ॥ ६४ ॥

किमित्यालोचनप्रायं ज्ञेयोऽनध्यवसायकः ।
गच्छतश्च तृणस्पर्शविषयं ज्ञानमुच्यते ॥ ६५ ॥

पूर्वाकारपरिक्षयोत्तरधृताकारः स्मृतं कारणं,
पूर्वाकारपरिक्षयोत्तरपरीणामस्तु कार्यं भवेत् ।
निर्दिष्टं कारणं च साधकतमं तत्कारणं स्यात्त्रिधो-
पादानं सहकारिकारणमतोऽपेक्षाकृतं कारणम् ॥ ६६ ॥

एकं त्वसाधारणकारणं स्यादन्यच्च साधारणमाहुरत्र ।
एकं ह्युपादानमतो मतं च तथान्यदन्येन कृतं कृतं तत् ॥ ६७ ॥

उत्पत्तौ परतः स्वतश्च परतो ज्ञप्तौ प्रमाणं भवेत्
प्रत्यक्षं च परोक्षमेतदुभयं मानं जिनेन्द्रागमे ।
अक्षाधीनतयाऽस्मदादिविदितं स्पष्टं द्विधा लौकिकं
मन्यंत्तत्किल पारमार्थिकमतो नित्यं सतां संमतम् ॥ ६८ ॥

आद्यं सांव्यवहारिकं पुनरपि द्वेधेन्द्रियाऽनिन्द्रियो-
त्पन्नत्वाद्विदितं तथापि हि चतुर्भेदं तथाऽवग्रहः ।
ईहापायसुधारणाभिरुदितं ज्ञानं हि मत्यात्मकं,
तत्राद्यं विकलं तथा च सकलं तद्वान् स्मृतस्तीर्थकृत् ॥ ६९ ॥

ज्ञानावरणनाशाच्च क्षयोपशमतोपि वा ।
शब्दाद्यसंभविज्ञानं स्पष्टं स्वानुभवोदयात् ॥ ७० ॥

ज्ञानं सांव्यवहारिकं निगदितं प्रत्यक्षमेवेन्द्रियै-
र्जन्यन्तत्किल पारमार्थिकमिदं तस्माच्च तद्धेतुकम् ।
अन्यान्यव्यतिरिक्तलक्षणवतोः प्रत्यक्षता किं तयो-
राद्ये स्यादुपचारतः कविवरैर्ज्ञाने परोक्षेऽग्रिमे ॥ ७१ ॥

स्पष्टं विशेषविशदप्रतिभासमानं प्रत्यक्षमेकमुदितं व्यवसायरूपम् ।
तद्देशतो हि विशदप्रतिभासनत्वात् ज्ञानं विशिष्टमिह सांव्यवहारिकं स्यात्

ज्ञानं भवेदिन्द्रियजन्यमेकम् पुनस्तथानिन्द्रियजन्यमन्यत् ।
स्पर्शादिकानां पुनरिन्द्रियत्वमनिन्द्रियत्वं मनसो वदन्ति ॥ ७३ ॥

मनः पुनस्तदद्वयसाधनोत्कमप्राप्यकारिस्वमते च चक्षुः ।
ज्ञानं तथैवाहुरपीतराणि यत्प्राप्यकारीणि तदिन्द्रियाणि ॥ ७४ ॥

योग्येन्द्रियार्थसमयोद्भवमुख्यसत्ता,
तन्मात्रगोचरसमुद्भवसद्विशिष्टम् ।
संगृह्यतेऽत्र विशदं खलु येन वस्तु,
सोऽवग्रहः पुनरयं पुरुषः समस्ति ॥ ७५ ॥

तद्गोचरीकृतपदार्थविशेषसंवि-,
दीहास्ति संशयनिराकरणोद्भवाऽत्र ।
यद्येष एष पुरुषः किल दाक्षिणात्य-
स्तत्प्रत्ययात्मकतया ग्रहणाभिमुख्यम् ॥ ७६ ॥

जातस्तथेहितविशेषविनिश्चितात्मा,
भाषाद्यशेषविषयाचरणादपायः ।
निश्चित्य वैष पुरुषः खलु दाक्षिणात्यो,
याथात्म्यबोधविधिना विधिवत्प्रयुक्तः ॥ ७७ ॥

कालान्तरेण तद् विस्मरणाय योग्यं,
तज्ज्ञानमेव गदिता किल धारणैषा ।
स्याच्चागृहीतविषयग्रहणादमीषां,
कोप्यत्र पूर्वमुनिभिः कथितः क्रमोऽयम् ॥ ७८ ॥

तत्राद्यं विकलं निजावरणकच्छेदोद्भवोत्पत्तिमत्,
किञ्चित्स्यादसमस्तवस्तु विषयावच्छेदकत्वात् पुनः ।
प्रत्येवं प्रथमं हि यद्भवगुणौ सत्प्रत्ययौ यस्य तौ
रूपिद्रव्यसुगोचरं तदवधिज्ञानं ह्यदः षड्विधम् ॥ ७९ ॥

चारित्रशुद्धिसंजातविशिष्टावरणक्षयात् ।
यन्मनोद्रव्यपर्यायालम्बनं विनिवेदितम् ॥ ८० ॥

तद् द्वेधा संज्ञिजीवानां, मानुषक्षेत्रवर्तिनाम् ।
मनःपर्यायविज्ञानं, मनः पर्यवसंज्ञिकम् ॥ ८१ ॥

स्वसामग्रीविशेषोद्यत्समस्तावरणक्षयात् ।
सकलं घातिसंघातविघातापेक्षमीरितम् ॥ ८२ ॥

समस्तवस्तु विस्तार, साक्षात्कारि त्रिकालतः ।
सर्वथा सर्वदा नित्यं, केवलज्ञानमेवतत् ॥ ८३ ॥

सर्वज्ञोऽसौ वीतरागः प्रसिद्धो निर्दोषत्वात्सद्भिरेवोदितश्च ।
निर्दोषोऽयं सत्प्रमाणाऽविरोधिवाक्त्वादत्र स्पष्टदृष्टान्त एषः ॥ ८४ ॥

स्युः सूक्ष्मान्तरितातिदूरगुणिनस्त्वण्वादयः कस्यचित्
प्रत्यक्षाः सततं यथाहुतवहः साध्योनुमेयत्वतः ।
सर्वज्ञः किल सोस्त्यनिन्द्रियकतो ज्ञानाच्छ्रुतः सुश्रुतात्
यस्मादिन्द्रियजं न सर्वविषयं ज्ञानं भवेत्कर्हिचित् ॥ ८५ ॥

त्वमेव निर्दोष इतीह शास्त्राऽविरोधिवाक्देवयतो विरोधः ।
यथा प्रसिद्धेन न बाध्यतेऽत्र, तस्मादनेकान्तमताद्यदिष्टम् ॥ ८६ ॥

त्वद्वाक्सुधापानपराङ्मुखानां सदैवमेकान्तमतानुगानाम् ।
निजासहेवाकविडम्बितानां स्वेष्टं च दृष्टेन हि बाध्यतेऽत्र ॥ ८७ ॥

चारित्रांशः कलौ भूरिभाग्यभाजां सुदुर्लभः ।
अस्मद् भाग्योदयादासो गुरुश्चारित्रसागरः ॥ ८८ ॥

सूरिः श्रीविजयप्रभस्तपगणाधीशो नतेशःश्रिये ,
कल्याणादिमसागराह्वगुरवो विद्वद्यशःसागराः ।
तच्छिष्यस्य यशस्वतः कृतिरियं स्याद्वादमुक्तावली
प्रत्यक्षस्तबकः प्रमाणरसिकंस्तत्राद्य एवाऽजनि ॥ ८९ ॥

## द्वितीयः स्तबकः

अथ द्वितीयं प्रतिपाद्यमानाऽस्पष्टभावाभिमतं परोक्षम् ।
आद्ये परोक्षे हि मति श्रुते द्वे सैद्धान्तिकास्तावदिदं वदन्ति॥ ९० ॥

स्मरणं १ प्रत्यभिज्ञानं २ तर्कोऽ ३ थानुमितिः ४ श्रुतम् ५ ।
परोक्षं पञ्चधा प्राहुर्भूरयः पूर्व सूरयः ॥ ९१ ॥

मानार्पिता या प्रसभं प्रतीता प्रतीतिरेवानुभवः प्रतीतः ।
क्रमोत्तरं कारणमाहुरेषाम् क्रमोप्यमीषामयमेव सिद्धः ॥ ९२ ॥

संस्कारबोधोदितकारणेन तथानुभूतार्थकगोचरं यत् ।
तच्छब्दमात्रोल्लिखनस्वरूपं विज्ञानमेतत्स्मरणं परोक्षम् ॥ ९३ ॥

स्मृतं तथैवोपमितं वितर्कितं, पुनस्तथैवानुमितं श्रुतश्रुतम् ।
प्रत्यक्षतो वापि धृतं पुरा यत् सर्वज्ञबिम्बं स्मरणे निदर्शनम्॥ ९४ ॥

हेतू तु यस्यानुभवस्मृती ते सामान्ययुग्मं विषयोपदेशः ।
तथा पुनः संकलनस्वरूपं तत् प्रत्यभिज्ञानमतो वदन्ति ॥ ९५ ॥

एकं हि पूर्वोत्तरकालवर्ति दशानुषक्तं सदृशत्वतोऽन्यत् ।
ततोऽन्यथाऽन्यत् किल योगक्लृप्तमन्तः प्रविष्टं ह्युपमानमत्र॥ ९६ ॥

स एष दृष्टो जिनदत्त एष स गोसदृक्षो गवयस्तथाऽन्यः ।
गोर्वैसदृक्षो महिषस्त्वयन्तन्निदर्शनं संकलनात्मके स्यात् ॥ ९७ ॥

मानोपलम्भानुपलम्भहेतुर्व्याप्तिर्हि यस्मिन् विषयोपदेशः ।
अस्मिन्सतीदं भवति स्वरूपं तर्कोस्ति धूमो दहनस्तु यत्र ॥ ९८ ॥

अन्वयव्यतिरेकाभ्यां निदर्शनं निदर्शनम् ।
अन्वयः सति सद्भावे व्यतिरेकस्ततोन्यथा ॥ ९९ ॥

तर्कः प्रमाणमात्रेणोपलम्भानुपलम्भतः ।
संभवः कारणं यत्र कालत्रितयवर्तिनोः ॥ १०० ॥

साध्यसाधनयोर्व्याप्त्याद्यालम्बनमिदं हि यत् ।
अन्वयव्यतिरेकाभ्यां संवेदनमुदीरितम् ॥ १०१ ॥

साध्यसाधनयोर्नित्यं कालत्रितयवर्तिनोः ।
संबंधो व्याप्तिरित्येवाविनाभावितयोच्यते ॥ १०२ ॥

अप्रत्यक्षपदार्थस्य कथं प्रामाण्यनिर्णयः ।
अर्थक्रियाभिसंवादादनुमानेन निर्णयः ॥ १०३ ॥

अथानुमानं द्विविधं वदन्ति स्वार्थं परार्थं ह्युपचारतोपि ।
स्वस्मै हितं स्वार्थमिदं सुधीभिरन्यत्परस्मै प्रतिपाद्यमानम्॥ १०४ ॥

स्वार्थं स्वहेतुग्रहणव्याप्तिस्मरणपूर्वकम् ।
यदेव साध्यविज्ञानमनुमानं तदेव हि ॥ १०५ ॥

अप्रतीतमनिराकृतमेतत् साध्यमेव यदभीप्सितमत्र ।
व्याप्तिपक्षसमयोदितसाध्यं तद्विकल्पवशतो पि च मानात्॥ १०६ ॥

साध्यं यदविनाभावसाधनं यत्र लक्षणम् ।
अन्यथानुपपत्त्यैकलक्षणं यत्र साधनम् ॥ १०७ ॥

यावान्कश्चिदयं सधूमनिकरः सत्येव वह्नौ भवेत्,
यत्सत्त्वे प्रथमोन्वयो निगदितो यत्सत्त्वमेवोभयम् ।

धूमोऽत्राऽसति पावके भवति नो तत्तु द्वितीयोऽधुना,
ज्ञातव्यो व्यतिरेक एष सततं चैवाऽन्यथा लक्षणं ॥ १०८ ॥

व्याप्तिःसदा द्रव्यगुणक्रियाभिरत्यन्तसंयोगविशेष एव ।
तथाविनाभाव इतीह नित्यसंबन्धिसंबद्धविशिष्टरूपा ॥ १०९ ॥

प्रतिबन्धोऽविनाभावः संबन्धो व्याप्तिरिष्यते ।
हेतुव्याप्तिसमायोगः परामर्शः स उच्यते ॥ ११० ॥

सहभावक्रमभावावनयोर्नियमःस्मृतोऽविनाभावः ।
व्याप्तेर्निश्चयतःस्याद् व्याप्तिः सैव प्रकाश्यते विबुधैः ॥ १११ ॥

येन धर्मेण धर्मस्य, सहभावविनिश्चयः ।
वृक्षत्वं गमयत्येव, शिंशपात्वेन हेतुना ॥ ११२ ॥

धूमस्यापि बृहद्भान्वं-तरभावविनिश्चयः ।
धूमोग्निं गमयत्याशु, क्रमभावः स्मृतोऽपि सः ॥ ११३ ॥

साधनं त्रिविधं कार्यस्वभावानुपलम्भभित् ।
पक्षोपि हेतुवत्साध्यः, साध्यसंबन्धसिद्धये ॥ ११४ ॥

पक्षस्य वचनं यत्स्यात् सा प्रतिज्ञा प्रकाश्यते ।
साध्यधर्मविशिष्टेऽपि पक्षत्वं धर्मिणि श्रुतम् ॥ ११५ ॥

अनुमानस्वरूपाप्तौ संबन्धस्मरणान्वितः ।
प्राहुर्लिङ्गपरामर्शः कारणं तत्र सूरयः ॥ ११६ ॥

धर्मिणोऽपि प्रसिद्धत्वं विकल्पाच्च प्रमाणतः ।
उभाभ्यां वापि विज्ञेयं स्वसंवेदनवेदकम् ॥ ११७ ॥

स्वार्थानुमानं स्यात् त्र्यङ्गं धर्मी साध्यं च साधनम् ।
साधनात्साध्यसंसिद्धिरनुमानप्रयोजनम् ॥ ११८ ॥

साध्यधर्मविशिष्टेऽपि पक्षत्वं धर्मिणि श्रुतम् ।
अन्यथानुपपत्यैकलक्षणो हेतुरिष्यते ॥ ११९ ॥

सद्धेतोर्ग्रहणं तथा स्मरणकं व्याप्तेस्तयोः संभवं,
साध्यज्ञानमतोऽनुमानकमिदं स्वार्थं सुधीभिर्धृतम् ।
साध्यत्वं च तथाप्रतीतमिति तत्त्रेधा श्रुते विश्रुतं,
किंत्वस्मादनिराकृताद् द्वयमिदं चाभीप्सितात्तत्त्रयम् ॥ १२० ॥

कृशानुमानयं देशः प्रोच्यते पक्षधर्मता ।
हेतूदितं धूमवत्वादनुमानं सुधीहितम् ॥ १२१ ॥

हेतु प्रयोगतो द्वेधा तथोपपत्तिरन्वयः ।
अन्यथानुपपत्तिस्तु व्यतिरेकः पुरोदितः ॥ १२२ ॥

परस्मै प्रतिपाद्यत्वात्प्रत्यक्षादेः परार्थता ।
तथैवमनुमानस्य सर्वत्रैवं विभावना ॥ १२३ ॥

हेतोर्वचनतः स्वार्थं पक्षहेत्वोः परार्थकम् ।
बालव्युत्पत्तिसिद्ध्यर्थं पञ्चावयवमीरितम् ॥ १२४ ॥

प्रतिबन्धप्रतिपत्तेरास्पदं यस्य लक्षणम् ।
द्वेधा साधर्म्यवैधर्म्यभेदाद् दृष्टान्त एव सः ॥ १२५ ॥

साध्यधर्मिणि सद्धेतोरुपसंहरणं तथा ।
धूमश्चात्र प्रदेशेऽयं तस्मादुपनयःस्मृतः ॥ १२६ ॥

तत्पुनः साध्यधर्मस्य पूर्वयोगेन भाषितम् ।
तत्तस्मादग्निरत्रायमेतन्निगमनं स्मृतम् ॥ १२७ ॥

यथाग्निमानयं देशः प्रोच्यते पक्षधर्मता ।
धूमवत्त्वाद्धेतुवाक्यमनुमानं परार्थकम् ॥ १२८ ॥

य एवं च स एवंतौ दृष्टान्तोपनयावुभौ ।
पाकस्थानं निगमनं मन्दधीसिद्धये त्रयं ॥ १२९ ॥

प्रकाश्यते साधनधर्मसत्ता तस्यां कृता साध्यसुधर्मसत्ता ।
साधर्म्यदृष्टान्त इति प्रदिष्टो यत्रास्ति भूमौ दहनस्तु तत्र ॥ १३० ॥

साध्याभावे साधनस्याप्यभावो वैधर्म्योक्तौ वै स दृष्टान्त एषः ।
शौचिः केशाभावतोस्याप्यभावो, धूमस्यास्मिन् ज्ञेय एव ह्रदे सः१३१

प्रयोगतोपि द्विविधः सहेतुस्तथोपपत्तिस्तु यदन्वयः स्यात् ।
ततोऽतिरिक्तस्तु तथान्यथानुपपत्तिसंज्ञो व्यतिरेक एव ॥ १३२ ॥

द्वेधोपलब्ध्यनुपलब्धिभिदा हि हेतुः, साध्यन्तयोर्विधिनिषेधविशेषसिद्धिः
एते द्विधा तदविरुद्ध विरुद्धभेदात्, साध्येन सार्धमिह तच्च न वाऽपि हेतोः

कार्यात्पुनः कारणकार्यताभ्याम्, पूर्वोत्तराभ्यां च चरात्सहाय्यात् ।
स्मृतोपलब्धिस्तु तथैव वाऽन्या स्वभावतोऽपि प्रथितात्प्रयोगात्१३४

सिद्धौ विधेस्तदविरुद्धयुतोपलब्धि, र्व्याप्यादितश्च नियुताः किल षट्प्रकाराः
अन्या स्वभावनियुताप्रतिषेधसिद्धौ, स्यात्सप्तधा किल विरुद्धयुतोपलब्धिः

सप्तप्रकाराः प्रतिषेधसिद्धौ यथाविरुद्धानुपलब्धिरेषा ।
विधिप्रतीतौ किल पञ्चधेति स्मृता विरुद्धाऽनुपलब्धिरेवम्॥ १३६ ॥

एताश्च सोदाहरणा ज्ञेयाःसद्भिस्तु विस्तरात् ।,
ग्रन्थस्य भूयस्त्वभयान्नाऽत्रालेखि प्रमादतः ॥ १३७ ॥

सद्भावरूपः किल वस्तुनोपि, विधिः सदंशो गदितः सुधीभिः ।
अभावरूपः खलु वस्तुनस्तु, तस्यासदंशः प्रतिषेध एवम्॥ १३८ ॥

चतुर्धायं प्रागभावः प्रध्वंसाभाव एव वा ।
तथेतरेतराभावोऽत्यन्ताभावश्चतुर्थकः ॥ १३९ ॥

यन्निवृत्तौ हि कार्यस्य समुत्पत्तिः प्रजायते ।
प्रागभावः स मृत्पिण्डो यथाकुम्भस्य कथ्यते ॥ १४० ॥

यदुत्पत्तौ हि कार्यस्य व्ययोऽवश्यं द्वितीयकः ।
कलशस्य यथाजातं यत्कपालकदम्बकम् ॥ १४१ ॥

स्वरूपान्तरतः स्वीयरूपव्यावृत्तिरिष्यते ।
स्वस्वरूपव्यवच्छेदः, स चाऽन्यापोहनामतः ॥ १४२ ॥

कुम्भस्वभावव्यावृत्तिर्यथास्तम्भस्वभावतः ।
इतरेतरनामा तु तार्त्तीयीकतयोदितः ॥ १४३ ॥

तादात्म्यपरिणामस्य निवृत्तिस्तु त्रिकालतः ।
सोऽत्यन्ताभाव एवायं चेतनाचेतने यथा ॥ १४४ ॥

आप्तस्य वचनादाविर्भूतमर्थस्य वेदनम् ।
आगमस्तूपचाराच्च स आप्तवचनात्मकः ॥ १४५ ॥

अभिधेयं यथावस्तु यो जानाति यथास्थितम्
यथा ज्ञानं चाभिधत्ते स आप्त इति विश्रुतः ॥ १४६ ॥

स द्वेधा लौकिको वक्ता-दिमो लोकोत्तरो जिनः ।
अविसंवादि वचनं, तस्य तस्माद् ध्वनिः स्मृतः ॥ १४७ ॥

तद्वचनं वर्णपदवाक्यात्मकमुदीरितम् ।
अकारादिः पौद्गलिको वर्णः शब्दः पुनः स्मृतः ॥ १४८ ॥

रूपादिवद् व्योमगुणो भवेन्नो शब्दोऽस्मदादीन्द्रियवेदनत्वात् ।
रूपादिवत्पौद्गलिकस्तदिन्द्रियार्थत्वतः पौद्गलिकत्वसिद्धिः॥ १४९

अन्योन्यापेक्षवर्णानां निरपेक्षा च संहतिः ।
पदं पदैरेव कृतं वाक्यस्येदं हि लक्षणम् ॥ १५० ॥

स्वस्वाभाविकसामर्थ्यसमयाभ्यां निवेदितम् ।
सदर्थस्य प्रतिपत्तिकारणं शब्द उच्यते ॥ १५१ ॥

हेतुर्वाक्यार्थविज्ञाने आकांक्षा योग्यता तथा ।
सन्निधिश्चेति विज्ञेयं त्रयं साधारणं मतं ॥ १५२ ॥

अभिव्यक्तेन संकेताज्जातिव्यक्त्युभयाश्रितात् ।
वाच्यवाचकभावेन सोर्थस्य प्रतिपादकः ॥ १५३ ॥

शब्दार्थयोः प्रतिपत्ति, र्लक्षणा व्यञ्जनादिका ।
ध्वनेस्तात्पर्यविज्ञानं, बहुधा च बहुश्रुतैः ॥ १५४ ॥

स्यादस्तिभेद एवैकः स्यान्नास्तीति द्वितीयकः ।
स्यादस्तिनास्ति भेदोन्य-स्तूर्योऽवक्तव्यसंगतः ॥ १५५ ॥

स्यादस्तितोप्यवक्तव्यं स्यान्नास्तिपदतोपि वा ।
स्यादस्तिनास्त्यवक्तव्यं सप्तमो भेद एव च ॥ १५६ ॥

स्यादस्तिनास्त्यवक्तव्यैरेकद्वाभ्यां विमिश्रितैः ।
भङ्गा विधिनिषेधाभ्यां स्यात्पदात्सप्त विश्रुताः ॥ १५७ ॥

या प्रश्नाद्विधिपर्युदासभिदया बाधच्युता सप्तधा
धर्मं धर्ममपेक्ष्य वाक्यरचनानेकांत्मके वस्तुनि ।
निर्दोषानिरदेशि देव भवता सा सप्तभङ्गी यया,
जल्पन् जल्परणांगणे विजयते वादी विपक्षं क्षणात् ॥ १५८ ॥

द्रव्यक्षेत्रकालभावैः, स्वैरन्यैस्तु घटोस्त्ययम् ।
स्वभावात्परभावाच्च द्रव्याद्यैर्नास्त्ययं यथा ॥ १५९ ॥

कालादिभिरभेदेनो-पचारात्प्रतिपाद्यते ।
प्रमाणवाक्यात्सैवायं, सकलादेश उच्यते ॥ १६० ॥

कालात्मरूपसंबन्धाः संसर्गोपक्रिये तथा ।
गुणिदेशार्थशब्दश्चेत्यष्टौ कालादयः स्मृताः ॥ १६१ ॥

तद्भावाव्यय एवैकं नित्यं लक्षणमिष्यते ।
पर्यायापेक्षयादन्यदनित्यत्वमथोच्यते ॥ १६२ ॥

चार्वाकोध्यक्षमेकं सुगतकणभूजौ सानुमानं सशब्दं
तद्द्वैतंपारमार्थः सहितमुपमया तत्त्रयं चाक्षपादः ।
अर्थापत्त्या प्रभाकृत् वदति च निखिलं मन्यते भट्ट एतत्
साभावं द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥ १६३ ॥

आद्योऽनेकान्तवादश्च तथा सदसदात्मकः ।
नित्यानित्यात्मको वादोऽन्यः सामान्यविशेषकः ॥ १६४ ॥

चत्वार एते वादाः स्युः स्याद्वादे न विरोधिनः ।
सप्तभङ्ग्यामभिलाप्या नाभिलाप्या द्वितीयके ॥ १६५ ॥

चारित्रचारुमूर्त्तिर्यश्चारित्ररससागरः ।
चारित्रसिद्धये मे स्ताद् गुरुश्चारित्रसागरः ॥ १६६ ॥

सूरिः श्रीविजयप्रभस्तपगणाधीशो नतेशः श्रिये,
कल्याणादिमसागराह्वगुरवो विद्वद्यशःसागराः ।
तच्छिष्यस्य यशस्वतः कृतिरियं स्याद्वादमुक्तावली
द्वैतीयीकतया परोक्षजनको गुच्छोऽभवत्तत्र सन् ॥ १६७ ॥

## तृतीयःस्तबकः

संक्षेपतः समाख्याय प्रमाणस्योभयस्य च ।
इत्थं स्वरूपसंख्ये च गोचरो गृह्यतेऽधुना ॥ १६८ ॥

गुणपर्यायवद् द्रव्यं स्थित्युत्पादव्ययात्मकम् ।
अनेकान्तस्वरूपं चानुवृत्तिव्यतिवृत्तिभाक् ॥ १६९ ॥

ज्ञानस्यैतस्य विषयो लोकालोकद्वयात्मकः ।
प्रमेयं वस्त्विति ज्ञातं सकलं सकलीरितम् ॥ १७० ॥

षड्द्रव्यैः पूरितं सर्वं नवतत्त्वान्वितं स्मृतम् ।
निर्णीतं ज्ञानिभिः सम्यक् तथेत्थं ज्ञानगोचरः ॥ १७१ ॥

गंतूण न परिछिन्दइ नाणं नेयंतयम्मि देसम्मि ।
आयत्थंचिय णवरं, अचिंतसत्ती उ विणेयं ॥ १७२ ॥

लोहोवलस्स सत्ती, आयत्था चेव भिन्नदेसम्मि ।
लोहं आगरिसंती, दीसई इह कज्जपच्चक्खा ॥ १७३ ॥

एवमिहनाणसत्ती, आयत्था चेव हंदि लोगंतं ।
जइ परिछिन्दइ सम्मं, को णु विरोहो भवे तत्थ ॥ १७४ ॥

फलमस्य द्विधा तच्च प्रमाणेन प्रसाध्यते ।
आनंतर्येण वा पारं-पर्येणेति प्रशस्यते ॥ १७५ ॥

प्रमाणानां यदज्ञान- निवृत्तिः फलमुच्यते ।
औदासीन्यं फलं पारंपर्यात्सकलिवां सदा ॥ १७६ ॥

विपरीतास्तदाभासाः प्रमाणादिस्वरूपतः ।
स्वरूपसंख्या विषयफलेभ्यः प्रतिपादिताः ॥ १७७ ॥

स्वरूपाभास इत्येवं प्रमाणाभास उच्यते ।
अनुपपत्तेः स्वपरव्यवसायस्य तत्त्वतः ॥ १७८ ॥

अज्ञानात्मकमित्येवं संन्निकर्षादिदर्शनम् ।
अस्य संविदितं ज्ञेयं तदनात्मप्रबोधकम् ॥ १७९ ॥

परावभासकत्वं नैषां स्वमात्रावभासकम् ।
विपर्ययाः समारोपा दर्शनं निर्विकल्पकम् ॥ १८० ॥

स्वपरव्यवसायस्तु न चैतेभ्यः प्रसिध्यति ।
आभासकास्तु त इमे प्रमाणस्य प्रकीर्तिताः ॥ १८१ ॥

आद्याभास इतीहभेदसहितो गन्धर्वपूर्वारिदे,
दुःखे शं च तथाह्यवग्रह मुखाभासानिवेद्याः पुनः ।
आभासोप्यवधेः शिवस्य विदितो द्वीपाश्च सप्ताब्धयः,
आभासः सकलस्य नैव विदितः प्रत्यक्षबोधेप्यमी ॥ १८२ ॥

तदित्यननुभूतेपि स्मरणाभासे उच्यते ।
तुल्येर्थे प्रत्यभिज्ञाना भासमाहुः स एव च ॥ १८३ ॥

तर्काभास इतीह मैत्रतनयः स श्याम एवोदितः,
पक्षाभाससमुद्गतं ह्यनुमितेराभासमेवं जगुः ।
तस्मात्तत्त्रितयं च तस्य विदितं, पूर्वोक्तमेतत्त्रयं,
पक्षस्य व्यतिरेकतः समुदितं तस्मात्ततो लक्षणम् ॥ १८४ ॥

प्रतीताद्यास्त्रयो ज्ञेयाः साध्यधर्मविशेषणात् ।
आद्यःसमस्ति जीवोयं यत्परेणार्हतान् प्रति ॥ १८५ ॥

प्रमाणश्रुतलोकस्वभाषादिभिरनेकधा ।
आद्योनुष्णोग्निरेवायं द्वितीयोस्ति न सर्ववित् ॥ १८६ ॥

तृतीयोपि हि जैनेन कर्तव्यं रात्रिभोजनम् ।
परदाराभिलाषोपि कर्त्तव्यः सर्वदा सदा ॥ १८७ ॥

अत्थं गइम्मि आइच्चे पुरत्थायअणुग्गए ।
आहारमइयं सव्वं मणसावि न पच्छए ॥ १८८ ॥

पक्षाभासप्रभेदाश्च बहुशो बहुधोदिताः ।
सोदाहरणतस्ते तु द्रष्टव्या वृत्तितस्तथा ॥ १८९ ॥

हेतुस्थाननिवेशात्तु हेत्वाभासा अहेतवः ।
असिद्धश्च विरुद्धश्चानैकान्तिक इमे त्रयः ॥ १९० ॥

अन्यथानुपपत्तिस्तु यस्य मानेन नो भवेत् ।
सोऽसिद्धो विदितो द्वेधोभयान्यतरभेदतः ॥ १९१ ॥

असिद्धभेदा बहवः पञ्चविशंति भेदिनः ।
सविस्तरं विशेषस्तु, विज्ञेयो वृत्तितः खलु ॥ १९२ ॥

परिणामी पुनः शब्दश्चाक्षुषत्वात्तथादिमः ।
अचेतना हि तरवो द्वितीयः सुगतेरितः ॥ १९३ ॥

विकल्पाद्धर्मिणः सिद्धिः क्रियते कारणादतः ।
द्वेधाविधर्मिणः सिद्धि विकल्पात्ते समागताः ॥ १९४ ॥

विरुद्धस्तु भवेद्यस्य सैव साध्यविपर्ययात् ।
अनित्यो प्रत्यभिज्ञानादिमत्वात् पुरुषोप्ययम् ॥ १९५ ॥

अवान्तरप्रभेदा ये ज्ञेयास्ते वृत्तितो भृशं ।
यथा पक्षविपक्षैकदेशवृत्तिविभेदतः ॥ १९६ ॥

यस्य संदिह्यते सैव सोऽनैकान्तिक उच्यते ।
द्वेधा निर्णीत संदिग्ध तद्युग्विपक्षवृत्तिकः ॥ १९७ ॥

नित्यः शब्दः प्रमेयत्वादाद्यभेदो भवेदयम् ।
नेयायिकैस्तथोपाधिरुक्तोऽन्यः प्रतिपाद्यते ॥ १९८ ॥

दृष्टान्ताभास एवायं, नवधापि द्विधा पुनः ।
अन्वयव्यतिरेकाभ्यां, नवभेदा भवन्ति ते ॥ १९९ ॥

अपौरुषेयः शब्दोत्राऽमूर्त्तत्वाद् दुःखवत्स्मृतः ।
निदर्शनानि दृष्टान्ता-भासे ज्ञेयानि शास्त्रतः ॥ २०० ॥

शब्दोयं परिणामवानुपनयाभासस्तु कार्यत्वत-
स्तस्मिन्नेव फले तथा निगमनाभासस्तु शब्दस्तथा ।
तत्रानाप्तभवाहिचित्प्रवचनाभासश्च संख्यादितः,
प्रत्यक्षं प्रवदन्ति मानमपरे जातौं द्वितीयस्तथा ॥ २०१ ॥

विषयाभास एवात्र सामान्योभयसंज्ञितम् ।
फलाभासस्तथाभिन्नं भिन्नं मानादुदीरितम् ॥ २०२ ॥

ददाति सेवया सम्यक्सागरः सागरोद्भवम् ।
मया रत्नत्रयं प्राप्तं गुरोश्चारित्रसागरात् ॥ २०३ ॥

सूरिःश्रीविजयप्रभस्तपगणाधीशो नतेशः श्रिये
कल्याणादिमसागराह्वगुरवो विद्वद्यशःसागराः ।
तच्छिष्यस्य यशस्वतःकृतिरियं स्याद्वादमुक्तावली,
विज्ञातस्तबकःप्रमेयविषयस्तस्यां तृतीयोप्यभूत् ॥ २०४ ॥

## चतुर्थः स्तबकः

श्रुतप्रमाणाद्विषयीकृतस्य चार्थस्य योंऽशः प्रकटोऽपि येन ।
अंशस्य तस्मादितरस्य चौदासीन्यादभिप्रायविशेष एषः ॥ २०५ ॥

जावइया वयणपहा तावइया चेव हुंति नयवाया ।
जावइया नयवाया तावइया चेव परसमया ॥ २०६ ॥

नयः प्रसिद्धः प्रतिपत्तुरेव-स्वार्थैकदेशव्यवसायकत्वात् ।
सव्यासतोऽनेकविकल्पकल्प्यः समासतोयं द्विविधः प्रदिष्टः॥ २०७ ॥

द्रव्यार्थिकनयस्त्वेकोऽन्यः पर्यायार्थिकस्तथा ।
निश्चयो व्यवहारस्तु शुद्धाशुद्धभिदा द्विधा ॥ २०८ ॥

नैगमः संग्रहोन्यश्च व्यवहारस्तृतीयकः ।
द्रव्यार्थिकनयस्यैते भेदाः प्रोक्ता अमी त्रयः ॥ २०९ ॥

द्वितीयस्तु चतुर्भेदः ऋजुसूत्रश्च शब्दभाक् ।
समभिरूढ एव स्यादेवंभूतश्चतुर्थकः ॥ २१० ॥

अमी सप्त नयाः प्रोक्ताः श्रीमत्स्याद्वादवादिभिः ।
प्रमाणनयसंसिद्धं श्रीमत् स्याद्वादशासनम् ॥ २११ ॥

अहो चित्रं चित्रं तव चरितमेतन्मुनिपते,
स्वकीयानामेषां विविध विषयव्याप्तिवशिनाम् ।
विपक्षाक्षेपाणां कथयसि नयानां सुनयतां,
विपक्षक्षेसृणां पुनरिह विभो दुष्टनयताम् ॥ २१२ ॥

निःशेषांशजुषां प्रमाणविषयीभूयं समासेदुषां,
वस्तूनां नियतांशकल्पनपराः सप्तश्रुताःसंगिनः ।
औदासीन्यपरायणास्तदपरे चांशा भवेयुर्न्नया,
श्चेदेकान्तकलङ्कपङ्ककलुषास्ते स्युस्तदा दुर्णयाः ॥ २१३ ॥

स्वाभिप्रेतादथांशाच्च सद्यस्तद्व्यतिरेकतः ।
इतरांशापलापी यो नयाभासः स उच्यते ॥ २१४ ॥

अन्यदेव हि सामान्यमभिन्नज्ञानकारणं ।
विशेषोप्यन्य एवेति मन्यते नैगमो नयः ॥ २१५ ॥

सद्रूपतानतिक्रान्तस्वस्वभावमिदं जगत् ।
सत्तारूपतया सर्वं निगृह्णन् संग्रहो मतः ॥ २१६ ॥

व्यवहारस्तु तमिव प्रतिवस्तु व्यवस्थितिं
तथैव दृश्यमानत्वाद् व्यापारयति देहिनः ।
तत्रर्जुसूत्रनीतिःस्याच्छुद्धपर्यायसंश्रिता
नश्वरस्यैवभावस्य भावात् स्थितिवियोगतः ॥ २१७ ॥

विरोधिलिंग-संख्यादि-भेदाद्भिन्नस्वभावताम् ।
तस्यैव मन्यमानोऽयं शब्दः प्रत्यवतिष्ठते ॥ २१८ ॥

तथाविधस्य तस्यापि वस्तुनः क्षणवर्तिनः ।
ब्रूते समधिरुढस्तु संज्ञाभेदेन भिन्नताम् ॥ २१९ ॥

एकस्यापि ध्वनेर्वाच्यं सदा तन्नोपपद्यते ।
क्रियाभेदेन भिन्नत्वादेवंभूतोभिमन्यते ॥ २२० ॥

तत एव परामर्शाभिप्रेतधर्मावधारणात्मकतयाऽशेषधर्मतिरस्कारेण प्रवर्तमानो दुर्नयसंज्ञामश्नुते नैगमनयदर्शनानुसारिणौनैयायिकवैशेषिकौ संग्रहाभि प्रायप्रवृत्ताः सर्वेप्यद्वैतवादाः सांख्यदर्शनं चव्यवहाररूपानुपपत्ति-प्रायश्चार्वाकदर्शनं ऋजुसूत्रोक्तप्रवृत्तबुद्धयस्तथागताः शब्दादिनयाव-लम्बिनो वैयाकरणादयः ॥

द्रव्यं पुरोक्तं हि तदेव सोर्थो द्रव्यार्थिकोयं त्रिविधः प्रदिष्टः ।
स्वार्थैकदेशस्य तथाविधस्य वस्त्वंशतायाश्च तथैव तत्त्वात्॥ २२१ ॥

मुख्यामुख्यस्वरूपेण धर्मयोर्धर्मिणोस्तयोः ।
विचक्षणं च तेनैकगमो नैगम उच्यते ॥ २२२ ॥

नायं वस्तु न वा वस्तु वस्त्वंशः कथ्यते बुधैः ।
नासमुद्रः समुद्रो वा समुद्रांशो यथैव हि ॥ २२३ ॥

तन्मात्रस्य समुद्रत्वे शेषांशस्याऽसमुद्रता ।
समुद्रबहुता वा स्यात् तत्त्वेकास्तु समुद्रवित् ॥ २२४ ॥

तयोश्च चैतन्यकमात्मनीतिः पर्यायवद् वस्तु च धर्मिणोः स्यात् ।
जीवः सुखीयो विषयाश्रितः क्षणं तृतीयभेदः खलु धर्मधर्मिणोः२२५

उभे च सत्वचैतन्ये पृथक्भूते तथात्मनि ।
नैगमाभास एवात्र पार्थक्याद्धर्मधर्मिणोः ॥ २२६ ॥

वैशेषिकमतं चात्र नैयायिकस्य दर्शनम् ।
एतद्द्वयं तथा नैगमाभासे च प्ररूपितम् ॥ २२७ ॥

सामान्यमात्रग्रहणप्रवीणः परोपरः स्यादविशेषतोपि ।
तथापरामर्श इतीह विश्वमेकं प्रदिष्टः परसंग्रहोयम् ॥ २२८ ॥

सत्तैव तत्त्वं न पुनर्विशेषा अद्वैतवादिप्रकाराश्च सांख्याः ।
एते तदाभासतया हि विज्ञा एकान्तवादात्परसंग्रहस्य ॥ २२९ ॥

द्रव्यत्वमाश्रित्य तदन्तरालव्यक्त्याश्रितं तेषु तदीयभेदाः ।
तथा परःसंग्रह एषु नागनिमीलिकान्द्रागवलम्ब्यमानः ॥ २३० ॥

द्रव्यत्वमेकं सकलं हि जानन् तेषां विशेषान्खलु निह्नुवानः ।
तथातदाभास इतीरितः स्यात् सपर्ययत्वस्य तथाऽविशेषात्॥ २३१ ॥

अर्थांस्तथासंग्रहसंगृहीतात्तथापरामर्शविशेष एषः ।
तानेवयोयं प्रकटीकरोति नयो नयज्ञैर्व्यवहारनामा ॥ २३२ ॥

द्रव्यं हि यत्सत् किल पर्ययो वा, भासः पुनस्तस्य सुधीभिरुक्तः ।
निदर्शनं नास्तिकदर्शनं तै, र्मान्यं जगद्भूतचतुष्टयैक्यं ॥ २३३ ॥

पर्यायार्थिक एवाय-मृजुसूत्रस्तथादिमः ।
शब्दःसमभिरूढश्चे, त्येवंभूतश्चतुर्थकः ॥ २३४ ॥

अतीतानागतवर्तमानसमये कौटिल्यवैकल्पतो,
द्रव्यं प्राञ्जलमर्पयत्यविरतं पर्यायमात्रं नवा ।

संप्रत्यस्ति सुखादिरेवहितदाभासोप्यसौ सौगतः,
तत्सर्वं क्षणिकं तथागतगुणं द्रव्यापलापीश्रुतः ॥ २३५ ॥

शब्दाख्यश्च नयोध्वनेरपि भवेत्कालादितोर्थस्यभित्
स्वर्णाद्रिस्त्वभवद्भविष्यतिभवत्पर्यायतीर्थाभिदा ।
भिन्नार्थं लभते निरुक्तिभिदयापर्यायशब्देषु सः
इन्द्रस्त्विन्दनतस्तथैवशकनाच्छक्रश्च तद्दर्शनम् ॥ २३६ ॥

यथेन्द्रशक्र इत्याद्याः शब्दाभिन्नाभिधेयकाः ।
भिन्नशब्दत्वतः कुम्भस्तदाभासस्तुरंगवत् ॥ २३७ ॥

पर्यायशब्देषु निरुक्तिभेदादर्थं च भिन्नं प्रवदन्ति विज्ञाः ।
गुणक्रियाशब्दविशेषतोऽपि तथा तदाभास इतीह वृद्धाः ॥ २३८ ॥

एवंभूतनयः क्रियाश्रितविधेशब्दस्य वाच्यक्रिया-
विष्टार्थं प्रकटीकरोतिकिल गौरश्वश्च तद्दर्शनम् ।
चेष्टाशून्यमिदं घटाख्यमिति तत्तस्माद् घटदेःक्रिया
शून्यत्वात्पटवत्त्वनेन वचसाभासस्त्वदीयोभवेत् ॥ २३९ ॥

चत्त्वार एते प्रथमेर्थरूपनिरूपणस्य प्रवणत्त्वतो ये ।
भवन्ति चार्थोपपदे नयास्ते शेषास्त्रयः शब्दनया वदन्ति ॥ २४० ॥

को वा स्याद् बहुविषयः को वाऽल्पविषयो नयः ।
विवेचयन्ति विधिवन्नयज्ञा नयशासने ॥ २४१ ॥

पूर्वः पूर्वो नयो यस्तु स स्यात्प्रचुरगोचरः ।
परः परः परिमितविषयः प्रतिपाद्यते ॥ २४२ ॥

उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि नाथ दृष्टयः ।
नच तासु भवान् प्रदृश्यते प्रविरक्तासु सरित्स्विव नोदधिः॥ २४३ ॥

नयास्तव स्यात्पदला ञ्छना इमे रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः॥ २४४ ॥

नित्यसामान्यसदभिलाप्येतरचतुष्टयी ।
जात्यन्तरत्वाद् स्याद्वादे दोषपोषाय नो भवेत् ॥ २४५ ॥

रसादयो धातव ईशवाञ्छा-फला नयाः स्यात्पदलाञ्छनास्ते ।
प्रमाणवत्ते फलदायकाःस्युश्चारित्रसत्सागरसंप्रदिष्टाः ॥ २४६ ॥

सूरिः श्रीविजयप्रभस्तपगणाधीशो नतेशःश्रिये,
कल्याणादिमसागराह्वगुरवो विद्वद्यशःसागराः ।
तच्छिच्छष्यस्य यशस्वतः कृतिरियं स्याद्वादमुक्तावली,
तत्रायं स्तबको नयाद्भुतरसप्रेष्ठश्चतुर्थोभवत् ॥ २४७ ॥

स्याद्वादसुखबोधाय प्रक्रियेयं प्रतिष्ठिता ।
विचाराम्बुधिबोधाय देवसूरिवचोनुगा ॥ २४८ ॥

पू.मु.श्रीयशस्वत्सागरविरचिता

# ॥ स्याद्वादमुक्तावली ॥

# ॥ जैनविशेषतर्कः ॥

## प्रथमः स्तबकः

प्रणम्य शङ्खेश्वरपार्श्वनाथं प्रकाशितानन्तपदार्थसार्थम् ।
शिशुप्रबोधाय तमस्तमोऽर्कः प्रकाश्यते जैनविशेषतर्कः ॥ १ ॥

जीवाजीवौ नभःकालौ धर्माधर्मौ विशेषतः ।
समस्वभावाः स्याद्वादे पदार्थाः षट् प्रकीर्त्रि (र्ति)ताः ॥ २ ॥

तत्रास्ति सामान्यविशेषकाद्यनेकात्मकश्चैव पदार्थसार्थः ।
एकोऽनुवृत्तिव्यतिवृत्तितोऽन्यश्चार्थक्रियाया घटनात् त्रिपद्या॥ ३ ॥

सामान्यं द्विविधं तिर्यगूर्ध्वतादिविभेदतः ।
आद्यं साधारणं व्यक्तौ द्वितीयं द्रव्यमेव च ॥ ४ ॥

तिर्यग् (क्) सामान्यमेवैतद् यथा गोत्वं गवां व्रजे ।
तल्लक्षणं प्रतिव्यक्ति तुल्या परिणतिस्तथा ॥ ५ ॥

द्रवत्यदुद्रुवत्द्रोष्यत्येवं त्रैकालिकं च यत् ।
ताँस्ताँस्तथैव पर्यायान् तद्द्रव्यं जिनशासने ॥ ६ ॥

अवच्छेदक एवायं व्यतिवृत्तिर्हि लक्षणम् ।
विशेषोऽपि द्विप्रकारो गुणपर्यायभेदतः ॥ ७ ॥

सहोत्पन्ना गुणा द्रव्ये पर्यायाः क्रमभाविनः ।
पर्येत्युत्पादनाशौ च पर्यायः समुदाहृतः ॥ ८ ॥

पर्यायाणां गुणानां च भेदो नो धर्म्यपेक्षया ।
स्वरूपापेक्षया भेदः प्रोक्तोऽयं पूर्वपण्डितैः ॥ ९ ॥

स्याद्व्ययमनेकान्तद्योतकं सर्वथैव यत् ।
तदीयवादः स्याद्वादः सदैकान्तनिराश (स) कृत् ॥ १० ॥

सर्वं तथान्वयि द्रव्यं नित्यमन्वयदर्शनात् ।
अनित्यमेतत् पर्यायैः पर्यायानुभवादिदम् ॥ ११ ॥

अनादिनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणम् ।
उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले ॥ १२ ॥

एकविंशतिभावाः स्युर्जीवपुद्गलयोर्मताः ।
धर्मादीनां षोडश स्युः काले पञ्चदश स्मृताः ॥ १३ ॥

उत्पादध्रौव्यनाशास्ते स्युर्भिन्नाभिन्नलक्षणात् ।
परस्परं हि सापेक्षा[:] सैवेयं त्रिपदी मता ॥ १४ ॥

रहितः स्थितिनाशाभ्यां न चोत्पादस्तु केवलः ।
उत्पादध्रौव्यरहितो न नाशः केवलो मतः ॥ १५ ॥

रहितोत्पादनाशाभ्यां नैकका केवला स्थितिः ।
अन्यथानुपपत्तेश्च दृष्टान्ताः कूर्मरोमवत् ॥ १६ ॥

सर्वं जीवादिषट् (ड्) द्रव्यं गुणपर्यायसंयुतम् ।
अनेकान्तकलाक्रान्तं सिद्धं वस्तु त्रयात्मकम् ॥ १७ ॥

प्रध्वस्ते कलशे शुशोच-तनया मौलौ समुत्पादिते,
पुत्रः प्रीतिमवाप कामपि नृपः शिश्राय मध्यस्थताम् ।
पूर्वाकारपरिक्षयस्तदपराकारोदयस्तद्द्वया-
धारश्चैक इति स्थितं त्रयमतं (तः) तत्त्वं तथा प्रत्ययात्॥ १८ ॥

तथानेकान्ततो वस्तु भावाभावोभयात्मकम् ।
यथा सत्त्वं स्वरूपेण पररूपेण चान्यथा ॥ १९ ॥

पटाद्यभावरूपश्चेद् घटोऽयं न भवेत्तदा ।
घटः पटादिरेव स्यात् तस्मादेष द्वयात्मकः ॥ २० ॥

द्रव्यक्षेत्रकालभावापेक्षयापि घटो यथा ।
स्वभावेन परभावाद्भिन्नस्तदुभयात्मकः ॥ २१ ॥

अर्थक्रियाकारि तदेव वस्तु स्वद्रव्यशक्त्या हि भवेत् समर्थम् ।
पर्यायशक्त्या तदिहासमर्थम् सापेक्षमेतद् सहकारिराशेः ॥ २२ ॥

विरुद्धधर्माध्यासस्तु नानेकान्तं प्रतिक्षिपेत् ।
गुडनागरभैषज्यान्न दोषोऽयं द्वयात्मनि ॥ २३ ॥

चारित्रादिमसागराः समभवन् विद्यापगासागराः,
येषां ध्यानवशा प्रसादमकरोत् पद्मावतीदेवता ।
उर्वीशा बहुशो यदीयवचनादाखेटकं तत्यजुः,
ध्याता[ः]श्रीगुरवो भवन्तु मम ते सद्यः सहायप्रदाः ॥ २४ ॥

इत्थं श्रीसमयः सरानुसुकृतं स्याद्वादवादे सदा,
सूरिः श्रीविजयप्रभस्तपगणाधीशो नतोर्वीश्वरः ।
कल्याणादिमसागराह्वगुरवः प्राज्ञा यशःसागराः
तच्छिष्यस्य यशस्वतः कृतिरियं स्याद्वादमुक्तावली ॥ २५ ॥

जीवो द्रव्यं प्रमातात्मा ज्ञातश्चोभयमानतः ।
सच्चैतन्यस्वरूपोऽयं पर(रि)णामी स विश्रुतः ॥ २६ ॥

कर्ता भोक्ता तनूमानः प्रतिक्षेत्रं पृथग् (क्) स्थितः ।
विशिष्टोऽपि पौद्गलिको दृष्टवान् दिग्विशेषणैः ॥ २७ ॥

ज्ञानं प्रमाणं स्वपरव्यवसायीति लक्षणम् ।
सदसद्वस्तूपादेयहेयक्षममुदीरितम् ॥ २८ ॥

प्रामाण्यं सन्निकर्षादेरज्ञानस्येह नोच्यते ।
अचेतनत्वाद्वा स्वीयनिश्चयाकरणत्वतः ॥ २९ ॥

व्यवसायस्वभावं हि प्रमाणत्वादुदीरितम् ।
समारोपविरुद्धत्वात् यन्नैवं न तदीदृशम् ॥ ३० ॥

तस्मिंस्तदध्यवसायव्यवसायः शि(सि)ते शि(सि)तम् ।
यथावस्थितसज्ज्ञानं याथार्थ्यमपरे विदुः ॥ ३१ ॥

यद्विपरीतैककोटिनिष्टङ्कनं विपर्ययः ।
शुक्तिकायां हि रजतं समारोपोऽयमादिमः ॥ ३२ ॥

अनिश्चितानेककोटिस्पर्शि ज्ञानं च संशयः ।
स्थाणुर्वा पुरुषो वेति समारोपो द्वितीयकः ॥ ३३ ॥

किमित्यालोचनं ज्ञानं ज्ञेयोऽनध्यवसायकः ।
गच्छतश्च तृणस्पर्शि ह्युपचारात् तृतीयकः ॥ ३४ ॥

द्विविधं कारणं ज्ञेयमसाधारणमादिमम् ।
साधारणं ततस्तावत्तत् साधकतमं स्मृतम् ॥ ३५ ॥

पूर्वाकारपरित्यागाज्जहद्वृत्तोत्तराकृतिः ।
उपादानकारणं तद् मृत्पिण्डाः(ण्डः) कलशस्य च ॥ ३६ ॥

पूर्वाकारपरित्यागोत्तराकारस्य निर्मितौ ।
परिणामश्च कार्यत्वं मृत्स्नायां कलशो यथा ॥ ३७ ॥

उपादानादित्रितयं कारणं सद्भिरिष्यते ।
कार्यकारणताभावो नोक्तो ग्रन्थस्य गौरवात् ॥ ३८ ॥

उत्पत्तौ परतः स्वतश्च परतो ज्ञप्तौ प्रमाणं भवेत्,
प्रत्यक्षं च परोक्षमेतदुभयं मानं जिनेन्द्रागमे ।
अक्षाधीनतयास्मदादिविदितं स्पष्टं तथा लौकिकम्,
द्वेधा तत् प्रियपारमार्थिकमिदं द्वेधा पुनः संमतम् ॥ ३९ ॥

आद्यं सांव्यवहारिकं पुनरपि द्वेधेन्द्रियातीन्द्रियो-
त्पन्नत्वाद् द्वितयं तथापि [च] चतुर्भेदं यथाऽवग्रहः ।
ईहावायसुधारणादिभिरिदं जातं पुनस्तद्धितं,
तत्राद्यं विकलं तथा च सकलं तद्वान् स्मृतस्तीर्थकृत् ॥ ४० ॥

अवध्यावरणोच्छेदादवधिज्ञानमिष्यते ।
गुणप्रत्ययमेवाद्यं तद्रूपिद्रव्यगोचरम्, ॥ ४१ ॥

चारित्रशुद्धिसंजाताद् विशिष्टावरणक्षयात् ।
यन्मनोद्रव्यपर्यायसाक्षात्कारि निवेदितम् ॥ ४२ ॥

तथा हि संज्ञिजीवानां मानुषक्षेत्रवर्त्ति (र्ति)नाम् ।
मनःपर्यायविज्ञानं मनःपर्यायसंज्ञिकम् ॥ ४३ ॥

सामग्रीतः समुद्भूतात् समस्तावरणक्षयात् ।
सकलं घातिसंघातविघातापेक्षमीहितम् ॥ ४४ ॥

समस्तवस्तुपर्यायसाक्षात्कारि त्रिकालतः ।
सर्वथा सर्वद्रव्याद्यैः केवलज्ञानमेव तत् ॥ ४५ ॥

अर्हन्नेवास्ति सर्वज्ञो निर्दोषत्वादुदीरितः ।
यस्तु नैवं स नैवं स्यात् यथा रथ्यापुमानसौ ॥ ४६ ॥

मानाविरोधिवाक्त्वा(क्यत्वा)त् निर्दोषोऽर्हन्निगद्यते ।
यस्तु नैवं स नैवं स्यात् यथा रथ्यापुमानसौ ॥ ४७ ॥

तस्येष्टस्य तथा प्रमाणविषयेनाबाध्यमानत्वतः,
तद्वाचः प्रतिपाद्यमानसुविधेस्तेनाविरोधोदयः ।
मानेनापि न बाध्यते निजमतं मानाविरुद्धोदितः,
ज्ञेयोऽर्हन्नयमेव विश्वविदितः श्रीवर्धमानप्रभुः ॥ ४८ ॥

चारित्रचारुमूर्तिय(र्य)श्चारित्ररससागरः ।
चारित्रसिद्धये मे स्ताद् गुरुश्चारित्रसागरः ॥ ४९ ॥

सूरिः श्रीविजयप्रभस्तपगणाधीशो नतोर्व्वीश्वरः,
कल्याणादिमसागराह्वगुरवः प्राज्ञा यशःसागराः ।
तच्छिष्यस्य यशस्वतः कृतिरियं स्याद्वादमुक्तावली
प्रत्यक्षस्तबकस्तदा समभवत् तस्यां द्वितीयोऽधुना ॥ ५० ॥

## तृतीयः स्तबकः

अथ द्वितीयं प्रतिपाद्यमानास्पष्टत्वभावाभिमतं परोक्षम् ।
आद्ये परोक्षे हि मतिश्रुते द्वे सैद्धान्तिकास्तावदिदं वदन्ति॥ ५१ ॥

स्मरणं प्रत्यभिज्ञानं तर्कोऽथानुमितिः श्रुतम् ।
परोक्षं पञ्चधा प्राहुर्भूरयः पूर्वसूरयः ॥ ५२ ॥

संस्कारबोधसंभूतमनुभूतार्थवेदनम् ।
तत् तीर्थकृत्प्रतिच्छन्दः स्मरणं प्रथमोदितम् ॥ ५३ ॥

मानार्पिता प्रतीतिर्या स एवानुभवः स्मृतः ।
संकलनं विवक्षातो वस्तुप्रत्यवमर्शनम् ॥ ५४ ॥

प्रत्यभिज्ञानमेवात्रानुभवस्मृतिहेतुकम् ।
सामान्यद्वयविषयं तथा संकलनात्मकम् ॥ ५५ ॥

स एवायं जिनदत्तस्तथा गोपिण्ड एष सः ।
तत्तज्जातीय एवायं गोसदृग्गवयस्तथा ॥ ५६ ॥

तर्कः प्रमाणमात्रेणोपलम्भानुपलम्भतः ।
संभवः कारणं यत्र कालत्रितयवर्तिनोः ॥ ५७ ॥

साध्यसाधनयोर्व्याप्त्याद्यालम्बनमिदं हि यत् ।
अन्वयव्यतिरेकाभ्यां संवेदनमिदं हि सः ॥ ५८ ॥

यावान् कश्चिदयं स धूमनिकरः सत्येव वह्नौ भवेत्,
यत्सत्वे(त्त्वे) प्रथमोऽन्वयो निगदितो यत्सत्त्वमेवोभयम् ।
धूमोऽत्रासति पावके भवति नो सद्यो द्वितीयोऽधुना,
ज्ञातव्यो व्यतिरेक एष हि ततश्चैवान्यथा लक्षणम् ॥ ५९ ॥

प्रतिबन्धोऽविनाभावसंबन्धो व्याप्तिरिष्यते ।
हेतुव्याप्तिसमायोगः परामर्शः स उच्यते ॥ ६० ॥
द्वेधानुमानं स्वार्थं च परार्थमुपचारतः ।
व्युत्पन्नानां तदैवेकं सहेतुवचनात्मकम् ॥ ६१ ॥

सद्धेतोर्ग्रहणं तथा स्मरणकं व्याप्तेस्तयोः संभवम्,
साध्यज्ञानमतोऽनुमानमिदकं स्वार्थं सुधीभिर्धृतम् ।
साध्यत्वं[च] तथाप्रतीतमिति तत् त्रेधा श्रुते विश्रुतम्,
किं त्वस्मादनिराकृतं द्वयमिदं चाभीप्सितं तत् त्रयम् ॥ ६२ ॥

साध्यधर्मविशिष्टेऽपि पक्षत्वं धर्मिणि श्रुतम् ।
अन्यथानुपपत्त्यैकलक्षणो हेतुरिष्यते ॥ ६३ ॥

दमु(मू)नोमानयं देशः प्रोच्यते पक्षधर्मता ।
हेतूदितं धूमवत्त्वादनुमानं सुधीहितम् ॥ ६४ ॥

हेतुप्रयोगतो द्वेधा तथोपपत्तिरन्वयः ।
अन्यथानुपत्तिस्तु व्यतिरेकः पुरोदितः ॥ ६५ ॥

परस्मै प्रतिपाद्यत्वात् प्रत्यक्षादेः परार्थता ।
तथैवमनुमानस्य सर्वत्रेयं पर(रा)र्थता ॥ ६६ ॥

विशेषाद् व्युत्पादयितुमधुना मन्दमेधसः ।
पञ्चावयवविख्यातमनुमानमुदीरितम् ॥ ६७ ॥

प्रतिबन्धप्रतिपत्तेरास्पदं यस्य लक्षणम् ।
द्वेधा साधर्म्यवैधर्म्यभेदात् दृष्टान्त एव सः ॥ ६८ ॥

प्रकाश्यते साधनधर्मसत्ता तस्यां कृता साध्यसुधर्मसत्ता ।
साधर्म्यदृष्टान्त इति प्रदिष्टो यत्रास्ति धूमो दहनस्तु तत्र ॥ ६९ ॥

साध्याभावे साधनस्याप्यभावो वैधर्म्योक्तेर्वै स दृष्टान्त एषः ।
शोचिःकेशाभावतोऽस्याप्यभावो धूमस्यास्मिन् ज्ञेय एव द्रहे सः ७० ॥

साध्यधर्मिणि सद्धेतोरुपसंहरणं यथा ।
धूमश्चात्र प्रदेशेऽयं तस्मादुपनयः स्मृतः ॥ ७१ ॥

तत्पुनः साध्यधर्मस्य पूर्वयोगेन भाषितम् ।
तत्तस्मादग्निरत्रायमेतद् निगमनं स्मृतम् ॥ ७२ ॥

य एवं च स एवं तौ दृष्टान्तोपनयौ स्मृतौ ।
पाकस्थानं निगमनं मन्दधीसिद्धये त्रयम् ॥ ७३ ॥

चारित्रनिम्नगानाथसमुल्लासनचन्द्रमाः ।
भूयो भद्रं स मे दद्यात् गुरुश्चारित्रसागरः ॥ ७४ ॥

सूरिः श्रीविजयप्रभस्तपगणाधीशो नतोर्व्वीश्वरः,
कल्याणादिमसागराह्वगुरवः प्राज्ञा यशःसागराः ।
तच्छिष्यस्य यशस्वतः कृतिरियं स्याद्वादमुक्तावली,
तार्तीयीकतयानुमानविलसद्गुच्छोऽ[यमत्रा]प्यभूत् ॥ ७५ ॥

श्रीशुभविजयकृता

# ॥ स्याद्वादभाषा ॥

सम्यक्तत्त्वज्ञानक्रियाभ्यां निश्रेयसाधिगमः ।

जीवाजीवपुण्यपापाश्रवसंवरनिर्ज्जराबन्धमोक्षास्तत्त्वानि ।

स्वपरव्यवसायि ज्ञानं प्रमाणम् ।

तत्प्रामाण्यं स्वतः परतश्च । ज्ञानस्य प्रमेयाव्यभिचारित्वं प्रामाण्यं ।

तदितरत्त्वऽप्रामाण्यमिति ।

तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्चेति ।

तद् द्विविधं प्रत्यक्षं च परोक्षं च । स्पष्टं प्रत्यक्षम् ।

तद् द्विविधं सांव्यवहारिकं पारमार्थिकं च ।

तत्राद्यमिन्द्रियनिमित्तमनिन्द्रियनिमित्तं च ।

एतद्द्वितयमवग्रहेहावायधारणाभेदादेकैकशश्चतुर्विकल्पम् ।

पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् । तद्विकलं सकलं च ।

अस्पष्टं परोक्षम् । स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदात्पञ्चप्रकारम् ।

अनुमानं द्विप्रकारं स्वार्थं परार्थं च । तत्र हेतुग्रहणसंबन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम् । निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः ।

इष्टमबाधितमसिद्धं साध्यम् । पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात्

हेतुप्रयोगस्तथोपपत्त्याऽन्यथानुपपत्त्यैव वा ।

प्रतिबन्धप्रतिपत्तेरास्पदं दृष्टान्तः । स द्वेधाऽन्वयव्यतिरेकभेदात् ।

हेतोरुपसंहार उपनयः । प्रतिज्ञायास्तूपसंहारो निगमनम् ।

स हेतुर्द्विधा उपलब्ध्यनुपलब्धिभेदात् ।

उपलब्धेरपि द्वैविध्यमविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्च,

तत्राविरुद्धोपलब्धिर्विधिसिद्धो षोढा, साध्येनाविरुद्धव्याप्यकार्यकारण-पूर्वचरोत्तरचरसहचरभेदात् । विरुद्धव्याप्याद्युपलब्धिः प्रतिषेधे षोढा ।

अनुपलब्धेरपि द्वैरुप्यमविरुद्धानुपलब्धिर्विरुद्धानुपलब्धिश्च ।
तत्राविरुद्धानुपलब्धिः प्रतिषेधसिद्धौ सप्तधा
स्वभावव्यापककार्यकारणपूर्वोत्तरसहचरानुपलब्धिभेदात् ॥
विरुद्धानुपलब्धिर्विधौ पञ्चधा
विरुद्धकार्यकारणस्वभावव्यापकसहचरानुपलम्भभेदात् ॥
आप्तवचनाज्जातमर्थज्ञानमागमः । उपचारादाप्तवचनं च ।
अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्तः ।
सहजसामर्थ्यसङ्केताभ्यामर्थबोध (निबन्ध) नं शब्दः ।
तस्य विषयः सामान्यविशेषाद्यनेकात्मकं वस्तु ।
अनुवृत्तव्यावृत्तप्रत्ययगोचरत्वात्पूर्वोत्तराकारपरिहारावाप्तिस्थिति-
लक्षणपरिणामेनार्थक्रियोपपत्तेश्च ॥
सामान्यं द्वेधा तिर्यगूर्द्ध्वतादिभेदात् ।
विशेषश्च द्वेधा पर्यायव्यतिरेकभेदात् । अज्ञाननिवृत्तिर्हानोपादानोपेक्षाश्च
फलम् । तत्प्रमाणाद् भिन्नमभिन्नं च, प्रमाणफलत्वान्यथानुपपत्तेः ।
प्रमाणस्वरूपादेरन्यत्तदाभासम् ।
अज्ञानात्मकानात्मप्रकाशकस्वमात्रावभासकनिर्विकल्पसमारोपाः प्रमाणस्य
स्वरूपाभासाः ।
असिद्धविरुद्धानैकान्तिका हेत्वाभासाः ॥
प्रमाणेनासिद्धान्यथानुपपत्तिरसिद्धः, परिणामी शब्दश्चाक्षुषत्वात् ।
विपरीतान्यथानुपपत्तिर्विरुद्धः, अनित्यः पुरुषः प्रत्यभिज्ञानादिमत्त्वात् ।
विपक्षेप्यविरुद्धवृत्तिरनैकान्तिकः अनित्यः शब्दः प्रमेयत्वात् ।
अन्वये दृष्टान्ताभासा असिद्धसाध्यसाधनोभयाः अपौरुषेयः शब्दः
मूर्तत्वादिन्द्रियसुखपरमाणुघटवत् विपरीतान्वयश्च यदपौरुषेयं
तदमूर्तं विद्युदादिनातिप्रसङ्गात् ।
व्यतिरेकेऽसिद्धतद्व्यतिरेकाः परमाण्विन्द्रियसुखाकाशवत्

विपरीतव्यतिरेकश्च यन्नामूर्तं तन्नापौरुषेयमिति ।

अनाप्तवचनप्रभवं ज्ञानमागमाभासः ।

सामान्यमेव विशेष एव तदुद्वयं वा स्वतन्त्रमित्यादिरस्य विषयाभासः ॥

प्रमाणप्रतिपन्नार्थैकदेशपरामर्शो नयः ।

द्रव्यार्थिकः पर्यायार्थिकश्च । आद्यो नैगमसङ्ग्रहव्यवहारभेदात् त्रेधा ।

अन्यान्यगुणप्रधानभूतभेदाभेदप्ररूपणो नैगमः ।

धर्मद्वयादीनामेकान्तिकप्रार्थक्याभिसन्धिर्नैगमाभासः ।

सामान्यमात्रग्राही परामर्शः सङ्ग्रहः ।

द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभासः ।

सद्विशेषप्रकाशको व्यवहारः ।

यः पुनरपारमार्थिकं द्रव्यपर्यायप्रविभागमभिप्रैति स व्यवहाराभासः ।

पर्यायार्थिकश्चतुर्धा । ऋजुसूत्रः शब्दः समभिरूढ एवम्भूतश्च ।

सर्वथाद्रव्यापलापी तदाभासः । कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः

तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः ।

पर्यायध्वनिभेदादर्थनानात्वनिरूपकः समभिरूढः ॥

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः ॥

क्रियाश्रयेण भेदप्ररूपणमेवम्भूतः ।

क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपन् तदाभासः ।

नयवाक्यमपि स्वविषये प्रवर्त्तमानं विधिनिषेधाभ्यां सप्तभङ्गीमनुव्रजति ।

चैतन्यलक्षणः परिणामी ज्ञानादिधर्मभिन्नाभिन्नःकर्ता साक्षाद्भोक्ता

स्वदेहपरिमाणः प्रतिशरीरं भिन्नः पौद्गलिकादृष्टवाँश्च जीवः ।

स च द्विविधो मुक्तः सांसारिकश्च ।

एतद्विपरीतोऽजीवः । स च धर्माधर्माकाशकालपुद्गलभेदात्पञ्चविधः ।

पुद्गलाः स्पर्शरसगन्धवर्णवन्तः ।

स्पर्शा मृदुकठिनगुरुलघुशीतोष्णस्निग्धरूक्षाः ।
रसाः तिक्तकटुकषायाम्लमधुराः । गन्धौ सुरभ्यसुरभी । कृष्णादयो वर्णाः ।
शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तः पुद्गलाः ।
पुद्गला द्वेधा परमाणवः स्कन्धाश्च । सत्कर्मपुद्गलाः पुण्यम् ।
तद्विरीतं तु पापम् । बन्धस्य मिथ्यात्वाऽविरतिकषाययोगलक्षणहेतव
आस्रवः । तन्निरोधःसंवरः ।
जीवस्य कर्मणा अन्योन्यानुगमात्मा संबन्धो बन्धः ।
बद्धस्य कर्मणः शाटे निर्ज्जरा । देहादेरात्यन्तिको वियोगो मोक्षः ।
विरुद्धयोर्धर्मयोरेकधर्मव्यवच्छेदेन स्वीकृततदन्यधर्मव्यवस्थापनार्थं
साधनदूषणवचनं वादः । तत्प्रारम्भकश्चात्र जिगीषुस्तत्त्वनिर्णिनीषुश्च ।
स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां परं पराजेतुमिच्छुर्जिगीषुः ।
तत्त्वं प्रतिष्ठापयिषुस्तत्त्वनिर्णिनीषुः । अयं च द्वेधा स्वात्मनि परत्र च ।
प्रारम्भकप्रत्यारम्भकावेव मल्लप्रतिमल्लन्यायेन वादिप्रतिवादिनौ ।
प्रमाणतः स्वपक्षस्थापनप्रतिपक्षप्रतिक्षेपावनयोः कर्म ।
वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्वधारणाबाहुश्रुत्यप्रतिभाक्षान्तिमाध्य-स्थ्यैरुभयाभिमताः सभ्याः ।

श्रीमद्रत्ननन्दिविरचिता

# ॥ जल्पकल्पलता ॥

## स्तबकः-१

वक्तृत्वं च कवित्वं च, विद्वत्तायाः फलं विदुः ।
न कवित्वं न वक्तृत्वं, सोऽधीतोऽपि नरः खरः ॥ १ ॥

वाग्गित्वं कवितान्वितं यदि तदा गङ्गाम्बुना दक्षिणा-
वर्त्तःकम्बुरपूरि मञ्जरितवानुर्वीरुहः स्वर्गिणाम् ।
जातः शीतकरः कलङ्करहितः सौभाग्यवत्याः शिर-
स्याबद्धं मुकुटं स्फुरत्सुरभितालब्धाञ्चनं काञ्चनम् ॥ २ ॥

येषां कोमलकाव्यकौशलकलालीलावती भारती,
तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते ? ।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता-
स्तैःकिं मत्तकरीन्द्रकुम्भशिखरे नारोपणीया नखाः ? ॥ ३ ॥

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले,
तर्के वा मयि संविधातरि समं लीलायते भारती ।
शय्या वास्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता,
भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम् ॥ ४ ॥

साम्यं पिप्पलपारिजातकरभक्ष्माभृद्दृषद्द्युमणी
खद्योतद्युतिमालिसागरसरःस्वर्णारकूटादिवत् ।
षट्तर्कोपनिषन्निषण्णमतिना तत्क्लेशलब्धोष्मणा-
मेतेन प्रभुणा भणामि भवतां जाघट्टि भट्टाः कथम् ? ॥ ५ ॥

त्वत्तीरे तरुकोटरान्तरगतो गङ्गे ! विहङ्गो वरं,
त्वन्नीरे नरकान्तकारिणि वरं मत्स्योऽथवा कच्छपः ।
नैवान्यत्र मदान्धसिन्धुरघटासङ्घट्टघण्टारणत्-
कारत्रस्तसमस्तभूपललनालब्धस्तुतिर्भूपतिः ॥ ६ ॥

पीयूषद्रवकुण्डनिर्गतबृहज्जम्बालपिण्डोज्ज्वलं,
भुञ्जानो दधि माहिषं किमगमस्त्वं जाड्यमुद्रामरम् ? ।
किंवा तावकहृन्निकेतनमिदं वस्त्रक्लृप्तानन
द्वारा बन्धनशङ्किताऽपशकुना विद्या विवेशैव न ? ॥ ७ ॥

यच्चण्डद्युतिमण्डलं तुलयति स्मेरीकृतास्मद्दृशाऽ-
म्भोजं भो ! जगदीशदर्शितमतव्योमान्तविद्योतकम् ।
विद्यागन्धनिधानमानमधुपस्तोमानपेतद्विष-
च्चेतः कैरवभैरवस्फुरदनुच्छिष्टार्थयुक्तिच्छवि ॥ ८ ॥

मृत्सौरभ्यमिवाम्बुसेचनमनोनेम्योरिव प्रस्वनः,
पत्रिस्तोम इवाञ्जनं घनमिव श्लिष्टं तडिद्विभ्रमाः ।
दीपाकम्पनतेव मारुतलयं धूम्येव धूमध्वजं,
हेतुः सैष तमन्वमीमपत नः शुद्धः सुधीसाक्षिकम् ॥ ९ ॥

यस्मात्त्वदाशयकुशेशयशे (श) त्स्यते तत्,
कार्यत्वलक्षणबलक्षशकुन्त्यपत्यम् ।
भूभूधरप्रभृतिषु प्रथितप्रतीप
भावेषु चाम्रककुभादिषु बम्भ्रमीति ॥ १० ॥

दोषोल्लासवशप्रसृत्वरतमस्काण्डे दिदेदीपया-
मासानोऽवयवप्रदेशविषयो भेदस्त्वया दीपकः ।
अस्माभिः परमाणुतः प्रकटतामानेष्यमाणं पुरो,
दुर्वारव्यभिचारदीर्घरसनं निद्ध्याय विध्यास्यति ॥ ११ ॥

जातो यस्य विभागभिन्मयगडुः पीडावहोऽसम्भवाङ्-
गुष्ठाव्यासिदृढाङ्गुलीयुगलतः प्रस्फोटनिष्पीडितः।
मत्पीयूषमयोक्तियुक्तियुवतीसूतः सतां वल्लभः,
सोऽयं हेतुगृहे तुलामुपगतो दोषः शिशुः खेलतु ॥ १२ ॥

स्वप्नान्तः सुरतां पुरा कृतवता केनापि किं नार्पया-
मासे दर्पणदर्पणप्रगुणितं पण्याङ्गनाया धनम् ? ।
इत्थं यादृशमाबिभर्त्ति गगनं संस्थानितां तत्कृतां,
हेतुस्तादृगुपैतु जातु चतुरानैकान्तिकत्वं तु नः ॥ १३ ॥

कक्षीकृतद्विपक्षीकः, सोम साम्यधरः स मे ।
किं नु हंसो न मासो न, व्यासो वाचां सुधामुचाम् ॥ १४ ॥

गृहीते वादिना वाक्ये, तद्वाक्यग्रहणं हि यत् ।
प्रतिबन्दीति सा प्रोक्ता, विवादक्रमकोविदैः । ॥ १५॥

दिग्वासो दर्शनैकः शिवपुरमगवीकाममामन्त्रयस्व,
स्वान्तं किं वस्तु सत्यास्तुलयति कमलाध्यासतः को मरालम् ।
अर्थिभ्यः किं कदर्यः कथयति पवनः किं करोत्याह विष्णुः
कीदृग्वर्षासुजोऽब्दस्तव भवति वदेः कीदृशो हेतुरेषः ॥ १६ ॥

जिह्वारङ्गतरङ्गिता दशनरुग्मुक्तावलीमालिनी,
वाक्पीयूषनदी मदीयवदनावासे वसन्ती सती ।
एकान्ते क्रमपक्षदक्षपुरुषं नारीव याऽरीरमत्,
सूते सम्प्रति सा प्रभेदसुतयोः सश्रीकमेतद्युगम् ॥ १७ ॥

या जज्ञे जनकं विनैव गणपो बो(पैर्वो)भुज्यते याष्टभिः,
पण्यस्त्रीरिव कृत्रिमप्रणयिनी यानार्यसुभ्रूरिव ।
केकीवाञ्छितपञ्चवर्णमपि यन्नामाब्दहेलातुला-
कन्यातालुषु ताड्तिेव यदिता तत्याज सा स्वालयं ॥ १८ ॥

बोधो नौयानवृक्षस्यदकिरहिलयस्वप्नराज्येन्द्रजाल-
व्योमोर्वीमेलमायोल्मुकरयमृगतृष्णाम्बरश्यामिकानाम् ।
अभ्रोच्चानुच्चभावाग्रहमिलनवियद्बालबप्पीहपाथो
लौहित्यर्द्धीन्दुशङ्खप्रमुखकपिशताशुक्तितारोत्तराणाम् ॥ १९ ॥

द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किंरूपा, दृष्टा मानेन केनचित् ? ॥ २० ॥

गत्वा यौगमतेऽक्षिपाणियुगपच्छीतेतरस्पर्शतः,
स्याद्वादं जगदीशदर्शितमसावातिष्ठिपद्विष्टपे ।
तत्पुण्यादिव देवतावदनतामग्निर्जगाम व्रजद्-
धूमव्याजमघव्रजं निजमजत्यानर्ज तेजस्विताम् ॥ २१ ॥

युक्तिजालजलभाजिदुर्द्धरैः साधनोरुमकरैः करालिते ।
मज्जयन्नजनि जल्पनीरधौ, लोहनौवदितरेतराश्रयः ॥ २२ ॥

भूतानां निचयो विचेतनतयाचान्तोऽपि चञ्चूर्यते,
काये सत्यसुचेतनाप्रलपतां लौकायितानामपि ।
रङ्गादङ्गमृदङ्गमङ्गलमिलद्धोङ्कारबद्धोद्यमा,
नर्त्तिष्यन्ति गृहाङ्गणे युवतयो वर्द्धापनं कुर्वताम् ॥ २३ ॥

न च नाशोऽस्ति भावस्य, न चाभावस्य सम्भवः ।
भावाः कुर्युर्व्ययोत्पादौ, पर्यायेषु गुणेषु च ॥ २४ ॥

गोविन्दोऽनुयुनक्ति मुक्तिगमनेच्छूनां मनः कीदृशं ?
संबोधं मतिमोदनस्य सुधिया पक्वस्य सम्पाद्यते ।
किंभूतां सुभटः करोत्यरिघटां दान्तप्रदानाद्वृता
न्यार्थं तद्वद हेतुरापदियता कां तावकोऽसिद्धताम् ॥ २५ ॥

अस्ति स्वस्तिकरस्तमस्तिरयिता श्रीनन्दिरत्नोरवि-
स्तत्पादप्रणये परायणतया कोकायते यः कविः ।
आद्यस्तत्कृतजल्पकल्पलतया क्रोडीकृतःसाधना-
सिद्ध्याख्यस्तबको बभूव बहुलामोदः सुधीमण्डनः ॥ २६ ॥

# स्तबकः-२

कौशैयांशुकखण्डमण्डितमरुद्धूतक्वणत्किङ्किणि,
ब्राह्मीकेलिनिकेतकेतनधृतश्रीः केयमिन्दूज्ज्वला ।
निर्याति ब्रुवतः कुलध्वनिमुनेरेषा मुखाम्भोरुहा-
दस्यार्द्राधरबिम्बरुक्कबरिता दन्तद्युतां धोरणी ॥ २७ ॥

हेतुः साध्यं गमयितुमलं किन्तु दृष्टान्तवर्त्ती,
न स्याद्यद्वा नृपतिरपि न द्वे विधातुं समर्थः ।
क्रीडामग्नप्रसृतकरणीन्द्रेषु वातायनेषु,
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ २८ ॥

वेणिः कृष्टकृपाणवद्यदि तदापद्येत किं भीष्मता ?
वक्त्रं पर्वमृगाङ्कवद्यदि तदापद्येत किं श्यामिका ?
तन्व्याः काञ्चनवद्वपुर्यदि तदापद्येत किं ताड्यता ?
........................................................ ॥ २९ ॥

त्वदरिमधुपनीपप्रायसाध्यप्रतीप -
प्रथनपटुभयेद्धः स्पष्टदृष्टो विरुद्धः ।
तवकतयविलोक्योत्सर्पिकल्लोलजल्प -
जलजलनिधिसेतुः स्यात्कथं सैष हेतुः ॥ ३० ॥

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥ ३१ ॥

एतावन्नयनस्य विश्वजनताऽनालोक्यता सङ्गतिं,
नागच्छन्त्य(त्य) पि तावकादविरताधीताऽनघच्छन्दसः ।
एतस्मात्पतति स्म निःस्मयहृदस्तेन प्रपन्ना वयं,
स्मस्तां पत्तनकण्टकाशनशकृद्गोलाऽशनन्यायतः ॥ ३२ ॥

प्रेक्षावतां यतो वृत्तिर्व्यासाऽऽस्ते कार्यवत्तया ।
प्रवर्तेत विनार्थं न, सोऽपि यद्धीः स्तनन्धयी ॥ ३३ ॥

तेषु त्रिषु त्रिनेत्रस्य, कृपया यदि तत्क्रिया ।
सृजेत्तच्छुभमेवेदं, भुवनं नोदितस्तया ॥ ३४ ॥

शस्येतराऽतः करवीरमालानुकारिणीयं व्यभिचारवत्ता ।
परासनार्थं (य)*प्रगुणीकृतं ते, पर्यस्करोत्तस्करतुल्यहेतुम्॥ ३५ ॥

चेतो वः कमलाकरोति किमिह प्रश्नोत्तरे के वद(व्याकुरु)
प्राक्पुण्यापगमेन का किमकरोल्लक्ष्मीवतोऽप्यालये ।
श्रीरामस्य समागमोऽवनिभुवा लङ्कास्थया किं कृतस्-
त्वद्धेतुःक्रियते स्म काननवनस्पत्यादिभिः कीदृशः ॥ ३६ ॥

दुष्टोपाधिविधिन्तुदा विधुरितो दुर्युक्तिभूर्युक्तिभू-
च्छायच्छिद्भवदुक्तहेतुशशिनस्तेजोधुनानोऽधुना ।
विद्वन्मानसनीरजन्मसुकृतोल्लासस्तदभ्यन्तरे,
हेले हेलितुलां वहेत न कथं हेतुर्महेच्छो मम ? ॥ ३७ ॥

एवं च पञ्चतयदोषविशेषदुष्टा
द्धेतोरतोगिरिशविश्वविधानसिद्धेः ।
या तावके मनसि तिष्ठति कामना सा,
नारी नपुंसकपतिप्रसवस्पृहाभा ॥ ३८ ॥

अस्ति स्वस्तिकरस्तमस्तिरयिता श्रीनन्दिरत्नो रवि-
स्तत्पादप्रणये परायणतया कोकायते यः कविः ।
श्लिष्टस्तत्कृतजल्पकल्पलतया शेषाब्धिसंख्योदयद्-
दोषाख्यः स्तबको बभूव सुधियामाद्येतरो मण्डनम् ॥ ३९ ॥

## स्तबकः-३

अथ दूषितसाधनस्तपोधनरत्नं स चिरत्नधीनिधिः ।
कृतसाध्यनिरासवासनः, पुनराख्यज्जनराजिरञ्जनः ॥ ४० ॥

विन्नाणं निअणेअवत्थुविसरं गंतूण नूणंतरा,
बाणो वेरिगणं रणंमिव परिच्छिंदेइ एवं पुणो ।
तुम्हाणं वयणं मणावि न मणं पीणेइ तस्सप्पणो,
धम्मत्तेण हु निग्गमो कह बहिं सुक्खाइआणंपि व ? ॥ ४१ ॥

पच्चूसावसरे गुणा वि र(वि) णो तेणेव कोडीकया,
वीसुं वित्थरिऊण किं न किरणा भासिंति भूमंडलं ।
एवं अप्पसगासपत्तपसरं नाणंपि नाणापय-
त्थाणंफासिअ पायडेइ पडलं ता वुत्तदोसो कहं ? ॥ ४२ ॥

किरणा गुणा न दव्वं, तेसिं पयासो गुणो नया दव्वो ।
जं नाणं आयगुणो, कहमदव्वो स अण्णत्थ ॥ ४३ ॥

लोहोवलस्स सत्ती, आयत्था चेव भिन्नदेसंपि ।
लोहं आगरिसंती, दीसइ इह कज्जपच्चक्खा ॥ ४४ ॥

एवमिह नाणसत्ती, आयत्था चेव हंदि लोगंतं ।
जइ परिछिंदइ सम्मं, को णु विरोहो भवे तत्थ ॥ ४५ ॥

.................................................. ।
.................................................. ॥ ४६ ॥

धत्तेऽमोघसुदर्शनप्रसरतामन्यद्धितं तन्यते,
सत्यादिव्रजवाञ्छितानि बिभृतेऽवश्यं महोपास्यता ।
यच्चातीवतरां जने जनयति श्रीनन्दनस्योदयं,
तत्कस्तार्किकपुङ्गवो न गणयेत्कृष्णैकरूपं तमः ॥ ४७ ॥

वातोद्धूतनिकेतकेतुचपलव्यालः पयोमानुषी,
भूतानर्गलपांशुलः सलिलचूकुम्भीयमानाचलः ।
माणिक्योपमदीपकः प्रवहणप्रायालयः फेनिल,-
स्ताराभिस्तिमिराब्धिराप विपुलां पश्यामि तच्छ्यामिकः ॥ ४८ ॥

यद्येवं न तदोरुशार्वरतमस्यन्दोलितः श्रीमत,-
श्छिद्रापेतकपाटकापवरके पल्यङ्क आफल्यते ।
यद्वा कौतुकमीलिताक्षिकमलद्वन्द्वस्य पुंसः कर-
व्यापारादिह नास्ति वास्ति तम इत्युत्पद्यते प्रत्ययः ॥ ४९ ॥

अथ तिमिरं रूपि तदा, भ्रमरमरिचकं चकास्ति (तत्र) कुतः ।
इति यदि हृदि सन्दिग्धे, त्वदादिरादिश्यते तदिदम् ॥ ५० ॥

कुर्व्वाणे मयि कुम्भिपाटनचिकीः पञ्चाननापाटन-
न्यायात्तावकयुक्तिगुम्फयुगपद्ध्वंसाय तूष्णीकताम् ।
स्वच्छन्दं यदियत्त्वयोदितमिह प्रामाणिकानामलङ्-
कर्मीणं हृदयानि कार्म्मणयितुं कर्म्म (कुर्मः) किमप्युत्तरम् ॥ ५१ ॥

नन्वालोकसहायसंगतदृगालोक्यस्त्रिलोक्यन्तरे,
वर्त्तिष्णुः सकलोऽपि रूपविषयस्तेनान्धकारोऽप्यसौ ।
श्यामः स्याद्यदि तत्प्रकाशवियुतीभूयाक्षिसाक्षात्कृते,
नाक्षत्रं भवतीति बाधक इह प्रत्यक्षताऽसम्भवः ॥ ५२ ॥

ध्वान्ते रूपवती(ति) प्रतिष्ठितवति श्यामत्वसम्यग्धिया,
साध्यं बाध्यतमं दधत्यनुमितिः सत्या यदि स्यादियम् ।
रूपाभावबलेन तर्हि मरुतोऽप्यस्पर्शवत्त्वानुमा,
नैवाकीर्त्तिरिवाघजात् स्खलयितुं शक्त्या स्फुरन्ती सती ॥ ५३ ॥

आन्वीक्षिकीपक्ष्मलचक्षुरेषा, साक्षात्त्रिपक्षत्रिवलीविलासम् ।
त्वां दक्षतालक्षितमीक्षमाणा, साकाङ्क्षहृद्वीक्षयति स्वकीयम्॥ ५४ ॥

कारागारान्धकारप्रकरभृशभृते नष्टनिद्रोपयोगी,
तिष्ठत्यापादकण्ठं सुखहरणखलैः शृङ्खलैर्वेष्टिताङ्गः ।
तत्रापि व्यापितापप्रसरदविरलस्वेदसन्दोहदम्भा-,
ज्जाने पानीयमस्योत्तरति नरपतिप्रौढमानाधिरूढम् ॥ ५५ ॥

आवासश्रीसरसिजदृशः काव्यकारिप्रसिद्ध-
श्यामच्छायादिमरसभृतां (ता) भ्यन्तराले हृदीव ।
गर्भागारे भृशभृतवतिच्छायया संचरिष्णौ,
घर्मार्त्तस्याखिलतनुलता शीतलस्पर्शवित्तिः ॥ ५६ ॥

पत्रया गच्छति सत्युपेत्य निकटं स्नेहातिरेकोज्जरी
कृ(जृ)म्भद्दीपकदम्भमूर्त्तिमदनो(ना) गोरोचनश्यामला ।
आलोके निजभोक्तरि व्रजति सत्यायाति च द्राक्तरां,
पृष्ट्यै कातरमानिनी किमु निशि च्छायेयमच्छेतरा ॥ ५७ ॥

कण्ठालिङ्गनमश्रमं विलुठनं पीनस्तनोरस्तटे,
हस्ताम्भोरुहलालनं मृगदृशो गण्डस्थलीमण्डनम् ।
श्रोणिस्पर्शनमंह्रिपद्मपतनं किं भूयसा तेजसः,
सर्वं सौख्यमभून्मणेरधिगमे धिक् चन्द्रचन्द्रद्युतेः ॥ ५८ ॥

सादित्वान्नाशित्वादालोकतमोऽभिधानराशियुगात् ।
निजसामग्र्युत्पादान्नालोकाभावता तमश्छाये ॥ ५९ ॥

तथा सति च-स्वैरं सर्ववि (दो व) दन्तु विदुरंमन्याः परे वादिनः,
स्वं देवं पुरवैरिणं भवति यत्काणापि राज्ञी निजा ।
श्रद्धेयः सुधिया तथाविधतया न त्वन्धकारादिकं,
द्रव्यासव्यभिचारकेवलनवद्रव्याभिधानेन सः ॥ ६० ॥

केनेदं सचराचरं विरचयांचक्रे जगत्तत्पुनः,
स(ल्) लोकोत्तरसंविदे(सु) मुकुरे संक्रान्तमालोक्यते ।

किं यद्वाणि कियन्ति कानि जगति द्रव्याणि चेति त्रयं,
वक्तुं त्वद्रसनासुखासनसनासीना श्रुतस्वामिनी ॥ ६१ ॥

रूपं पञ्च विपुद्गला न दधते पञ्चास्तिकाया विना,
कालं पुद्गलजीवयुग्मवियुताश्चत्वार एवाक्रियाः ।
आद्यौ लोकनभोविभू तदपरे भोम(ग) भ्रमव्यापृताः,
सन्त्येषु द्वितयेऽन्तिमा इति षडप्यस्तोकवाच्यास्पदम् ॥ ६२ ॥

शुद्धद्रव्यस्थितिबुधपरीक्षासु लब्धप्रकर्षमुद्रां
बिभ्रत्त्रिभुवनजनस्यापि नामानुरूपाम् ।
सर्वाभीष्टार्प्पणपटुकलं टङ्कशालीयमन्त
श्चेतोभूमिन्यसितुमुचितं शासनं जैनमेव ॥ ६३ ॥

तं जागर्ज्जदनल्पजल्पजलधेरुत्तीर्य तत्तीरस-
त्ताम्बूलीतुलिताः श्रयंस्तदनु तास्ताश्चङ्गरङ्गाः स्तुतीः ।
चञ्चच्चारुवचःप्रपञ्चनचमच्चक्राणचेतोऽञ्चितो,
भट्टेशोऽर्भकभारतीति यतिनं मध्येसभं सोऽभणत् ॥ ६४ ॥

एवं निर्भरशङ्करस्फुरदहङ्कारान्धकारोत्कर-
ध्वंसोल्लासिमहःसमूहदशदिक्कुक्षिंभरैः कौविदैः ।
सोत्कण्ठं निजकण्ठकर्णहृदयालङ्कारतां लम्भितः,
श्रीमानप्रथयज्जने स मुनिपो नामार्थमाणिक्यताम् ॥ ६५ ॥

अस्ति स्वस्तिकरस्तमस्तिरयिता श्रीनन्दिरत्नो रवि -
स्तत्पादप्रणये परायणतया कोकायते यः कविः ।
श्लिष्टस्तत्कृतजल्पकल्पलतिकामैकादिमग्यम्बका
सिद्ध्याख्यः स्तबक स्तृतीय उदयांचक्रे सुधीमण्डनः ॥ ६६ ॥

श्रीमज्जिनदत्तसूरिविरचिता

# ॥ सन्देहदोलावली ॥

पडिबिम्बिय पणयजयं जस्संघिरुहोरुमुउरमालासु ।
सरणागयं व नज्जइ तं नमिय जिणेसरं वीरं ॥ १ ॥

कइवयसन्देहपयाणमुत्तरं सुगुरुसंपयाएणं ।
वुच्छं मिच्छत्तमओ तमन्नहा होइ संसइयं ॥ २ ॥

सुगुरुपयदंसणं पइ कयाभिलासेहिं सावयगणेहिं ।
परमसुहकम्मपयडिप्पडिसिद्धतदिट्ठसङ्गेहिं ॥ ३ ॥

गीयत्थाणं गुरूणं अदंसणाओ कहं भवे सवणं ।
सवणं विणा कहं पुण धम्माधम्मं विलक्खिज्जा ॥ ४ ॥

कहमित्थ पयट्टाणं धम्मो संभवइ कहमधम्मो य ।
धम्मो वि दुहा इह दव्वभावभेएहिं सुपसिद्धो त्ति ॥ ५ ॥

गड्डुरियपवाहाओ जो पइनयरं दीसए बहुजणेहिं ।
जिणगिहकारवणाई सुत्तविरुद्धो असुद्धो अ ॥ ६ ॥

सो होइ दव्वधम्मो अपहाणो नेय निव्वुइं जणइ त्ति ।
सुद्धो धम्मो बीओ महिओ पडिसोयगामीहिं ॥ ७ ॥

जेण कएणं जीवो निवडइ संसारसागरे घोरे ।
तं चेव कुणइ कज्जं इह सो अणुसोयगामी उ ॥ ८ ॥

जेणाणुट्ठाणेणं खविय भवं जंति निव्वुइं जीवा ।
तक्करणरुई जो किर नेओ पडिसोयगामी सो ॥ ९ ॥

पढमगुणट्ठाणे जे जीवा चिट्ठंति तेसिं सो पढमो ।
होइ इह दव्वधम्मो अविसुद्धो बीयनामेणं ॥ १० ॥

अविरयगुणट्ठाणाईसु जे य ठिया तेसिं भावओ बीओ ।
तेण जुया ते जीया हुंति सबीया अओ सुद्धो ॥ ११ ॥

पढमम्मि आउबन्धो दुक्करकिरियाउ होइ देवेसु ।
तत्तो बहुदुक्खपरंपराओ नरतिरियजाईसु ॥ १२ ॥

बीए विमाणवज्जो आउयबन्धो न विज्जए पायं ।
सुखित्तकुले नरजम्म सिवगमो होइ अचिरेण ॥ १३ ॥

पाणिवहाई पावट्ठाणाणट्ठारसेव जं हुंति ।
होइ अहम्मो तेसु य पवट्टमाणस्स जीवस्स ॥ १४ ॥

तत्तो तिरिअनरयगई अट्टं रुद्दं च दुन्निज्झाणाइं ।
सग्गापवग्गसुहसंगमो कहं तस्स सुमिणे पि ॥ १५ ॥

तम्हा कयसुकयाणं सुगुरूणं दंसणं फुडं होइ ।
कत्तो निप्पुण्णाणं गिहम्मि कप्पदुमुप्पत्ती ॥ १६ ॥

भव्वा वि केइ नियकम्मपयडिपडिकूलयाइ संभूया ।
जत्थ सुसाहुविहारो संभवइ न सिद्धिसुक्खकरो ॥ १७ ॥

पयईए वि हु तेसिं सद्धम्मपसाहणुज्जयमणाणं ।
सुगुरूणं अदंसणओ संदेहसयाणि जायंति ॥ १८ ॥

ते संदेहा सव्वे, गुरुणो विहरंति जत्थ गीयत्था ।
गंतुं पुट्ठव्वा तत्थ इहरहा होइ मिच्छत्तं ॥ १९ ॥

संसइयमिह चउत्थं ति निस्संदेहाण होइ सम्मत्तं ।
जुगपवरागमगुरुलिहियवयणदंसणसुईहिंतो त्ति ॥ २० ॥

"तो ते भव्वा जेसिं होइ सडावस्सए वि इइबुद्धी ।
कह सिद्धंते वुत्तं भवसिवदुहसुहकरं एयं ॥ २१ ॥

एसो किर संदेहो जायइ केसिं पि इत्थ भव्वाणं ।
परिग्गहपरिमाणं सावगेण एगेण जं गहियं ॥ २२ ॥

तं अन्नो वि हु भव्वो घित्तूणं पालए पयत्तेणं ।
जइ ता जुत्तं किमजुत्तमित्थ तत्थुत्तरं एयं ॥ २३ ॥

भवभीरू संविग्गो सुगुरूणं दंसणम्मि असमत्थो ।
ता तं पवज्जिऊणं पालइ आराहगो सो वि ॥ २४ ॥

जइ तं गीयत्थेहिं सुगुरूहिं दिट्ठमत्थि सत्थोत्तं ।
ता तं परो वि गिण्हउ तग्गहणं नन्नहा जुत्तं ॥ २५ ॥

ठवणायरिए पडिलेहियम्मि इह साविगाइ वंदणयं ।
किं सावगस्स कप्पइ सामाइय-माइकरणं च ॥ २६ ॥

कप्पइ न एगकालं वंदणसामाइयादि काउं जे ।
एगस्स पुरो ठवणायरियस्स य सड्ढसड्ढीणं ॥ २७ ॥

उस्सुत्तभासगाणं चेइयहरवासिदव्वलिंगीणं ।
जुत्तं किं सावयसावियाणं वक्खाणसवणं त्ति ॥ २८ ॥

तित्थे सुत्तत्थाणं सवणं तित्थं तु इत्थ णाणाई ।
गुणगणजुओ गुरू खलु सेससमीवे न तग्गहणं ॥ २९ ॥

इहरा ठवेइ कन्ने तस्सवण मिच्छमेइ साहू वि ।
अबलो किमु जो सड्ढो जीवाजीवाइअणभिन्नो ॥ ३० ॥

कीरइ न वत्ति जं दव्वलिंगिणो वंदणं इमं पुट्ठं ।
तत्थेयं पच्चुत्तरं लिहियं आवस्सयाईसु ॥ ३१ ॥

पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होइ ।
कायकिलेसं एमेव कुणइ तह कम्मबंधं च ॥ ३२ ॥

जो पुण कारणजाए जाए वायाइओ नमोक्कारो ।
कीरइ सो साहूणं सड्ढाणं सो पुण निसिद्धो ॥ ३३ ॥

पोसहियसावयाणं पोसहसालाइ सावगा बहुगा ।
गंतुं पगरणजायं, किं पि वियारिंति तं जुत्तं ॥ ३४ ॥

केणइ गीयत्थगुरुं, आराहंतेण पगरणं किंचि ।
सुट्ठुसुयं नायं चिय तस्सत्थं कहइ सेसाणं ॥ ३५ ॥

तं च कहंतं अन्नो, जइ पुच्छइ को वि अवरमवि किंचि ।
जइ मुणइ तं पि सो कहइ, तस्स अह नो भणिज्जे मं ॥ ३६ ॥

एयं खलु गीयत्थे, गुरुणो पुच्छिय तओ कहिस्सामि ।
इय जुत्तीए सड्ढो भवभीरू कहइ सड्ढाणं ॥ ३७ ॥

उद्दिट्ठट्ठम्मि चउद्दसि पंचदसमी उ पोसहदिणं ति ।
एयासु पोसहवयं संपुन्नं कुणइ जं सड्ढो ॥ ३८ ॥

जइ कह वि अट्ठमी चउद्दसी य तत्थ वि य होइ वयजोगो ।
वयसद्देणं भण्णइ नियमो कल्लाणमाइओ ॥ ३९ ॥

तस्संजोगा जो को वि गुरुतरो निव्वियाइओ नियमा ।
सो कायव्वो जं निव्वियंति एकासणा गरुयं ॥ ४० ॥

पडिकमणं च कुणन्तो विज्जुपईवाइएहिं जइ कह वि ।
वारा दो चउ फुसिओ तो बहु फुंसिओ त्ति आलोए ॥ ४१ ॥

जइ को वि होइ दक्खो ता जावइयाणि हुंति फुसणाणि ।
तावइयाणि गणिज्जा अतिमुद्धो जो बहुं भणइ ॥ ४२ ॥

पइदिवसं सज्झाए अभिग्गहो जस्स सयसहस्साई ।
सो कम्मक्खयहेऊ अहिगो आलोयणाए भवे ॥ ४३ ॥

एगासणाइ पञ्चसु तिहीसु जस्सत्थि सो तवं गरुयं ।
कुणइ इह निव्वियाई पविसइ आलोयणाइतवे ॥ ४४ ॥

जइ तं तिहिभणियतवं अन्नत्थदिणे करिज्ज विहिसज्जो ।
अह ण कुणइ जो सो गुरुतवो वि जं तिहि तपे पडइ ॥ ४५ ॥

उस्सग्गनयेणं सावगस्स परिहाण साडगादवरं ।
कप्पइ पाउरणाइं न सेसमववायओ तिण्णि ॥ ४६ ॥

एवं कयसामाइया वि साविगा पढमनयमएणेह ।
कडिसाडग कंचुयमुत्तरिज्ज-वत्थाणि धारेइ ॥ ४७ ॥

बीयपएणं तिण्हुवरि तिहिं उ वत्थेहिं पाउअंगी उ ।
सामाइयवयं पालइ तिपयं परिहरइ पडिकमणे ॥ ४८ ॥

जइ कंचुगाइ रहिया गिण्हइ सामाइयं च सुमरिज्जा ।
तो पच्छा अंगट्टं करेइ गरहेइ पुव्वकयं ॥ ४९ ॥

एलामुत्थाइगयं भिन्नं भिन्नं जलं भवे दव्वं ।
वण्णरसभेयओ जं दव्वविभेओ वि समयमओ ॥ ५० ॥

जइ पोसहसालाए सड्डासड्डी वि पोसहम्मि ठिया ।
एगत्थ खिवन्ति भवे तमेग दव्वं न संदेहो ॥ ५१ ॥

जेण दिसापरिमाणं कोसचउक्कं दुगं च कयमित्थ ।
कोसद्धं पि न गच्छइ तह वि हु बन्धोत्थ विरईओ ॥ ५२ ॥

जइ गालियं च दहियं तहा वि विगई जलं न जं पडइ ।
पडिए वि जले तं निव्वियम्मि विहिए न कप्पइ य ॥ ५३ ॥

जइ मंडियाइ जोगो पायकओ को वि होइ गुडचुण्णो ।
उव्वरइ सो वि नियमा गुडविगई होइ अणुवहता ॥ ५४ ॥

'सव्वाइं पुप्फलाइं नाणाविहजाइरसविभिन्नाइं ।
पुप्फलमेगं दव्वं उवभोगवयम्मि विन्नेयं' ॥ ५५ ॥

"एवं जलकणघयतिल्ललोण विभिन्नाइं विविहजाइगयं ।
एगं दव्वं परिगहपमाणवयगहियगणणाए" ॥ ५६ ॥

गब्भरूपप्पमुहाणं वयणं चुम्बइ कओपवासाई ।
तस्स उ पच्चक्खाणे भंगो संभवइ जुत्तीए ॥ ५७ ॥

दहितरमज्झक्खित्तो गोहुमचुण्णो य पक्कविगई उ ।
सिद्धो लग्गइ नियमा तह वीसंदणमओ विगई ॥ ५८ ॥

विज्जुयपईवेणं फुसिओ तं फुसणयं तओ हुज्जा ।
भिन्नं भिन्नं नारीमंजारीणं च संघट्टणं ॥ ५९ ॥

पयडंकुरं तु धन्नं जलभिन्नं तं तु भण्णइ विरूढं ।
सेसं जलभिन्नं पि हु चणगाइ विरूढमवि न भवे ॥ ६० ॥

भुंग्गाणि विरूढाणि य हुंति अचित्ताणि तह विरुहनियमो ।
ताणि न भक्खइ तह फुट्टककडी असइ न हु साहु त्ति ॥ ६१ ॥

जइ वायंगणपमुहं पि तीमणं सया अचित्तमपि न जई ।
गिण्हइ पवित्तिदोसं सम्मं परिहरिउं इच्छन्तो ॥ ६२ ॥

जीए मुत्थाइकयं अज्जेव जलं तु फासुगं तीए ।
कल्लेव कीरइ जइ तमेगदव्वं न संदेहो ॥ ६३ ॥

अप्पडिलेहियमुहणंतगे य सामाइयं करिज्जा उ ।
अविहिकए पच्छित्तं थोवं तेणं पडिक्कमइ ॥ ६४ ॥

सामाइकसुत्तम्मि उच्चरिए कह वि होइ जइ फुसणं ।
तो तं आलोएज्जा भंगो से नत्थि सामाइए ॥ ६५ ॥

उक्कालियम्मि तक्के विदलक्खेवे वि नत्थि तद्दोसो ।
अतत्तगोरसम्मि पडियं संसप्पए विदलं ॥ ६६ ॥

गोहुमघयगुलदुद्धाणि मेलिउं तो कडाहगे पयइ ।
तं धणुहुज्जा पक्कन्नविगइ नियमा न दव्वं तं ॥ ६७ ॥

जइ को वि अभिग्गहिओ टिप्पणयं अन्नसावयग्गहियं ।
पालितो वि हु तं सुगुरुदंसणे कुणइ मुक्कलयं ॥ ६८ ॥

जत्थासणे निसन्नो खणं पि तं लग्गए उ संखाए ।
जत्थ कडिं पि हु दिज्जइ गणिज्जए सा वि सिज्जति ॥ ६९ ॥

तो बहुकज्जपसाहणकए वि परिभमइ सुबहुट्ठाणेसु ।
सो सयणासणमाणं लंघइ जइ कुणइ किर थोवं ॥ ७० ॥

नाणाजाइसंमुब्भवतंडुलसिद्धं पुढो भवे दव्वं ।
निच्छयनयेण ववहारओ नये दव्वमेगं ति ॥ ७१ ॥

पंचासगेसु पंचसु वंदणगा नेव साहुसड्ढाणं ।
लिहिया गीयत्थेहिं अन्नेसु य समयगंथेसु ॥ ७२ ॥

देवालयम्मि सावयपोसहसालाइ सावगाणेगे ।
जइ हुंति ते वि तिपणट्ठ साविया जंति निसुणंति ॥ ७३ ॥

जत्थ न हु सुविहिया हुंति, साहुणो सुविहिया वि ते इत्थ जे ।
गीयत्था सुत्तत्थदेसगा तेसिं विरहम्मि ॥ ७४ ॥

जं मुणइ सावओ, तं कहेइ सेसाणं किं न जं पुट्ठं ।
पच्चुत्तरमेयं तत्थ कहइ जइ सो वि याणाइ तं ॥ ७५ ॥

सुगुरूणं च विहारो ज़त्थ न देसम्मि जायए कह वि ।
पयरणवियारकुसलो सुसावगो अत्थि ता कहउ ॥ ७६ ॥

आलोयणानिमित्तं कहं तवं कुणइ साविया सड्ढो ।
इय पुट्ठे इणमुत्तरमिह भन्नइ भो निसामेह ॥ ७७ ॥

पंचपरमेट्ठिपुव्वं ठवणायरियं ठविउं विहिणाओ ।
तत्थ खमासमणदुगं दाउं मुहपुत्तिप्पेहणयं ॥ ७८ ॥

तत्तो दुआलसावत्तवन्दणंते य संदिसाविज्जा ।
आलोयणातवं तो दिज्जा अण्णं खमासमणं ॥ ७९ ॥

एवं भण्णइ तत्तो करेमि आलोयणातवं उचियं ।
उस्सग्गेणं तत्तो कुणइ तवं अत्तसुद्धिकए ॥ ८० ॥

सज्झायतवसमत्थो जइ सड्ढो साविगा वि अह हुज्जा ।
ता अणिगूहियविरिया कुणंति तवमागमुत्तमिणं ॥ ८१ ॥

आलोअणानिमित्तं पारद्ध तवम्मि फासुगाहारो ।
सचित्तवज्जणं बंभचेरकरणं च अविभूसा ॥ ८२ ॥

इंगालाई पनरसकम्मादाणाण होइ परिहारो ।
विकहोवहासकलहं पमाय भोगतिरेगं च ॥ ८३ ॥

कुज्जा नाहिगनिद्दं परपरिवायं च पावट्ठाणाणं ।
परिहरणं अप्पमाओ कायव्वो सुद्धधम्मत्थे ॥ ८४ ॥

तिक्कालं चियवंदणमित्थ जहन्नेण मज्झिमेण पुणो ।
वारा उ पंच सत्त च उक्कोसेणं फुडं कुज्जा ॥ ८५ ॥

पडिक्कमणे चेइयहरे भोयणसमयम्मि तह य संवरणे ।
पडिक्कमणसुयणपडिबोहकालियं सत्तहा जइणो ॥ ८६ ॥

पडिकमिओ गिहिणो वि हु सत्तविहं पंचहा उ इयरस्स ।
होइ जहन्नेण पुणो तीसु वि संझासु इय तिविहं ॥ ८७ ॥

सुसाहूजिणाणं पूयणं च साहम्मियाणं चिंतं च ।
अपुव्व पढणसवणं तदत्थपरिभावणं कुज्जा ॥ ८८ ॥

रुद्दट्टं झाणदुगं, वज्जित्ता तह करिज्ज सज्झायं ।
आयारे पंचविहे सया वि, अब्भुज्जमं कुज्जा ॥ ८९ ॥

उस्सुत्तभासगा जे ते दुक्कर कारगा वि सच्छंदा ।
ताणं न दंसणं पि हु कप्पइ कप्पे जओ भणियं ॥ ९० ॥

जे जिणवयणुत्तिन्नं वयणं भासंति जे य मन्नंति ।
सद्दिट्ठीणं तद्दंसणं पि संसारवुड्ढिकरं ॥ ९१ ॥

'नाणम्मि दंसणम्मि य चरणम्मि तवम्मि तह य वीरियम्मि ।
आयरणं आयारो इय एसो पंचहा भणिओ' ॥ ९२ ॥

नाणं दंसणमहचरणमित्थ पत्तेयमट्ठभेइल्लं ।
बारस तवम्मि छत्तीस वीरिए हुंति इमे मिलिया ॥ ९३ ॥

आलोयणातवो पुण इत्थं एगासणं तिहाहारं ।
पुरिमड्ढतवो इह जो सो सव्वाहारचागाओ ॥ ९४ ॥

तं होइ निव्विगइयं जं किर उक्कोसदव्वचाएण ।
कीरइ जं उक्कोसं तं दव्वं पुण निसामेह ॥ ९५ ॥

खीरी खंडं खज्जूर सक्करादक्खदाडिमाई य ।
तिलवट्टी वडयाइं करंबओ चूरिमं च तहा ॥ ९६ ॥

नालियरं मोइयमंडिया संतलिय भज्जियाचणए ।
आसुरिअंबिलियापाणगाइ किल्लाडियाइ तहा ॥ ९७ ॥

तन्दुलकढिअं दुद्धं घोलं एयाइं भूरिभेयाणि ।
उक्कोसगदव्वाइं वज्जिज्जा निव्विगइयम्मि ॥ ९८ ॥

विगई दव्वेण हया जायं उक्कोसियं भवे दव्वं ।
केइ तयं विगइगयं भणंति तं सुयमयं नत्थि ॥ ९९ ॥

कल्लाण तिहीसु पुणो जं कीरइ निव्विगइयमिह ।
तत्थ खंडादिदव्वमुक्कोसियं तु उस्सग्गओ वज्जे ॥ १०० ॥

गीयत्था जुगपवरा आयरिया दव्वखेत्तकालन्नू ।
उक्कोसयं तु दव्वं कहंति कयनिव्वियस्सा वि ॥ १०१ ॥

उवहाणतवपइट्ठो असमत्थो भावओ य सुविसुद्धो ।
उक्कोसगं तु दव्वं विगइच्चाए वि तस्सुचियं ॥ १०२ ॥

जो पुण सइ सामत्थे काऊणं सव्वविगइपरिहारं ।
भक्खइ खंडाइयं नियमा सो होइ पच्छित्ती ॥ १०३ ॥

गिहिणो इह विहियायंबिलस्सं कप्पंति दुन्नि दव्वाणि ।
एगं समुचियमन्नं बीयं पुण फासुगं नीरं ॥ १०४ ॥

गोहुमचणगजवेहिं भुग्गेहिं सत्तुएहिं छासीए ।
घुघुरियावेढिमियाइडुरियाहिं न तं कुज्जा ॥ १०५ ॥

जो पुण सिलियाइं विणा मुहसुद्धिं काउं इत्थमसमत्थो ।
सो कडुयकसायरसं सिलियं गिण्हइ न से भंगो ॥ १०६ ॥

आहारतिगं वज्जिय सजियं न जलं पि पियइ पवररसं ।
जो किर कयउववासो सो वासं लहइ परमपदे ॥ १०७ ॥

पायच्छित्तविसोहणकरणखम्मम्मि तवम्मि पारद्धे ।
जलपिवणं कप्पइ नो निसाइ निव्वियाइ सेसतवे ॥ १०८ ॥

पायाईणब्भंगो निव्वियायंबिलोववासेसु ।
वायाइपीडिएहिं कायव्वो अन्नहा न करे ॥ १०९ ॥

आलोयणाविसुद्धि जो काउं वंछए स सज्झायं ।
वज्जिउं कालवेलं, करेइ ताउ इमे चउरो ॥ ११० ॥

चउपोरिसिओ दिवसो दिणमज्झंते य दुन्नि घडियाओ ।
एवं रयणीमज्झे अंतम्मि य ताओ चत्तारि ॥ १११ ॥

चित्तासोए सियसत्तमट्ठमीनवमि तिसु तिहीसुं पि ।
बहुसुयनिसिद्धमेयं न गुणिज्जुवएसमालाइ ॥ ११२ ॥

उवएसपए पंचासए तह पंचवत्थुगसयगं ।
सयरी कम्मविवागं छयासि य तह दिवड्ढसयं ॥ ११३ ॥

जीवसमासं संगहणिकम्मपयडी उ पिंडसुद्धि च ।
पडिकमणसमायारिं थेरावलियं सपडिक्कमणं ॥ ११४ ॥

सामाइयचीवंदणवंदणयं काउसग्गसुत्तं च ।
*पच्चक्खाणं तह पंचसंगहं अणुवयाइविहिं* ॥ ११५ ॥

खित्तसमासं पवयणसंदोहुवएसमालपणसुत्तं ।
सावयपन्नत्ति नरयवन्नणं सम्मसत्तरियं ॥ ११६ ॥

अट्ठयसोडसगाइं तह वीसं वीसियाउ पसमरई ।
जिणसत्तरियं एवमाइं जत्थ सिद्धन्तपरमत्थो ॥ ११७ ॥

भन्नइ तं सेसं पि हु पवयणमिह चउसु कालवेलासु ।
न गुणिज्जा सेयासुं चित्तासोए तिसु तिहीसु ॥ ११८ ॥

पढमं पडिकमिऊणं इरियावहियं जहासमायारिं ।
निंदं विकहं कलहं हासक्किड्डाइं वज्जन्तो ॥ ११९ ॥

वयणदुवारे मुहणंतयं च वत्थंचलं अह दाउं ।
सुत्तत्थे उवउत्तो सज्झायं कुणइ सुणइ पढे ॥ १२० ॥

चउरिक्कासणएहिं उववासो तह य निव्वियतएण ।
आयंबिलेहिं दोहिं बारसपुरिमड्ढ उववासो ॥ १२१ ॥

सज्झायसहस्सेहिं दोहिं एगो हविज्ज उववासो ।
कारणउ कस्सइ पुण अट्ठहिं दोकासणेहिं च ॥ १२२ ॥

संतम्मि बले संतम्मि वीरिए पुरिसकारि संतम्मि ।
जहभणियं सुद्धिकए करिज्ज आलोयणाइ तवं ॥ १२३ ॥

अह नत्थि सरीरबलं तवसत्ती वि हु न तारिसा होइ ।
भावो विज्जइ सुद्धो ता अववाएण हुज्ज तवं ॥ १२४ ॥

सुगुरूणं आणाए करिज्ज आलोयणातवं भव्वो ।
इय भणियसुत्तविहिणा सो लहु परमप्पयं लहइ ॥ १२५ ॥

केणावि सावएणं मुद्धेणं सिढिलसूरिपासम्मि ।
आलोयणा य गहिया पमाणमिह किं न सा होइ ॥ १२६ ॥

जमगीयत्थो सिढिलो आउट्टिपमायदप्पकप्पेसु ।
न वि जाणइ पच्छित्तं दाउं अह तं परं देइ ॥ १२७ ॥

तत्थ त्थि गाहगस्स वि दोसो सो दायगस्स अहिययरो ।
तित्थगराणाभंगो आणा वेसा जओ भणियं ॥ १२८ ॥

आलोयण चउभेया अरिहो अरिहम्मि पढमओ भंगो ।
अरिहम्मि अणरिहो पुण बीओ अरिहो वि जमणरिहे ॥ १२९ ॥

एसो तइओ जत्थेव अणरिहा दो वि सो चउत्थो उ ।
पढमो उस्सग्गेणं सुद्धो अववायओ बीओ । ॥ १३० ॥

तइओ पुण अच्चन्तावावायओ कम्मि होइ कस्स वि य ।
आणा वज्झोभंगो एस चउत्थो तओ दोसो ॥ १३१ ॥

दुण्ह वि य अयाणंते पच्चक्खाणं पि जं मुसावाओ ।
आलोयणा वि एवं गहिया हुज्जा मुसावाओ ॥ १३२ ॥

दो तिन्नि य विगईओ पचक्खन्तेण मुक्कला उ कया ।
ताऊ भोयणसमए सव्वा भुत्ता गुडेण विणा ॥ १३३ ॥

ता खंडसक्कराओ सो भुंजइ किं नवेति इय पुच्छा ।
(उत्तरमेवं) तत्थ उ सो वि न भक्खिज्ज खण्डाइ ॥ १३४ ॥

जइ पित्ताई रोगो सो खण्डाईहिं उवसमइ तस्स ।
ता तग्गहणं जुत्तं रसगिद्धीए न तं भुज्जे ॥ १३५ ॥

जं संगरराईओ भवंति विदलं नव त्ति पुट्ठाओ ।
तत्थेवं भन्नइ राइयाउ विदलं न भण्णंति ॥ १३६ ॥

वरहासाईसु ठाणेसु ताओ जं घाणगम्मि पक्खितुं ।
पीलिज्जंती तिलसरिसवुव्व तिल्लं वि य मुयंति ॥ १३७ ॥

जह किर चवलयचणया विदलं तह संगरा वि विदलं ति ।
दिणचरिया नवपयपयरणेसु लिहिया उ फलिवग्गे ॥ १३८ ॥

न य संगरबीयाओ तिल्लुप्पत्ती कया वि संभवइ ।
दलिए दुन्नि दलाई मुग्गाईणं व दीसंति ॥ १३९ ॥

एवं कंडुय गोवारपभिइमारन्नियं भवे बिदलं ।
एयं न सावएणं भुत्तव्वं गोरसेण समं भणियं ॥ १४० ॥

पंचुंबरि चउविगई हिमविसकरगे य सव्वमट्टीय ।
राईभोयणगं चिय बहुबीयणंतसंधाणं ॥ १४१ ॥

घोलवडावायंगण अमुणिय नामाइं पुप्फफलयाइं ।
तुच्छफलं चलियरसं वज्जह वज्जाणि बावीसं ॥ १४२ ॥

मणुय सुरतिरिय विसयं दुविहं तिविहेण थूलगमबंभं ।
सवसा चयामि मुत्तुं सयणाइ सदार कारवणं ॥ १४३ ॥

काए वि साविगाए विहिओ दिक्खातवो न उज्जमिओ ।
भावविसुद्धीइ फलं तहा वि से अत्थि इहरा नो ॥ १४४ ॥

अह सा सग्गहगहिया पासे सच्छंदसिढिललिंगीणं ।
कुणइ तवो नत्थि फलं ता तीसे होइ भूरिभवो ॥ १४५ ॥

अच्चन्तखुद्दसीला उवद्दवं कुणइ जो न पूयेइ ।
जस्सेरिस त्थि गुत्तम्मि देवया स कहं सड्ढोत्थु ॥ १४६ ॥

उस्सग्गेण न कप्पइ तीए पूयाइ तस्स सड्ढस्स ।
जइ मारइत्ता मारउ कुडुंबगं एस परमत्थो ॥ १४७ ॥

गीयत्थेणमगारच्छक्कमिह देसियं च सम्मत्ते ।
रायगुरु देवयावितिच्छेयबलगणभिओगा य ॥ १४८ ॥

ता इय अगारणिवेयणाओ धम्मत्थमन्नतित्थम्मि ।
वयणाओ अववाएण तीए नमणाईसु न दोसो ॥ १४९ ॥

इय कइवयसंसयपयपण्हुत्तरपयरणं समासेणं ।
भणियं जुगपवरागमजिणवल्लभसूरिसीसेण ॥ १५० ॥

पू. श्री. चिरन्तनाचार्यविरचितः

## ॥ गुरुतत्त्वप्रदीपः ॥

प्रणम्य श्रीमहावीर-मुत्सूत्रतिमिरच्छिदे ।
गुरुतत्त्वप्रदीपोऽयं, माध्यस्थ्यात् क्रियते मया ॥ १ ॥

अत्रोत्सूत्रप्रवृत्तस्सत्सूत्रानाभोगतः क्वचित् ।
पुनस्सूत्रे निमन्त्र्योऽहं, मातः ! शासनदेवते ! ॥ २ ॥

यद् रागद्वेषयोर्मध्ये, तिष्ठतीत्युच्यते बुधैः ।
मध्यस्थस्य द्विधा तु स्याद्, मिथश्च बृहदन्तरः ॥ ३ ॥

आद्यो न रागं न द्वेषं, स्पृशेत् तत्त्वं विचिन्तयन् ।
उच्यतेऽतस्तयोर्मध्ये तदभावमये स्थितः ॥ ४ ॥

अतत्त्वविषमुत्सृज्य, तत्त्वामृतमसौ श्रयेत् ।
विवेकी शुक्लपक्षश्च, राजहंस इवामलः ॥ ५ ॥

द्वितीयो न त्यजेद् राग-द्वेषौ तत्त्वं विचिन्तयन् ।
उच्यतेऽतस्तयोर्मध्ये, तत्स्वरूपमये स्थितः ॥ ६ ॥

कुपक्षोऽयं विवेक्तुं न, क्षमः खिन्नो विलक्षधीः ।
मध्यस्थोऽहमिति क्लृप्त-विकल्पोऽतत्त्वमाश्रयेत् ॥ ७ ॥

तत्त्वातत्त्वे श्रयत्यस्मिन्नतत्त्वमुदितं ततः ।
यत एष कुसन्दिग्ध-दृष्ट्या पश्यति ते समे ॥ ८ ॥

तत्त्वे तत्त्वाविदग्धोऽपि, कुपक्षादवतार्यते ।
सुधीभिर्न तु तत्त्वांश-दुर्विदग्धोऽवलेपवान् ॥ ९ ॥

यद्यप्यसौ सशूकः स्यात्, तत्त्वे त्वात्माऽवलेपतः ।
तत्त्वमत्सरिणां पङ्क्तौ, बभूव स्वामिनः पुरः ॥ १० ॥

सुनिश्चितं मत्सरिणो जनस्य, न नाथ ! मुद्रामतिशेरते ते ।
माध्यस्थमास्थाय परीक्षका ये, मणौ च काचे च समानुबन्धाः॥ ११ ॥

ततस्तत्त्वामृतं सेव्य-माद्यमाध्यस्थलक्षितम् ।
स्वर्गापवर्गसौख्यानि, जायन्ते यत्प्रभावतः ॥ १२ ॥

तत्त्वामृतं त्रिधा देव-गुरुधर्मप्रभेदतः ।
एतच्चोत्सूत्रसंयोगा-दतत्त्वविषमुच्यते ॥ १३ ॥

निश्चयो नय उत्सूत्रं, शैथिल्यमपि मन्यते ।
सूत्रार्थस्यान्यथाऽऽख्यानं, व्यवहारनयः पुनः ॥ १४ ॥

अविमूढोऽपि मिथ्यात्वे, लौकिकेऽसौ घनो जनः ।
लोकोत्तरे हि मिथ्यात्व-मोहे गुरुगते पतेत् ॥ १५ ॥

गुरुतत्त्वविमूढोऽत्र, मुह्यत्यपरतत्त्वयोः ।
असौ जनस्ततः स्पष्टं, गुरुतत्त्वं प्रदर्श्यते ॥ १६ ॥

त्याज्यः कुगुरुसंसर्गो, गुरुतत्त्वेक्षणोन्मुखैः ।
पार्श्वस्थादिर्बहिःस्थश्च, कुगुरुर्दशधा मतः ॥ १७ ॥

श्रितोऽत्राद्यश्चतुर्भेदः, प्रायः शैथिल्यकारणम् ।
स्वच्छन्दबाह्यौ स्वाच्छन्द्य-सङ्घबाह्यत्वकारणम् ॥ १८ ॥

संविग्नपाक्षिकाच्छेषः, शिथिलः स्वं परानपि ।
यथाच्छन्दो घनं बाह्योऽतिघनं पातयेद् भवे ॥ १९ ॥

एते स्वकर्मणा बाह्याः, पञ्चोत्सूत्रप्ररूपकाः ।
अभूवन् दुःषमाकालाद् भ्रमोद्भ्रामितचेतसः ॥ २० ॥

अनवस्थितकोत्सूत्रं, यथाच्छन्दत्वमेषु न ।
तदवस्थितकोत्सूत्रं, निह्नवत्वमुपस्थितम् ॥ २२ ॥

त्यक्ततीर्था ह्यमी वाऽभि- निवेशान्निह्नवास्ततः ।
अज्ञानात्क्रमसंसर्ग-भावे तीर्थं त्यजन्ति न ॥ २३ ॥

अज्ञेऽनभिनिवेशे तु, सङ्घाज्ञा शिष्यधीगुणैः ।
लौकोत्तराऽऽभिग्रहिक-मिथ्यात्वाद्यन्यथा त्वयि ॥ २४ ॥

वादिनोऽपि मिथो यूयं, कुपक्षास्सङ्घमागताः ।
सर्वेप्यन्यायिनस्स्यात, तस्करा इव भूपतिम् ॥ २५ ॥

मिथो वादाद् गता युयं, स्वयमेवाप्रमाणताम् ।
कण्टकः कण्टकेनैव, पट्टभक्तः क्रमोस्त्विह ॥ २६ ॥

सुत्रोक्ता निह्नवास्सस, तदाधिक्यकथा कथम् ? ।
जमालिनाशमित्यादि-सूत्रतो लभ्यते श्रुते ॥ २७ ॥

जमालिस्तीर्थकृद्दूषी, यूयं तीर्थस्य दूषकाः ।
सामान्यतः पुनस्सूत्रे, यदुक्ता व्यक्तितो न च ॥ २८ ॥

प्रसिद्धनिह्नवत्वं तद्भवतां भुवि भावि न ।
न भावि बोटिकत्वं वा, व्यक्तिश्छिन्नश्रुतेऽस्ति वा ॥ २९ ॥

भावि वा स्वल्पकालत्वमष्टोच्छ्वासनिषेधिवत् ।
ये सप्त स्वल्पकालाः स्युर्दृष्टान्तायापि ते श्रुते ॥ ३० ॥

राका भ्रष्टौष्ट्रिकः किञ्चिद्भ्रष्टे द्वौ च कवोष्णकौ ।
फलशाकादिकौ चातः, स्वल्पकालस्य सम्भवः ॥ ३१ ॥

कुपक्षाणां स्वशक्त्यापि, व्रतं चारित्रमेव न ।
नाज्ञानकष्टमेवातः, क्रियेत्यभिहितं बुधैः ॥ ३२ ॥

पार्श्वस्थादेर्दृढा द्रव्य-लिङ्गिनो गृहिलिङ्गिनः ।
कुलिङ्गिनश्च ज्ञातृत्वात्, तीव्रमिथ्यात्विनस्त्वमी ॥ ३३ ॥

जैनागमस्याश्रद्धानं, मुख्यमिथ्यात्वमुच्यते ।
श्रद्धानं गौणमिथ्यात्वं, मिथ्यादृष्ट्योर्द्वयोरपि ॥ ३४ ॥

*स्वकल्पितमतस्थायि, जिनोक्तागमसम्मतेः ।*
श्रद्धानमपि मिथ्यात्वं, गौणं तु देशदूषणात् ॥ ३५ ॥

मुख्यमिथ्यात्वमेष्वल्प-मपि तालपुटं विषम् ।
असाध्यत्वात्तदुत्तीर्योदधिं गोष्पदमज्जनम् ॥ ३६ ॥

अनल्पं मुख्यमिथ्यात्वं, गृहिलिङ्गिकुलिङ्गिनाम् ।
यद्यपि स्यात् पुनस्साध्यं, वत्सनागविषं यथा ॥ ३७ ॥

मिथ्यात्वबन्धमाश्रित्य, लौकिकेभ्योऽधमा अमी ।
उत्तमाः पुनराश्रित्य, ग्रन्थिभेदक्रियाफले ॥ ३८ ॥

क्रियानुरागात् पञ्चैते, श्रिता मध्यमबुद्धिभिः ।
गताऽऽगमानुगामित्वाननुगामित्ववीक्षणैः ॥ ३९ ॥

बालः पश्यति लिङ्गं, मध्यमबुद्धिर्विचारयति वृत्तम् ।
आगमातत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥ ४० ॥

पूर्वमप्रावृतिः कार्ये, श्रमणानां ततोऽभिधाः ।
तास्ता हलायुधे तर्केऽप्याद्या नग्ना अतो जने ॥ ४१ ॥

प्रमा शत्रुञ्जये भुक्तिः स्थानं चैतत्तलाट्टिका ।
मिथ्यात्ववच्च लोकोक्त्या-ऽप्याद्यत्वे सत्पथो न ते ॥ ४२ ॥

पिण्डशुद्धिः कुतस्तेषां, द्रव्यक्षेत्रादितोऽत्र यैः ।
त्यक्त्वा माधुकरीं वृत्तिं, श्रितमेकत्र भोजनम् ॥ ४३ ॥

त्रस्तास्सुसङ्गतस्सङ्गे, हिंस्रे वान्ते च येऽपतन् ।
वह्न्यम्बुकुण्डिकापिच्छ-च्छत्रतृणपट्यदिके ॥ ४४ ॥

प्रायश्चित्तं न ते सङ्गा-दस्माद्भङ्गस्सकृन्न यत् ।
नातिचारोऽपवादो न, सदा भङ्गो व्रतेष्वसौ ॥ ४५ ॥

किं नाऽशक्यव्रताऽऽदान-भङ्गौ श्राद्धेऽनुगामिनि ? ।
व्रताऽभङ्गाद् भवद्भ्योऽपि, वृद्धः श्राद्धः प्रसज्यते ॥ ४६ ॥

त्वं च्युताविरतः स्वल्पा-रम्भोऽप्यग्रन्थताव्रते ।
मुदे प्रतिज्ञाऽऽढ्याऽऽत्तैव, चेत्तत्तेऽस्तु भवास्थितौ ॥ ४७ ॥

अवाच्यं यदचिन्त्यं तत्, तच्चाद्रष्टव्यमेव तत् ।
अज्ञानाः पशुधर्मास्ते, सुस्त्रीणां दर्शयन्ति ये ॥ ४८ ॥

अपास्ता यदि मर्यादा, द्रष्टव्याऽचिन्तनीययोः ।
अवाच्यस्य यथा नाम्ना, तदुच्चारो न किं मिथः ? ॥ ४९ ॥

गुरुदेवमुखोत्कण्ठा-ऽऽयतैर्लिङ्गं धिगीक्ष्यते ।
अञ्चलस्पर्द्धया स्वामी, ही ! नग्नत्वाद् विडम्बितः ॥ ५० ॥

शिवभूतिर्यथा सुत्रात्, नग्नत्वं शिश्रिये हठात् ।
सूत्रान्तरमनालोच्य, न तथा पूर्णिमामपि ॥ ५१ ॥

नग्नत्वं चित्तसामर्थ्या-दिति चेत्तद् भवत्वदः ।
वेश्यान्तस्तु कुलस्त्रीषु, पापाय स्वापवत् तव ॥ ५२ ॥

त्वच्छास्त्रमश्लथत्वाया-ऽवह्न्यादिः कोऽपि किं न ते ? ।
किञ्चोक्तः श्रावकोऽशक्ते-र्नोक्तं शक्यं यतेः किमु ? ॥ ५३ ॥

विलग्नोऽग्निर्ज्वलंस्तेऽसौ, शक्यस्यानुक्तितो ह्यतः ।
नाप्तस्त्वच्छास्त्रकृत्तन्मे-त्यभङ्गां नग्नतां श्रृणु ॥ ५४ ॥

कश्चित् पूर्णाधिकन्यून-नवपूर्वधरो मुनिः ।
स्वार्थायाऽऽश्रित्य तां गच्छेद् गच्छात् सिंह इवैकक: ॥ ५५ ॥

कायोत्सर्गः क्रियाकालं, विनाऽस्मिन् सप्तयामिकः ।
विहाराऽऽहारनीहारा-स्तृतीयप्रहरे दिवा ॥ ५६ ॥

खगाद्यवाञ्छितत्यज्य-मानभिक्षाग्रही च यः ।
अलाभे तु निराहारः, षण्मासानवतिष्ठते ॥ ५७ ॥

मार्गभेदी न सिंहेऽपि, शीतवाताऽऽतपाजितः ।
सप्तोत्कृष्टत एकत्र, वसेयुर्मौनिनो मिथः ॥ ५८ ॥

एवं समर्थे त्यक्तान्य-कार्येऽस्मिन्नग्नतां ददौ ।
प्रभावात् संवृतावाच्यः स्वयं तु त्रिजगत्प्रभुः ॥ ५९ ॥

मुनेर्भिक्षागतस्याप्य-वाच्ये दृष्टिः क्वचिन्मिता ।
नृणां स्त्रीणां व्रजेद् या सा ऽप्यदुष्टा शुभकालतः ॥ ६० ॥

निमित्तताऽग्निवस्त्रे ते-ऽनुमतिश्चानिषेधतः ।
स्वेदान्मे वस्त्रयूकाश्चेत्, तत्तेऽप्यावृतिजन्तवः ॥ ६१ ॥

यूकानां पालनं मे ते जन्तूनां हिंसनं पुनः ।
श्रुतं छिन्नं न किं यूयं, श्रुतोद्धारोऽप्यसौ न किम् ? ॥ ६२ ॥

श्रुतं छिन्नं न चेत्तत्ते, शास्त्रे तल्लक्षणं न किम् ।
सङ्घस्पर्द्धी तदित्थं त्वं, सङ्घः श्वेताम्बरोऽभवत् ॥ ६३ ॥

निशि पत्युर्दिवा देव-गुर्वोर्लिङ्गस्य दर्शनात् ।
नोक्ता मुक्तिर्यतः स्त्रीणां त्वदीये युक्तमेव तत् ॥ ६४ ॥

मूर्च्छा वस्त्राद् भवेत्ते चेद्, न स्त्रियास्तदतोऽर्पितम् ।
वस्त्रं त्वया ततो मुक्तिस्त्वं पुनर्लोकपापभाक् ॥ ६५ ॥

लिङ्गे त्वगिव वस्त्रं हि, न ते तापसवत्तव ।
भैक्षं मठादौ स्त्रीवर्जो, वस्त्रं च गृहिभोजने ॥ ६६ ॥

तापसापेक्षया जैनो, लौकिकश्च पथो न ते ।
जीवत्वादिस्वरूपैक्यान्, मुक्तिः स्त्रीणां नृणामिव ॥ ६७ ॥

सप्तम्युर्व्यगतेश्चेत्र, तदेवं तीर्थकृत्यपि ।
बलदेवा महात्मानस्तथा मुक्तिं व्रजन्ति किम् ? ॥ ६८ ॥

यथा जन्मादि वैरूप्यात्, परैर्नोक्तं सदाशिवे ।
त्वया स्त्रीत्वं तथा नाथे, जन्माद्यं किमुक्तं ततः ? ॥ ६९ ॥

मतिज्ञानादिषु स्याच्चेत्, क्षुधा हीना कियत्यपि ।
संपद्यते ततस्तस्या, अभावः केवले बलात् ॥ ७० ॥

कार्यं तिष्ठेदभिगृह्य, त्रीधोपादानकारणम् ।
तरौ नीरमिवाङ्गेऽन्न- मचिरस्थायि कारणम् ॥ ७१ ॥

मृत्पिण्डाद्यं घटादौ यत्, तच्चिरस्थायि कारणम् ।
आत्मादिकं यद् ज्ञानादौ, तत् सदास्थायि कारणम् ॥ ७२ ॥

दहनो दाह्यबाह्यः स्यान्, निःस्नेहो दीपकोऽथ चेत् ।
वह्निः केवलिनोप्यस्तु, निराहारस्तदाऽऽन्तरः ॥ ७३ ॥

शस्याङ्गभावान्नास्याग्नि-रन्तरित्यनृतं वचः ।
त्वच्छास्त्रे तैजसं ह्युक्तं, स्याद्भवान्तर्भवश्च हि ॥ ७४ ॥

विभोरपि भवस्थस्य, सप्रतिद्वन्द्वि यत् सुखम् ।
सातासाते अपि स्तस्तद्, राज्यकण्टकवद् युते ॥ ७५ ॥

प्रायोऽस्याल्पमसातं तु, न विरुद्धा क्षुधापि तत् ।
सर्व्वथाप्यसुखाभावे, मोक्षाभावः प्रसज्यते ॥ ७६ ॥

इदं सभासदामन्त-स्समक्षं सिद्धचक्रिणः ।
देवाऽऽचार्येण (वर्येण) वज्रेण, पाषण्डं खण्डितं तदा ॥ ७७ ॥

अत्यन्तकुगुरुत्वेन, प्रस्तावात् प्रागमी स्मृताः ।
आर्द्रगुप्तस्य शिष्योऽ-स्थाद्यापनीयश्चतुर्दशीम् ॥ ७८ ॥

यापनीयोऽपनीय स्वं; वस्त्रं नग्नाटनाटके ।
ततोऽपि क्षपणाऽऽभास-स्तस्थौ देशानुवृत्तितः ॥ ७९ ॥

वेषाय त्यज्यते देशो, वेषो देशाय नो पुनः ।
इत्यमन्ता ह्यसौ सङ्घ-बाह्यः सूत्रं पठन्नपि ॥ ८० ॥

## तृतीयो विश्रामः

कुपक्षकारका ! हेतु-वादेन वदताऽधुना ।
प्राप्ता ह्यागमता हेतु-वादाऽऽप्तैरागमैरपि ॥ ८१ ॥

लोकवादे श्रितो हेतु-र्युष्माभिरपि पण्डितैः ।
स्वविचारे निषिद्धः किं ?, निःशूकैर्लौकिकैरिव ॥ ८२ ॥

अनाप्तार्थनिषेधार्थं, हेतुवादः श्रुते वृतिः (स्मृतः) ।
सुवर्णानां परीक्षायै, हेतुवादः कषोपलः ॥ ८३ ॥

हेतुर्विचारे माध्यस्थ्यं, कुविचारे यथाऽऽग्रहः ।
तत्त्वज्ञाने विचारेपि, यथा ज्योतिषसंविदि ॥ ८४ ॥

हेतुः स्यात्कुविचारेऽपि, शास्त्रोक्तमात्रमेव वा ।
तत्त्वाप्रतीतौ चित्तस्य, ज्योतिषाऽमिलने यथा ॥ ८५ ॥

हेतुर्द्रव्ये यथा साक्षाद्भावात् द्रव्याणि सन्ति षट् ।
यदस्ति विश्वे विश्वस्मिन्, स्यात् सहेतुकमेव तत् ॥ ८६ ॥

न श्रूयते श्रुते त्वाद्यं, श्रितं श्रुतधरैर्वरैः ।
हेतुयुक्तियुतं यत्तच्छिन्नागममतं मतम् ॥ ८७ ॥

यस्य यत्राऽऽग्रहस्तत्र, स युक्तिं नयतीति न ।
यन्निनीषतिरुक्ताऽस्मिन्, प्रस्तावेऽन्यत्र सूरिभिः ॥ ८८ ॥

आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा ।
पक्षपातरहितस्य तु युक्ति-र्यत्र तत्र मतिरेति निवेशम् ॥ ८९ ॥

येषां चित्ते न हेतुः स्यात्, तेषामाभाति पातिनाम् ।
स्पष्टं त्रिजगदीशोपि, भगवानिन्द्रजालिकः ॥ ९० ॥

नाऽऽगमेऽपि क्वचिद्धेतु-दृष्टान्तौ दृष्टिमागतौ ।
तदुक्त्या तत्र दोषश्च, हेतुवादः क्व ते गतः ? ॥ ९१ ॥

उत्सूत्रसूत्रधारेण सुसूत्रं सूत्रितं त्वया ।
यत्तत्र हेतुदृष्टान्तौ, दोषाय व्यावहारिकौ ॥ ९२ ॥

आगमिकौ तु तौ तत्र, न दोषाय च तद्यथा ।
सत्यमेतत् श्रुतोक्तत्वा-दन्यश्रुतोक्तसत्यवत् ॥ ९३ ॥

लोकशास्त्रेषु कुत्राप्युक्तेऽन्यश्रुतोक्तसत्यवत् ।
दृष्टान्तोऽयं न दातव्य-स्तेष्वलीकं यतोऽखिलम् ॥ ९४ ॥

निह्नवोऽनुपधानी तु, बाह्यो नाऽऽद्यदिनेप्यभूत् ।
चैत्यस्थितौ बलिष्ठत्वात्, भ्रष्टत्वाच्चेति मन्यते ॥ ९५ ॥

चैत्यपालादिकाऽत्यर्थं, निषेधं वीक्ष्य यः किल ।
महानिशीथं तत्याज, गोष्ठामाहिलकैतवात् ॥ ९६ ॥

पश्चान्मत्वोपधानानि, यैर्यैरुत्थापनाऽऽदृता ।
मन्ये सुविहितास्ते ते, नाम्नां वसतिपालकाः ॥ ९७ ॥

कालदौःस्थ्येऽर्कवेदेऽस्था-च्चैत्येषु प्रचुरो व्रती ।
पौषधोकसि वस्वभ्राभ्रकुभिः श्रूयते त्विति ॥ ९८ ॥

कथं गृहीत्वा गुरुणा, स्वहस्तेनेति ते श्रुते ।
द्वादशावर्तवद् भूति-रित्थं दृष्टेति मन्यते ॥ ९९ ॥

त्वंत्पक्षसम्भवे मुग्धचित्त, शङ्का च माऽस्त्विति ।
अधुना ग्राह्यते माला तन्निजेनेति मन्यते ॥ १०० ॥

## चतुर्थ-विश्रामः ।

भेजे चन्द्रप्रभाचार्यो, गुरोः कस्याऽनुयोगतः ? ।
श्रुतोक्ताः पूर्णिमास्तिस्रः, श्रुतोक्ताचरणं त्यजन् ॥ १०१ ॥

यत्पुर्वोक्तपरोक्तयोः, परोक्तो बलवान् विधिः ।
इति तेनाऽत्र न ज्ञातं, गुरुस्तत्तस्य नाऽभवत् ॥ १०२ ॥

गुरुस्तस्याऽभवच्चेत् तदुत्सूत्री प्रथमोऽस्तु सः ।
स्वसदृग् यदभून्नास्य, गुरोर्गुरुपरम्परा ॥ १०३ ॥

गुरोः परम्पराऽऽसीच्चेत्, तत्साऽस्त्वन्यमतेष्वपि ।
नेति चेत्तन्न किं सर्व-मपि चैत्यादि पौर्णिमम् ॥ १०४ ॥

किं पत्तनमते चैत्य-शासने यूयमप्रमाः ? ।
देशात् पराऽऽर्हताऽऽचार्य-नृपाभ्यां ताडिताश्च किं ? ॥ १०५ ॥

कृताः सङ्घेन बाह्याः किं, सङ्घः सङ्घो न सोऽन्यथा ।
सन्तानमखिलं चन्द्र-प्रभस्यैवाव्रतं च किम् ? ॥ १०६ ॥

जीवन्मृताया वन्ध्यायाः, प्राच्याऽप्राच्याः स्तनन्धयाः ।
राकारक्ता न किं ? राका-सक्रियत्वाक्रियत्वतः ॥ १०७ ॥

किं बृहत्पङ्क्तिवल्लोके, किमाद्या च चतुर्दशी ? ।
कृता चेद् राकया तत्तल्लोपे लुप्तैव पूर्णिमा ॥ १०८ ॥

यदा त्वद्गुरुणा राका, श्रिता तीर्थमभूत्तदा ।
नाभूत्किं तदभूच्चेत् त-त्तस्याऽऽज्ञां ही लुलोप सः ॥ १०९ ॥

तन्नाभूच्चेत् तदैते किं, धर्म इत्यक्षरे यदि ।
तीर्थं ते त्वद्गुरुस्तीर्थकृन्न तत्किं हि तत्ततः ॥ ११० ॥

अनुसङ्घमिति ब्रूते, नमस्तीर्थाय तीर्थकृत् ।
यत्तत्तदाज्ञाऽवज्ञावा-ननन्तभवभाग् भवेत् ॥ १११ ॥

अर्हदर्थोक्तिवत्संङ्घा-दिष्टं नोत्सूत्रतां व्रजेत् ।
नात एवोपसंहारो, दशवैकालिकेऽभवत् ॥ ११२ ॥

आज्ञायुक्तोऽत्र सङ्घश्चेत्, साऽऽज्ञा सङ्घक्रमो भवेत् ।
चतुर्दश्यां स तद्वोऽस्थि-सङ्घातत्वमुपस्थितम् ॥ ११३ ॥

अर्वाक् पर्युषणं वासः, पञ्चकेषु न वार्षिकम् ।
पञ्चम्यां तु द्विधाप्येतच्चतुर्थ्यां चेन्मतं ततः ॥ ११४ ॥

चतुर्मासी चतुर्दश्यां, न किं चूर्णौ न चेत् ततः ।
चतुर्थ्या अपि नाग्रासिश्चरितस्यानुवादतः ॥ ११५ ॥

सङ्घादृता तु सङ्घाज्ञाऽऽ-घाटयात्रापि सा प्रमा ।
चतुर्दश्यपि सङ्घात्ता, वेधनाशाय यत् श्रुते ॥ ११६ ॥

स्यात् पञ्चाशद्दिवघातो, विनैतामेकजातितः ।
पाक्षिकादिदिवासङ्ख्या-घातनास्तिर्भवेत्तथा ॥ ११७ ॥

सदृशी नापि पञ्चम्याः, पर्व्वत्वेन चतुर्थ्यपि ।
राकायास्तु सदृक्प्रोक्ता, पर्व्वत्वेन चतुर्दशी ॥ ११८ ॥

सदृग्दिनपरावर्तो, दिनस्तैन्याद् गुणाय तत् ।
पञ्चकानि प्रमेत्थं च , सप्तत्यादिदिनान्यपि ॥ ११९ ॥

एकोनत्रिंशको रूढ्या, त्रिंशो मासोऽत्र गण्यते ।
क्षणः पर्युषणाकल्प-चूर्णौ पर्युषणस्य यत् ॥ १२० ॥

ततः प्रोक्ता चतुर्थ्येव, यथा लघुकथास्वपि ।
नोक्ताऽऽचार्यान्यचर्येव, सङ्क्षेपाच्च चतुर्दशी ॥ १२१ ॥

कथायां विधिवादस्तु, तद्दशेनादिवाक्यतः ।
प्रमाऽऽद्यत्वं सकल्पत्वा-द्व्याख्याने पुस्तकेपि च ॥ १२२ ॥

सङ्घाच्चेत् तत्कथा चूर्णेः प्राक् सूरिमनु यत्कथा ।
अल्पाद्धा पुस्तकन्यस्त-सिद्धान्तमनु चूर्णयः ॥ १२३ ॥

कथायां सूरिपित्रादि-विशेषा ये श्रुते न ते ।
यत्तत्कालातिदूरत्वा-न्न स्मरन्त्यपि कस्यचित् ॥ १२४ ॥

अङ्गोपाङ्गप्रकीर्णादि यथा सङ्घार्प्पितं प्रमा ।
विशेषास्ते तथा सूरे-रन्यथाऽऽशातनाप्यलम् ॥ १२५ ॥

चतुर्दशी प्रमा सङ्घा-र्प्पि तैवाऽपि विना कथाम् ।
कथा त्वाऽऽचार्यचर्याऽऽद्य-दिनादर्थात्ततो मता ॥ १२६ ॥

अनन्तगुणवृद्ध्याऽऽढ्या-स्त्वत्तश्चेत्पूर्वसूरयः ।
तत्तन्मतकथालोपे, युक्तोऽनन्तभवंस्तव ॥ १२७ ॥

चतुर्व्याख्याऽऽद्यभावेन, सामान्यस्य कृतावपि ।
सूत्रत्वं सूत्रचूर्णीनां, सूत्रव्याख्यानरूपतः ॥ १२८ ॥

एतास्वेवमिदं गौणं, स्यात् तथा सूत्रवृत्तिषु ।
योगोद्वाहादिहीनं च, कथायां सूत्रमार्ग्गतः ॥ १२९ ॥

सप्रतिक्रमणा सङ्घ-बाह्या स्यात् पञ्चमी यथा ।
सङ्घाऽऽज्ञाभङ्गतो जाता, पूर्ण्णिमाऽप्यधुना तथा ॥ १३० ॥

उपवासश्चतुर्दश्यां, पुर्णिमायां तु न श्रुते ।
आद्या प्रायस्ततोऽप्यज्ञैः कृतैवोत्तरपारणे ॥ १३१ ॥

श्राद्धानां या चतुःपर्व्वी, सा नैवाऽऽलम्बनं यतेः ।
अनुश्राद्धं यतिर्यन्त्र, न तस्यामपि पाक्षिकम् ॥ १३२ ॥

पाक्षिकत्वे चतुर्दश्याः पाक्षिकीसप्ततिः प्रमा ।
चन्द्रप्रभगुरुभ्रातृ-मुनिचन्द्रेण निर्मिता ॥ १३३ ॥

षष्ठस्याशक्तितः प्रायो, यत्प्रोक्ताऽस्यां चतुर्दशी ।
तत्किं षष्ठतपोऽस्माकं, चतुर्मास्यां प्रदीयते ॥ १३४ ॥

राका चेत्पाक्षिकं लोकात्, तद्दीपाल्यस्तु वार्षिकम् ।
नाऽऽगमोऽपि न लोकोऽप्य-भिनिवेशाऽस्थिरात्मनाम् ॥ १३५ ॥

कालकाऽऽर्यकथायां च, कथावल्यां च साऽभवत् ।
पाक्षिकारोपणाऽलीका, ही कुतश्चिदकोविदात् ॥ १३६ ॥

प्राच्यैः कृतं ते नोत्सुत्रं, चेत्तत्पापं जनेऽपि न ।
प्रत्युतोग्रं जनोत्सूत्र-स्थैर्यात् प्राच्याऽऽग्रहाच्च तत् ॥ १३७ ॥

प्रतिष्ठां कुरुते यत्ते, यतेर्देशयतेर्यतिः ।
तत्प्रभोः किं न तां ? श्राद्ध-प्रतिष्ठा न श्रुते यतः ॥ १३८ ॥

यतिप्रतिष्ठा सिद्धान्ते पादलिप्तककल्पतः ।
उमास्वातिवाचकादि-कल्पेभ्योऽपि तु सिद्ध्यति ॥ १३९ ॥

यथात्राऽऽचार्यमन्त्रस्य, सूत्रोक्तत्वं प्रसिद्ध्यति ।
तथा यतिप्रतिष्ठाया-स्त्वत्परीष्टं प्रमा न च ॥ १४० ॥

## पञ्चमो विश्रामः ।

नाम्ना खरतरैर्मास-कल्पः छिन्नः प्ररूपितः ।
पश्यद्भिरप्यपश्यद्भि-रहो ! उत्सूत्रसाहसम् ॥ १४१ ॥

जिनपूजा न नारीणां, नाऽरीणामिव वार्यते ।
यैस्तेषामन्तरायस्य, फलं वक्तं प्रभुः प्रभुः ॥ १४२ ॥

जिनार्चां तन्वती काचित्, कदाचिद् यद् रजस्वला ।
अशक्यपरिहारं तत्, कुत्सिताऽङ्गकुगन्धवत् ॥ १४३ ॥

यतो धौतेऽपि देहे स्व-गन्धबन्धो न सर्वथा ।
प्रत्युताऽर्चार्चने रामा, संवृताङ्गी गुणाय तत् ॥ १४४ ॥

किमाशातनमिथ्यात्व-मित्याद्युक्तात् प्रतारणम् ।
यत्पूर्वोक्तात्तवैवेद-मङ्गनाशुद्धिरोपणे ॥ १४५ ॥

महासत्यो जिनार्चायां, सुलीना विश्रुताः श्रुते ।
तासां तु तत्र ते प्राय-श्चित्तमाशातना ततः ॥ १४६ ॥

क्षपणा निपुणास्त्वत्तो, भान्ति भाषोभयादतः ।
स्त्रीणां जिनाऽर्चा मुक्तिर्न, यन्मुक्तिर्न जिनाऽर्च्चनम् ॥ १४७ ॥

स्त्रियास्त्वदीये भावार्चा, न यतः कारणं विना ।
निषेधे द्रव्यतोऽर्चाया, निषेधो भावतोऽप्यभूत् ॥ १४८ ॥

सुक्षेत्रं शासनाघाटे, बोधिदं चैत्यमत्र तत् ।
अनन्तोदितपापार्त्ता, अबलाः किं निराकृताः ॥ १४९ ॥

देशनामोदनोत्पन्ने, द्रव्याऽर्चायां यतेरपि ।
कारितानुमती तीर्थ-च्छेदो माऽस्त्विति कारणात् ॥ १५० ॥

न स्त्रियास्ते यतोऽर्चायां, बाला वृद्धानुगो (गा) नरे ।
निषेधोऽर्चानुगो ज्ञाने तीर्थच्छेदस्तवेत्यभूत् ॥ १५१ ॥

यत् पाक्षिकं चतुर्दश्यां पञ्चम्यामिव वार्षिकम् ।
त्यक्त्वा राकाक्रमं सूत्रात्, मतं तत्किमु नाऽर्चनम् ? ॥ १५२ ॥

सूर्याभनाट्यवत्ते किं, नर्त्तक्यो न जिनाङ्गणे ? ।
चैत्याऽनायतनं यत्त-द्युक्तं चामुण्डिकस्य च ॥ १५३ ॥

जिनदत्तक्रियाकोश-च्छेदोऽयं यत्कृतस्ततः ।
सङ्घोक्तिभीतितस्तेऽभू-दारुह्योष्ट्रं पलायनम् ॥ १५४ ॥

करोषि श्रीमहावीरे, कथं कल्याणकानि षट् ? ।
यत्तेष्वेकमकल्याणं, विप्रनीचकुलत्वतः ॥ १५५ ॥

यच्च पर्युषणाकल्पे नक्षत्राण्येव षट् ततः ।
नक्षत्राणां तदाख्यानं, तानि कल्याणकानि न ॥ १५६ ॥

कल्याणकानामादेशो-ऽवसातव्यः श्रुतान्तरात् ।
सर्व्वस्मिन्नपि सिद्धान्ते, पञ्चैवैतानि सन्ति तु ॥ १५७ ॥

सूरिणा हरिभद्रेण, व्यक्तं पञ्चाशकेष्वपि ।
कल्याणकानि पञ्चैव, प्रोक्तानि चरमे जिने ॥ १५८ ॥

किं ते मृतगुरोर्मूर्तिः, पूज्यते कुसुमादिभिः ? ।
ही यतस्संयताऽवस्था सावद्याऽनुचिता मता ॥ १५९ ॥

चतुर्गत्यन्तरेवाऽस्य निवासो यत्ततोऽपि चेत् ।
साप्यवस्थाऽत्र पूजाऽर्हा, कोऽप्यपूज्यस्ततोऽस्ति न ॥ १६० ॥

## षष्ठो विश्रामः ।

किं षड्जीवनिकायेष्वप्यार्यरक्षितनाढयोः ।
बभूवाऽभिनिवेशो ? यत्समता द्विर्मता मता ॥ १६१ ॥

साम्याभावे हि हिंसा स्यात्, तथेयं समतामितिः ।
विश्वविश्वेन आदेशोऽभवत्तस्य विनाशतः ॥ १६२ ॥

यज्जिनैः सर्वथा त्याज्ये, वस्तुन्युत्कीर्तिता मितिः ।
तन्मुक्तिर्मुक्तये चेत्थं, नाशः साम्यमितेरभूत् ॥ १६३ ॥

शक्तौ विशिष्टानुष्ठाने, यो निषेधो परेपि सः ।
अशक्तेरेव भेदोऽस्ति, यत्तयोर्नापि रूपतः ॥ १६४ ॥

क्षणिकस्सन् श्रयेत् साम्यं, चूर्णावावश्यकस्य यत् ।
यद्यस्मिन्नप्युभौ कालौ, पञ्चस्वावश्यकेषु तत् ॥ १६५ ॥

न च तुल्यं प्रतिक्रान्तेः, प्रायश्चित्तमियं यतः ।
सर्वत्र नियतं तत्स्यात्, साम्यं तु बहुशः श्रुते ॥ १६६ ॥

चेन्नैकवासरापेक्षं, तद्द्विकालं तथा न किम् ? ।
पौषधस्य मितौ साम्य-मितेर्दोषो विशेषतः ॥ १६७ ॥

त्रिपौषधा विना पर्वैकादशेऽङ्गे श्रुता दश ।
हिण्डौ च सप्ताहोरात्र-पौषधी विजयो नृपः ॥ १६८ ॥

गृहस्थभाजनं कुम्भः, किं यतेर्मुखवस्त्रिका ।
श्राद्धैर्यद्यतिलिङ्गत्वात्, त्यक्ता साम्यं ततो न किम् ? ॥ १६९ ॥

श्राद्धे न वेषः साम्यं तु, स्यात् सूत्रे तत्र तं विना ।
शिक्षाव्रतत्वाच्छिक्षा, हि, यतिस्थद्रव्यभावयोः ॥ १७० ॥

द्रव्यं प्राधान्यतस्साम्य एवाल्पं शिक्षणं च यत् ।
रूप्पमाद्युक्तितो द्रव्य-भावाभ्यां श्रमणेषु यत् ॥ १७१ ॥

तत्तस्योपमया श्राद्धे, लिङ्गे द्वे वेशतो यतः ।
श्रामण्यं सर्वतो द्रव्यस्याभावादुपमापि न ॥ १७२ ॥

सामायिके कृते प्रोक्ता, श्रावके श्रमणोपमा ।
भद्रबाहुस्वामिपादैः, स्फुटमावश्यकागमे ॥ १७३ ॥

वेषोऽशेषोपि नोक्तोऽस्या-नुमतित्वादकार्यतः ।
स यथा जिनकल्पस्य, विना कार्येण वार्यते ॥ १७४ ॥

कथं वा देशचारित्रं, त्वदीये द्रव्यतो बत ।
मुच्यते ते किमात्ते चेत्, तदन्त्यप्रतिमैः कथम् ? ॥ १७५ ॥

श्रुतोक्तत्वादिहाप्येवं, विद्या निर्गुरुका तु न ।
ज्ञातः शिवकुमारोक्ता-द्यर्थो मूढ ! त्वया न यत् ॥ १७६ ॥

यत्प्रतिक्रमणं चेर्या-पथिकी ते न किं ततः ।
मिथ्यादुष्कृतमेषा यत् तथा श्राद्धस्य नाऽऽगमे ॥ १७७ ॥

तत कुलालोऽकरोच्चेत्त-दिति कुत्र श्रुते श्रुतम् ? ।
अथवा केवली चेत् स, ततोप्यभिमतो न ते ॥ १७८ ॥

प्रायश्चित्तमिदं यत्तन् न स्यादूनमथाधिकम् ।
नाभूतभवनं चास्य, तत्कुतः कृत्रिमाकृतिः ॥ १७९ ॥

तत्पाश्चात्यं श्रुते यन्न, संभवेदेतदेव तत् ।
षड्विधांतस्थनामत्वा-द्यतिपाक्षिकसूत्रवत् ॥ १८० ॥

पाश्चात्यमित्यस्यादृष्टे-र्जन्नमित्यादिसूत्रतः ।
अनन्तगुणहानेश्च, श्राद्धे पश्चान्नवाखिलम् ॥ १८१ ॥

सारम्भाणां निरारम्भा-ऽऽलोचनालोचनीकृता ।
तद्विश्वस्ताऽनुलग्नाऽऽर्त-कृपा किं ते गता बत ? ॥ १८२ ॥

राजते राज्ञि चाऽज्ञेऽपि, यदाऽऽरात्रिकमत्र किम् ।
लोकाऽलोकविलोकेऽस्मिन्, प्रभावाऽऽभाति नोत्प्रभम् ॥ १८३ ॥

दीपप्रभा प्रभोरग्रे, धूपाङ्गारादगारिक ।
स्वजात्या मङ्गलत्वाद्वा, किमु ही नाथ ! नामला ॥ १८४ ॥

अपक्वान्नाच्च पक्वान्नं, जात्याजात्यत्वतोऽथ किम् ।
हीनं यत्केवली भुङ्क्ते, बोटिकैरप्यवारितम् ॥ १८५ ॥

माङ्गल्येन फलं पुष्पाद्, वानस्पत्येन वा कथम् ।
हीनं स्नात्रोदकादग्रो-दकं सावद्यमद्य किम् ? ॥ १८६ ॥

यद् यद् बहुफलं तत् तन्, निषिद्धं धिगजानता ।
सङ्घतीर्थकरौ सूत्रं, मिथो हेतुत्वतस्सदा ॥ १८७ ॥

तीर्थकृद्विरहे यद्वद्, बिम्बाऽऽलम्बनमागमे ।
गुरोरपि तथा नो चेन्, मिथ्यात्वं तदलक्षवत् ॥ १८८ ॥

ग्रन्थविस्तरत्यान्य-दुत्सूत्रोत्खननं स्थितम् ।
श्रिता सुमतिसिंहेन, मिथ्यात्वं सार्द्धपौर्णिमा (मं) ॥ १८९ ॥

चतुर्दशी तत्प्रतिष्ठे, मिथ्यात्वं च ततः कथम् ? ।
ताभ्यां क्रमात्प्रगृहीतं, स्थापितं चैत्यमर्च्यते ॥ १९० ॥

आगमिन्नागमस्सङ्घ-कृतमाज्ञायुतत्वतः ।
क्रमाऽऽगतोऽधुना सङ्घ-स्तीर्थस्याऽन्तरमन्यथा ॥ १९१ ॥

त्यजन्नाचरणां रोषात्, तत् त्यक्त्वाऽऽगममागमिन् ! ।
सा हि सङ्घकृता सूत्रेऽस्तीत्याज्ञाऽऽचरणापि च ॥ १९२ ॥

अविरुद्धा श्रुतोक्तेति, व्याख्या चेत्सूत्रमेव तत् ।
गाथायामपिशब्दात्तु, भिन्नैवाऽऽचरणा श्रुतात् ॥ १९३ ॥

तस्यां तल्लक्षणं चेदं, गाथायां किं यतः श्रुते ।
लक्षपां नाशठेनादि, तत् कूटव्याख्यया कृतम् ॥ १९४ ॥

उज्जयन्तादिगाथादि-सामाचारीपराङ्मुखः ।
यदि त्वमिव सङ्घः स्यात्, तीर्थच्छेदस्तदा भवेत् ॥ १९५ ॥

सङ्घ एवाऽऽगमो यत्तत्, तन्मतौ स्यास्त्वमागमी ।
स तद्धर्मो हि भेदो न, सर्वथा धर्मधर्मिणोः ॥ १९६ ॥

पाश्चात्यो न प्रमा चेत् तत्, स त्वं सङ्घः पुनः प्रमा ।
सूत्रकर्त्रा निषिद्धापि, चतुःपूर्वी बभूव तत् ॥ १९७ ॥

मन्यसे चेन्न तं सामा-चारीचारी किमेकतः ।
आचार्याद्देवभद्रात् किं, ज्ञातं शीलगणादपि ॥ १९८ ॥

नाऽर्चा सिद्धे न सार्वे तत्, सिद्धाऽनन्तत्रयादितः ।
भरतोऽचीकरन्मुक्त-भ्रातृणां प्रतिमाश्च किम् ? ॥ १९९ ॥

जैनं जनोऽपि मन्येत, चैत्यप्रामाण्यतो हि तत् ।
प्रमाऽत्र पुण्डरीकौ द्वा-वाद्यौ शत्रुञ्जयस्थितौ ॥ २०० ॥

पुष्पादिपूजात्यागो हि, स्याच्चरित्राऽचरित्रयोः ।
द्वयाऽतीतप्रभोः पूजा-निषेधे धावनं मुधा ॥ २०१ ॥

राकौष्ट्रिकौ बहिः सङ्घात्, सार्धराकाञ्चलौ बहिः ।
राकायाश्चाञ्चलाच्चाऽसि, पूज्ये पूजा न ते ततः ॥ २०२ ॥

आगमज्ञस्य चारित्र-चारिणो न तथा यथा ।
चमत्कृतिरधिष्ठातुस्तिष्ठेद्भूपतिचेतसि ॥ २०३ ॥

(काले) ततोऽत्रापि सुरैस्तैस्तद्वर्त्तते जैनमीदृशम् ।
न तुर्योत्सर्गदानं यत्तत् ज्ञातं साधु साधु ते ॥ २०४ ॥

मम मङ्गलमित्यादे-र्यद्बोधिस्सङ्घदैवतात् ।
तुर्योत्सर्गेण तत्सिद्धं, शासनस्येति वर्त्तनम् ॥ २०५ ॥

स्वमिव स्वयमेवैते, पान्ति चेच्छासनं सुराः ।
कायोत्सर्गाः कृतास्ते ते, तत्किं सुकृतिभिः पुरा ? ॥ २०६ ॥

मिथ्यात्वमत्रैकान्ते हि, सामग्र्याः कार्यहेतुता ।
ते तदौचित्यसङ्केता-वीहन्ते श्रावकादिवत् ॥ २०७ ॥

अनौचित्यान्मुदा सङ्घ-कार्यं कुर्युर्न तेऽत्र यत् ।
असङ्केतान्न जानन्ति सङ्घकार्योद्भवं च यत् ॥ २०८ ॥

तेषां यक्षाकथासिद्धं, बलं शासनरक्षणे ।
तुर्योत्सर्गेण (र्गो न) यत्तत्ते, शासनोच्छेदपातकम् ॥ २०९ ॥

विधीयते त्वयोत्सर्गो, यथा भवनदैवते ।
ही शासनप्रदे किं न ? तथा शासनदैवते ॥ २१० ॥

तुर्योत्सर्गः पदैः कैश्चित् कार्येऽग्रेऽपि कदाप्यभूत् ।
आदेवाऽऽगमनोत्सर्गाऽशक्त्यादेस्त्वधुना सदा ॥ २११ ॥

असौ सङ्घकृतेस्सूत्रं सङ्घसूत्रकृतोर्यतः ।
तीर्थं भदन्ते त्यादौ न, सूत्रेप्युक्तं मिथोऽन्तरम् ॥ २१२ ॥

तथास्वभावतस्सङ्घ-तीर्थकृत्कृतमागमः ।
सूत्रं गणधरे त्यादौ, नातः प्रायोऽर्थतः स यत् ॥ २१३ ॥

इयं ते त्रिस्तुतिव्यक्ति-राजगामाऽऽगमात्कुतः ? ।
त्वद्गुरुः प्राग् व्रतं भङ्क्त्वा, जग्राहोत्थापनां कुतः ? ॥ २१४ ॥

भवान् मिथो विरोधादि-शासनोड्डाहकृत्त्वमी ।
तुर्यस्तुत्याऽधुनाऽऽचार्य-राजामात्याः प्रभावकाः ॥ २१५ ॥

देवतोपेक्षितः पूजा-निषेधाद्दण्ड एष सः ।
यत्र चैत्ये चतुर्मेलो, युष्माकं स्वकुबुद्धितः ॥ २१६ ॥

यद्द्यात् कुमतिं रुष्टा, न चपेटां तु देव्यदः ।
जनेऽप्युक्तं न धीस्तत्ते, सार्वे तीर्थे श्रुते गुरो (?) ॥ २१७ ॥

यश्चाविघ्नस्तवाऽन्यत्र, स पापस्थैर्यकारणम् ।
देवैः कृतश्चेत्तत्तेऽपि, निह्नवास्त्वन्मतोद्भवाः ॥ २१८ ॥

न विद्यादेवताऽर्चा चेत्तत्किं विद्याधरैर्वरैः ? ।
कृताऽस्त्यऽविरतश्राद्ध-वात्सल्योत्थमघं च ते ॥ २१९ ॥

अशुद्धा न तथा प्रोक्ता, तेषामविरतिर्यतः ।
रक्षाशक्त्याऽधिकत्वं च, ततो युक्तेत्यमौचिती ॥ २२० ॥

## अष्टमो विश्रामः ।

कश्चिन्मुग्धो वदत्येवं-विचारः कोऽत्र लिङ्गिषु ? ।
राजशासनमृद्वत्तद्, युक्तियुक्तं न भाति नः ॥ २२१ ॥

यतिर्यातप्रतिज्ञो हि, पतिता मृत्तिकाऽत्र तत् ।
राजाज्ञाऽस्यां विचारः को-ऽसन्दिग्धत्वाद् बहिः कृतिः ॥ २२२ ॥

पूज्यत्वं यदि वेषे तत्किं नमन्ति न साधवः ? ।
पूजनीये न भेदोऽस्ति, श्राद्धसाध्वोर्यतस्सदा ॥ २२३ ॥

साधवः प्रत्युतैतस्य, कुर्वन्त्याशातनां सदा ।
तद्रागं च न कुर्वन्ति, त्वदीये त्वज्ञ ! पूजनम् ॥ २२४ ॥

गुरुः कुलक्रमायातः, प्रमा चेत्तद्धियानया ।
देवो जिनोऽपि मिथ्यात्वं, तच्चारित्री गुरुः प्रमा ॥ २२५ ॥

अज्ञानेन मया ज्ञेयं, साध्वसाध्वोर्मनः कथम् ? ।
व्यवहारनयस्तीर्थे, सचराचरलोकवत् ॥ २२६ ॥

तत्रापराधी यः स्यात् स, शुद्धचित्तोऽपि बाध्यते ।
निरागा दुष्टचित्तोऽपि, मन्यतेऽज्ञातमानसः ॥ २२७ ॥

दुष्करत्वान्महात्मान्त-र्विक्रियस्सत्क्रियः कथम् ? ।
सहस्रेषु तथाथ स्या-देकः कोऽपि परेऽपि किम् ? ॥ २२८ ॥

चित्तशुद्धिस्तवाप्याऽऽस्ते, यदि कृत्ये कियत्यपि ।
सर्वेष्वपि हि कृत्येषु सिद्धा सा तन्महात्मनाम् ॥ २२९ ॥

क्षेत्रे यत्राऽऽगमस्तत्र, चारित्रं स्याद् यदुच्यते ।
तीर्थं विना न निर्ग्रन्थै-स्सूत्रार्थौ तीर्थमागमे ॥ २३० ॥

श्रद्धानं ज्ञानहीनं न, न श्रद्धानं विनाऽऽगमः ।
ज्ञानश्रद्धानयोस्सिद्धिरेवं स्याद् गूर्जरावनौ ॥ २३१ ॥

एष केषाञ्चिदादेश-स्ताभ्यां तीर्थं प्रवर्तते ।
छिन्नं चरित्रं तेषां तु, चत्वारो भारिकाः श्रुते ॥ २३२ ॥

सिद्धं चारित्रमत्रेत्थं, लक्ष्यते चाऽऽलयादिना ।
आपन्नदर्शनैस्तत्तु, गुरुशिष्यक्रमं प्रमा ॥ २३३ ॥

एतत्तु क्षेमकीर्त्याद्यै-ष्वशठत्वाद्यथाऽऽगमम् ।
चेत्प्राग् नैभ्यस्तपोवद्भ्य-स्तन्नाऽर्वाक् पद्मनाभतः ॥ २३४ ॥

स्वावधि तच्च क्षेत्रेऽत्रा-ग्रतोप्येभ्यो भविष्यति ।
स्तोकेष्वप्येषु चारित्रं, वज्रदुःप्रसहादिवत् ॥ २३५ ॥

गत्या गतिमिते क्षेत्रेऽत्रान्यगच्छे हि नाऽऽप्यते ।
एभ्यो विशिष्टतैष्वेवा-शठत्वात्तिर्बलात्ततः ॥ २३६ ॥

अतिचारः कषायाद्यैस्तैः प्रमत्ताप्रमत्ततः ।
बकुशादिषु मिथ्यैषु, द्विः प्रतिक्रमणादिना ॥ २३७ ॥

पुनर्घनातिचारत्वा-च्चारित्रं नोज्वलं यथा ।
वासो घनमलं धौतं, ब्रह्मलोकादिनैष्वतः ॥ २३८ ॥

दुष्टाः कुपक्षाः केवल्य-भावेऽपि यज्जिनैर्नतः ।
ज्ञानोत्तमश्रुतज्ञान-स्सङ्घसङ्घक्रमोस्त्यसौ ॥ २३९ ॥

स वै सिद्धान्तसन्मूल-राजमार्गप्रदर्शकः ।
गुरुतत्त्वप्रदीपोऽयं, कृतः शासनसौधभाक् ॥ २४० ॥

कृतेप्यागमयुक्तिभ्यां, गीतार्थैरूहितेपि यत् ।
अनाभोगादिहोत्सूत्रं, तन्मिथ्यादुष्कृतं मम ॥ २४१ ॥

श्रीमद्मेघविजयजीउपाध्यायविरचितः

## ॥ युक्तिप्रबोधः ॥

पणमिय वीरजिणिंदं दुम्मयमयमयविमद्दणमयंदं ।
वुच्छं सुयणहियत्थं वाणारसियस्स मयभेयं ॥ १ ॥

सिरिआगराइनयरे सड्ढो खरयरगणस्स संजाओ ।
सिरिमालिकुले वणिओ वाणारसिदासनामेणं ॥ २ ॥

सो पुव्वं धम्मरुई कुणइ य पोसहतवोवहाणाई ।
आवस्सयाइपढणं जाणइ मुणिसावयायारं ॥ ३ ॥

दंसणमोहस्सुदया कालपहावेण साइयारत्तं ।
मुणिसङ्घवए मुणिउं जाओ सो संकिओ तम्मि ॥ ४ ॥

*जाया वयट्ठियस्स वि कया वि तस्सऽन्नपाणपरिभोगे ।*
छुहतिण्हाइसएणं मणसंकप्पाओ वितिगिच्छा ॥ ५ ॥

पुट्ठं तेण गुरूणं भयवं ! जंपेह दुव्विकप्पस्स ।
णिच्छयओ किमवि फलं केवलकिरिआइ अत्थि ण वा ?॥ ६ ॥

अह तेहिं भणियमेयं णत्थि फलं भद्द ! किमवि विमणस्स ।
तेणावधारियं तो किं ववहारेण विफलेण ? ॥ ७ ॥

इत्थंतरे य पुरिसा अवरे वि य पंच तस्स संमिलिया ।
तेसिं संसग्गेणं जाया कंखावि नियधम्मे ॥ ८ ॥

अज्झत्थसत्थसवणा तस्सासंबरणए वि पडिवत्ती ।
पिच्छियकमंडलुजुए गुरूण तत्था वि से संका ॥ ९ ॥

वयसमिइबंभचेरप्पमुहं ववहारमेव ठावेइ ।
तेण पुराणं किंचि वि पमाणमपमाणमवि तस्स ॥ १० ॥

अह नियमयवुड्ढिकए पयासियं तेण समयसारस्स ।
चित्तकवित्तणिवेसं नाडयरूवं मइविसेसा ॥ ११ ॥

बाणारसीविलासं तओ परं विविहगाहदोहाइ ।
अबुहाण बोहणत्थं करेइ संथवणभासं च ॥ १२ ॥

सम्मत्तम्मि हु लद्धे बंधो नत्थि त्ति अविरओ भुज्जा ।
वयमग्गस्स अफासी न कुणइ दाणं तवं बंभं ॥ १३ ॥

णाणी सया विमुत्तो अज्झप्परयस्स न्निज्जरा विउला ।
कुंयरपालप्पमुहा इय मुणिउं तम्मए लग्गा ॥ १४ ॥

वणवासिणो य नग्गा अट्ठावीसइगुणेहिं संविग्गा ।
मुणिणो सुद्धा गुरुणो संपइ तेसिं न संजोगो ॥ १५ ॥

तम्हा दिगम्बराणं एए भट्टारगा वि नो पुज्जा ।
तिलतुसमेत्तो जेसिं परिग्गहो णेव ते गुरुणो ॥ १६ ॥

एवं कत्थ वि हीणं कत्थ वि अहियं मयाणुराएणं ।
सोऽभिनिवेसा ठवइ भेयं च दिगबरेहिंतो ॥ १७ ॥

सिरिविक्कमनरनाहा गएहिं सोलस सएहिं वासेहिं ।
असिउत्तरेहिं जायं बाणारसियस्स मयमेयं ॥ १८ ॥

अह तम्मि हु कालगए कुंयरपालेण तम्मयं धरियं ।
जाओ तो बहुमण्णो गुरु व्व तेसिं स सव्वेसिं ॥ १९ ॥

जिणपडिमाणं भूसणमल्लारुहणाइ अंगपरियरणं ।
बाणारसिओ वारइ दिगम्बरस्सागमाणाए ॥ २० ॥

महिलाण मुत्तिगमणं कवलाहारो य केवलधरस्स ।
गिहिअन्नलिंगिणो वि हु सिद्धी णत्थि त्ति सद्दहइ ॥ २१ ॥

आयारंगप्पमुहं सुयणाणं किमवि नो पमाणेइ ।
सेयंबराण सासणसद्धाइ तयंतरं बहुलं ॥ २२ ॥

अह गीयत्थजणेहिं आगमजुत्तीहिं बोहिओ अहियं ।
तह वि तहेव य रुच्चइ बाणारसिओ (ए) मए तिसिओ॥ २३ ॥

पाएण कालदोसा भवन्ति दाणा परम्मुहा मणुआ ।
देवगुरूणमभत्ता पमादिणो तेसिमित्थ रुई ॥ २४ ॥

इय जाणिऊण सुअणा ! वाणारसीयस्स मयवियप्पमिणं ।
जिणवरआणारसिआ हवंतु सुहसिद्धिसंवसिआ ॥ २५ ॥

श्री शाकटायनाचार्यविरचितम्

# ॥ केवलिमुक्तिप्रकरणम् ॥

अस्ति च केवलिभुक्तिः समग्रहेतुर्यथा पुरा भुक्तेः ।
पर्याप्ति-वेद्य-तैजस-दीर्घायुष्कोदयो हेतुः ॥ १ ॥

नष्टानि न कर्माणि क्षुधो निमित्तं विरोधिनो न गुणाः ।
ज्ञानादयो जिने किं सा संसारस्थितिर्नास्ति ॥ २ ॥

तम इव भासो वृद्धौ ज्ञानादीनां न तारतम्येन ।
क्षुद्धीयतेऽत्र न च तज्ज्ञानादीनां विरोधगतिः ॥ ३ ॥

अविकलकारणभावे तदन्यभावे भवेदभावेन ।
इदमस्य विरोधीति ज्ञानं न तदस्ति केवलिनि ॥ ४ ॥

क्षुद् दुःखमनन्तसुखं विरोधी तस्येति चेत् कुतस्त्यं तत् ।
ज्ञानादिवन्न तज्जं विरोधि न परं ततो दृष्टम् ॥ ५ ॥

आहारविषयकाङ्क्षारूपा क्षुद् भवति भगवति विमोहे ।
कथमन्यरूपतास्या न लक्ष्यते येन जायेत ॥ ६ ॥

न क्षुद् विमोहपाको यत् प्रतिसङ्ख्यानभावननिवर्त्या ।
न भवति विमोहपाकः सर्वोऽपि हि तेन विनिवर्त्यः ॥ ७ ॥

शीतोष्णबाधतुल्या क्षुत् तत् तत्प्रतिविधानकाङ्क्षा तु ।
मूढस्य भवति मोहात् तया भृशं बाध्यमानस्य ॥ ८ ॥

तैजसमृदूकृतस्य द्रव्यस्याभ्यवहृतस्य पर्याप्त्या ।
उत्तरपरिणामे क्षुत् क्रमेण भगवति च तत् सर्वम् ॥ ९ ॥

ज्ञानावरणीयादेर्ज्ञानावरणादि कर्मणः कार्यम् ।
क्षुत् तद्विलक्षणाऽस्यां न तस्य सहकारिभावोऽपि ॥ १० ॥

क्षुद्बाधिते न जाने, न चेक्ष इत्यस्ति ननु विपर्यासः ।
तद्वेद्यं सहकारि तु तस्य, न तद् वेद्यसहकारि ॥ ११ ॥

ज्ञानावरणादीनामशेषविगमात् क्षुधि प्रज़ातायाम् ।
अपि तज्ज्ञानादीनां हानिः स्यादितरवत् तत्र ॥ १२ ॥

नष्टंविपाकः (का) क्षुदिति प्रतिपत्तौ भवति चागमविरोधः ।
शीतोष्ण-क्षुद्-उदन्यादयो हि ननु वेदनीय इति ॥ १३ ॥

उदये फलं न तस्मिन्नुदीरणेत्यफलता न वेद्यस्य ।
नोदीरणा फलात्मा तथा भवेदायुरप्यफलम् ॥ १४ ॥

अनुदीर्णवेद्य इति चेद् न क्षुद् वीर्यं किमत्र न हि वीर्यम् ।
क्षुद्भावे क्षुदभावे न स्थित्यै क्षुधि तनोर्विलयः ॥ १५ ॥

अपवर्तते[ऽ]कृतार्थं नायुर्ज्ञानादयो न हीयन्ते ।
जगदुपकृतावनन्तं वीर्यं किं गततृषो भुक्तिः ॥ १६ ॥

ज्ञानाद्यलयेऽपि जिनेऽमोहेऽपि स्यात् क्षुदुद्भवे भुक्तिः ।
वचन-गमनादिवच्च प्रयोजनं स्वपरसिद्धिः स्यात् ॥ १७ ॥

ध्यानस्य समुच्छिन्नक्रियस्य चरमक्षणे गते सिद्धिः ।
सा नेदानीमस्ति स्वस्य परेषां च कर्तव्या ॥ १८ ॥

रत्नत्रयेण मुक्तिर्न विना तेनास्ति चरमदेहस्य ।
भुक्त्या तथा तनोः स्थितिरायुषि नन्वनपवर्त्येऽपि ॥ १९ ॥

असति क्षुद्बाधेऽङ्गे लये न शक्तिक्षयो न संक्लेशः ।
आयुश्चानपवर्तं बाधलयौ प्राग्वदधुनापि ॥ २० ॥

देशोनपूर्वकोटीविहरणमेवं सतीह केवलिनः ।
सूत्रोक्तमुपापादि न मुक्तिश्च न नियतकाला स्यात् ॥ २१ ॥

अपवर्तहेत्वभावोऽनपवर्तनिमित्तसंपदायुष्के ।
स्यादनपवर्त इति तत् केवलिभुक्तिं समर्थयन्ते ॥ २२ ॥

आयुरिवाभ्यवहारो जीवनहेतुर्विनाऽभ्यवहृतेश्च ।
तिष्ठत्यनन्तवीर्यो विनायुषा[ऽऽ]कालमपि तिष्ठेत् ॥ २३ ॥

न ज्ञानवदुपयोगो वीर्ये कर्मक्षयेण लब्धिस्तु ।
तत्रायुरिवाहारोऽपेक्ष्येत्त न तत्र बाधास्ति ॥ २४ ॥

मासं वर्षं वापि च तानि शरीराणि तेन भुक्तेन ।
तिष्ठन्ति न चाकालं न वान्यथा पूर्वमपि भुक्तिः ॥ २५ ॥

तैलक्षये न दीपो न जलागममन्तरेण जलधारा ।
तिष्ठति तनोस्तथा स्थितिरपि न विनाहारयोगेन ॥ २६ ॥

कायस्तथाविधोऽसौ जिनस्य यदभोजने स्थितिरितीदम् ।
वाङ्मात्रं नात्रार्थे प्रमाणमाप्तागमोऽन्यद् वा ॥ २७ ॥

अस्वेदादि प्रागपि सर्वाभिमुखादि तीर्थकरपुण्यात् ।
स्थितनखतादि सुरेभ्यो नाक्षुद् देहान्यता वास्ति ॥ २८ ॥

भुक्तिर्दोषो यदुपोष्यते न दोषश्च भवति निर्दोषे ।
इति निगदतो निषद्यार्हति न स्थानयोगादेः ॥ २९ ॥

रोगादिवत् क्षुधो न व्यभिचारो वेदनीयजन्मायाः ।
प्राणिन्येकादश जिन इति जिनसामान्यविषयं च ॥ ३० ॥

तद्धेतुकर्मभावात् परीषहोक्तिर्न जिन उपस्कार्यः ।
नञ् नाऽभावासिद्धेरित्यादेर्न[:] क्षुदादिगतिः ॥ ३१ ॥

परमावधियुक्तस्य छद्मस्थस्येव नान्तरायोऽपि ।
सर्वार्थदर्शने स्यात् न चान्यथा पूर्वमपि भुक्तिः ॥ ३२ ॥

इन्द्रियविषयप्राप्तौ यदभिनिबोधप्रसञ्जनं भुक्तौ ।
तच्छब्द-रूप-गन्ध-स्पर्शप्राप्त्या प्रतिक्षिप्तम् ॥ ३३ ॥

छद्मस्थे तीर्थकरे विष्वणनानन्तरं च केवलिनि ।
चिन्ता मलप्रवृत्तौ या सैवात्रापि भुक्तवति ॥ ३४ ॥

विग्रहगतिमापन्नाद्यागमवचनं च सर्वमेतस्मिन् ।
भुक्तिं ब्रवीति तस्माद् द्रष्टव्या केवलिनि भुक्तिः ॥ ३५ ॥

नाऽनाभोगाहारो निरन्तरः सोऽविशेषितो नञ्वत् ।
युक्त्याऽभेदे नाङ्गस्थिति-पुष्टि-क्षुच्छमास्तेन ॥ ३६ ॥

तस्य विशिष्टस्य स्थितिरभविष्यत् तेन सा विशिष्टेन ।
यद्यभविष्यदिहैषां शालीतरभोजनेनेव ॥ ३७ ॥

श्री शाकटायनाचार्यविरचितम्

## ॥ स्त्रीनिर्वाणप्रकरणम् ॥

प्रणिपत्य भुक्ति-मुक्तिप्रदममलं धर्ममर्हतो दिशतः ।
वक्ष्ये स्त्रीनिर्वाणं केवलिभुक्तिं च सङ्क्षेपात् ॥ १ ॥

अस्ति स्त्रीनिर्वाणं पुंवद् यदविकलहेतुकं स्त्रीषु ।
न विरुध्यते हि रत्नत्रयसम्पद् निर्वृतेर्हेतुः ॥ २ ॥

रत्नत्रयं विरुद्धं स्त्रीत्वेन यथाऽमरादिभावेन ।
इति वाङ्मात्रं, नात्र प्रमाणमाप्तागमोऽन्यद् वा ॥ ३ ॥

जानीते जिनवचनं, श्रद्धत्ते, चरति चार्यिका[ऽ]शबलम् ।
नाऽस्याऽस्त्यसंभवोऽस्यां, नादृष्टविरोधगतिरस्ति ॥ ४ ॥

सप्तमपृथिवीगमनाद्यभावमव्याप्तमेव मन्यन्ते ।
निर्वाणाभावेनाऽपश्चिमतनवो न तां यान्ति ॥ ५ ॥

विषमगतयोऽप्यधस्तादुपरिष्टात् तुल्यमासहस्रारम् ।
गच्छन्ति च तिर्यञ्चस्तदधोगत्यूनताऽहेतुः ॥ ६ ॥

वादविकुर्वाणत्वादिलब्धिविरहे श्रुते कनीयसि च ।
जिनकल्प-मनःपर्यवविरहेऽपि न सिद्धिविरहोऽस्ति ॥ ७ ॥

वादादिलब्ध्यभाववदभविष्यद् यदि च सिद्ध्यभावोऽपि ।
साऽऽसामवारयिष्यत यथैव जम्बूयुगादारात् ॥ ८ ॥

'स्त्री'ति च धर्मविरोधे प्रव्रज्यादोषविंशतौ 'स्त्री'ति ।
बालादिवद् वदेयुर्न 'गर्भिणी बालवत्से' ति ॥ ९ ॥

यदि वस्त्रादविमुक्तिः, त्यज्येत तदथ न कल्पते हातुम् ।
मुक्त्यङ्गं प्रतिलेखनवदन्यथा देशको दुष्येत् ॥ १० ॥

त्यागे सर्वत्यागो ग्रहणेऽल्पो दोष इत्युपादेशि ।
वस्त्रं गुरुणाऽऽर्याणां परिग्रहोऽपीति भुक्त्यादौ ॥ ११ ॥

यत् संयमोपकाराय वर्तते प्रोक्तमेतदुपकरणम् ।
धर्मस्य हि तत् साधनमतोऽन्यदधिकरणमाहाऽर्हन् ॥ १२ ॥

अस्तैन्यबाहिरव्युत्सर्गविवेकैषणादिसमितीनाम् ।
उपदेशनमुपदेशो ह्युपधेरपरिग्रहत्वस्य ॥ १३ ॥

निर्ग्रन्था(न्थी)व्यपदेशः शास्त्रे सर्वत्र नैव युज्येत ।
उपधेर्ग्रन्थत्वेऽस्याः पुमानपि तथा न निर्ग्रन्थः ॥ १४ ॥

अपरिग्रह एव भवेद् वस्त्राभरणाद्यलङ्कृतोऽपि पुमान् ।
ममकारविरहितः, सति ममकारे सङ्गवान् नग्नः ॥ १५ ॥

आचार्याद्यासक्तं स्वयमादित नो मुमुक्षुका लोभात् ।
उपसर्गाद्यासक्तमिवाम्बरमपरिग्रहस्तस्याः ॥ १६ ॥

काये ममकारेऽपि च सपरिग्रह एव नैवमुक्तः स्यात् ।
तत्र यथा संलग्ने नो ममकारस्तथा वस्त्रे ॥ १७ ॥

ग्रामं गेहं च विशन् कर्म च नोकर्म चाददानोऽपि ।
अपरिग्रहोऽममत्वोऽपरिग्रहो नान्यथा कश्चित् ॥ १८ ॥

संसक्तौ सत्यामपि चोदितयत्नेन परिहरन्त्यार्या ।
हिंसावती पुमानिव न जन्तुमालाकुले लोके ॥ १९ ॥

गृहिणो ममत्वयोगात् संयमसाधनगृहीत्यभावाच्च ।
अयतं चरतश्चरणं न विद्यते तेन नो मोक्षः ॥ २० ॥

त्रिस्थानोक्ता दोषास्त्रयो[ऽ]पदेशा यते[ः]सचेलत्वे ।
अपरिषहसहिष्णुत्वं ह्रीश्च जुगुप्सा च देहस्य ॥ २१ ॥

वस्त्रं विना न चरणं स्त्रीणामित्यर्हतौच्यत, विनापि ।
पुंसामिति न्यवार्यत, तत्र स्थविरादिवन्मुक्तिः ॥ २२ ॥

*अर्शोभगन्दरादिषु गृहीतचीरो यतिर्न मुच्येत ।*
उपसर्गे वा चीरेऽङ्गादिः संन्यस्यते चान्ते ॥ २३ ॥

मुक्त्यङ्गमचेलत्वं नोच्येत तदन्यथा नरस्यापि ।
आचेलक्यायोग्याऽयोग्या सिद्धेरदीक्ष्य इव ॥ २४ ॥

इति जिनकल्पादीनां मुक्त्यङ्गानामयोग्य इति सिद्धेः ।
स्यादष्टवर्षजातादिरयोग्योऽदीक्षणीय इव ॥ २५ ॥

संवरनिर्जररूपो बहुप्रकारस्तपोविधिः शास्त्रे ।
योगचिकित्साविधिरिव कस्यापि कथञ्चिदुपकारी ॥ २६ ॥

वस्त्राद् न मुक्तिविरहो भवतीत्युक्तं समग्रमन्यच्च ।
रत्नत्रयान्न चान्यद् मुक्त्यङ्गं शिष्यते सद्भिः ॥ २७ ॥

प्रव्राजना निषिद्धा क्वचित्तु रत्नत्रयस्य योगेऽपि ।
धर्मस्य हानि-वृद्धी निरूपयद्भिर्विवृद्ध्यर्थम् ॥ २८ ॥

अप्रतिवन्द्यत्वाच्चेत् संयतवर्गेण नार्यिकासिद्धिः ।
वन्द्यन्तां ता यदि तेनोनत्वं कल्प्यते तासाम् ॥ २९ ॥

सन्त्यूनाः पुरुषेभ्यस्ताः स्मारणवारणादिकारिभ्यः ।
तीर्थकराकारिभ्यो न तावता[ऽ]सिद्धिरङ्गगतेः ॥ ३० ॥

अर्हन् न वन्दते न च जिनकल्पादिरिति गणधरादीनाम् ।
प्राप्ताऽन्यथा[ऽ]विमुक्तिः स्थानं स्त्रीपुंसयोस्तुल्यम् ॥ ३१ ॥

ये यान्न मुक्तिभाजो वन्दन्ते ते तथैव मुच्यन्ते ।
इत्यप्यवन्दनं स्यान्नामोक्षोऽवन्दनात् तेन ॥ ३२ ॥

अपकृष्यते श्रिया स्त्री पुंसः सर्वत्र किं न तन्मुक्तौ ।
इत्यमुनाऽऽक्षेप्य स्त्रीपुंसाः सिद्धाः सममरुक्त्वम् ॥ ३३ ॥

मायादिः पुरुषाणामपि द्वेशादिप्रसिद्ध्यभावश्च ।
षण्णां संस्थानानां तुल्यो वर्णत्रयस्यापि ॥ ३४ ॥

स्त्री नाम मन्दसत्त्वा मुक्त्यङ्गसमग्रता न तेनात्र ।
तत् कथमनल्पधृतयः सन्ति हि शीलाम्बुनिधिवेलाः ॥ ३५ ॥

ब्राह्मी सुन्दर्यार्या राजिमती चन्दना गणधरान्या[ः] ।
अपि देवासुरमहिता विख्याताः शीलसत्त्वाभ्याम् ॥ ३६ ॥

गार्हस्थ्येऽपि सुसत्त्वा विख्याताः शीलवतितमा जगति ।
सीतादयः कथं तास्तपसि विसत्त्वा विशीलाश्च ॥ ३७ ॥

सन्त्यज्य राज्यलक्ष्मीं पति-पुत्र-भ्रातृ-बन्धुसम्बन्धम् ।
पारिव्राज्यवहायाः किमसत्त्वं सत्यभामादेः ॥ ३८ ॥

महता पापेन स्त्री मिथ्यात्वसहायकेन न सुदृष्टिः ।
स्त्रीत्वं चिनोति, तत्र तदङ्गे क्षपणेति निर्मानम् ॥ ३९ ॥

अन्तःकोटीकोटीस्थितिकानि भवन्ति सर्वकर्माणि ।
सम्यक्त्वलाभ एवाशेषाघक्षयकरो मार्गः ॥ ४० ॥

अष्टशतमेकसभये पुरुषाणामादिरागमः सिद्धौ ।
स्त्रीणां न मुख्ययोगे गौणोऽर्थो मुख्यहानिर्वा ॥ ४१ ॥

शब्दनिवेशनमर्थः प्रत्यासत्त्या क्वचित् कयाचित्सः ।
तदयोगे योगे सति शब्दस्यान्यः कथं कल्प्यः ॥ ४२ ॥

अव्यभिचारी मुख्योऽविकलोऽसाधारणोऽन्तरङ्गश्च ।
विपरीतो गौणोऽर्थः, सति मुख्ये धीः कथं गौणे ॥ ४३ ॥

स्तनजघनादिव्यङ्ग्ये स्त्रीशब्दोऽर्थे न तं विहायैषः ।
दृष्टः क्वचिदन्यत्र त्वग्निर्माणवकवद् गौणः ॥ ४४ ॥

आ षष्ठ्याः स्त्रीत्यादौ स्तनादिभिः स्त्री स्त्रिया इति च वेदः ।
स्त्रीवेदः, स्त्र्यनुबन्धात् पल्यानां शतपृथक्त्वोक्तिः ॥ ४६ ॥

न च पुंदेहे स्त्रीवेदोदयभावे प्रमाणमङ्गं च ।
भावः सिद्धौ पुंवत् पुमान् स्त्र्यपि, न सिध्यतो वेदः ॥ ४७ ॥

क्षपकश्रेण्यारोहे वेदेनोच्येत भूतपूर्वेण ।
स्त्रीति नितराममुख्ये मुख्येऽर्थे युज्यते नितराम् ॥ ४८ ॥

मनुषीषु मनुष्ये च चतुर्दशगुणोक्तिरार्यिकासिद्धौ ।
भावस्तवोपरि क्षय्यनवस्थोऽनियत उपचारः ॥ ४९ ॥

अनडुह्याऽनड्वाहीं दृष्ट्वाऽनड्वाहमनडुहाऽऽरूढम् ।
स्त्रीपुंसेतरवेदो वेद्यो नाऽनियमतो वृत्तेः ॥ ५० ॥

विगतानुवादनीतौ सुरकोपादिषु चतुर्दश गुणाः स्युः ।
न च मार्गणान्तर इति प्रोक्तं वेदेऽन्यथा नीतिः ॥ ५१ ॥

पुंसि स्त्रियां स्त्रियां पुंस्यन्तश्च तथा भवेद् विवाहादिः ।
यतिषु न संवासादिः स्यादगतौ निष्प्रमाणेष्टिः ॥ ५२ ॥

पञ्चेन्द्रियाद्युदयवत् सुरनरगत्यादिकर्मणामुदयः ।
वेदस्य तत्तदङ्गे नपुंसकादिवद् नरकादौ ॥ ५३ ॥

नाम तदिन्द्रियलब्धेरिन्द्रियनिवृत्तिमिव पुमाद्यङ्गम् ।
वेदोदयाद् विरचयेदित्यतदङ्गे न तद्वेदः ॥ ५४ ॥

या पुंसि च प्रवृत्तः पुंसः स्त्रीवत् स्त्रियाः स्त्रियां च स्यात् ।
सा स्वकवेदात् तिर्यग्वदलाभे मत्तकामिन्याः ॥ ५५ ॥

मनुजगतौ सन्ति गुणाश्चतुर्दशेत्याद्यपि प्रमाणं स्यात् ।
पुंवत् स्त्रीणां सिद्धौ नापर्याप्तादिवद् बाधा ॥ ५६ ॥

न च बाधकं विमुक्तेः स्त्रीणामनुशासनं प्रवचनं च ।
सम्भवति च मुख्येऽर्थे न गौण इत्यार्यिकासिद्धिः ॥ ५७ ॥

श्री विबुधविमलसूरिकृता

# ॥ सम्यक्त्वपरीक्षा ॥

प्रणम्य परया भक्त्या, श्रीमत्पार्श्वजिनेश्वरम् ।
नत्वा गुरुक्रमाम्भोजं, सम्यक्त्वादि परीक्ष्यते ॥ १ ॥

यद्यपि बहवो ग्रन्थाः, पूर्वाचार्यैः सुवर्णिताः ।
तथापि क्रियते ग्रन्थो, बालानां सुखहेतवे ॥ २ ॥

यथाप्रवृत्तिनिष्ठानां, भव्यानां शुक्लपक्षिणाम् ।
रागद्वेषघनग्रन्थिभेदिनां शुभभावतः ॥ ३ ॥

मिथ्यात्वस्य परित्यागात् सम्यक्त्वं क्षायिकादिकम् ।
उत्पद्यते च संसारसमुद्रपारदायकम् ॥ ४ ॥

धर्मः श्रुतमयो ज्ञेयो, मार्गो ज्ञानादिकः पुनः ।
समाचारीस्थितः साधुर्जीवश्च प्राणधारकः ॥ ५ ॥

मुक्तो मुक्तौ गतो रागद्वेषौ त्यक्त्वैव केवली ।
एतेषु खलु पञ्चस्वधर्मसंज्ञा विधीयते ॥ ६ ॥

मिथ्याशास्त्रादिमिथ्यात्वहिंसादौ धर्मतः पुनः ।
मिथ्यात्वं दशधा प्रोक्तं, स्थानाङ्गे हि सविस्तरम् ॥ ७ ॥

इति मिथ्यात्वभेदाख्योऽधिकारः प्रथमो गतः ।
विबुधाचार्यवर्योक्तः, सिद्धान्ताक्षरसंमतः ॥ ८ ॥

अथ सम्यक्त्वभेदाख्योऽधिकारो हि द्वितीयकः ।
प्रारभ्यते समासेन, दर्शनशुद्धिकारकः ॥ ९ ॥

तदितरत्तु सम्यक्त्वमुपशमादिकं पुनः ।
क्षयोपशमवैचित्र्याद्बहुविधं जिनागमे ॥ १० ॥

एतादृशं तु सम्यक्त्वं, धार्यं निर्मलबुद्धिभिः ।
शमसंवेगनिर्वेदानुकम्पास्थासुलक्षितम् ॥ ११ ॥

नयप्रमाणसापेक्षं, स्याद्वादादिसुनिश्चितम् ।
शङ्काकाङ्क्षाचिकित्सान्यशंसासंस्तववर्जितम् ॥ १२ ॥

आत्मा नित्यो हि कर्ता च, भोक्ता स्वकृतकर्मणाम् ।
मुक्तिस्तत्साधनं चैव, स्थानानि षट् मतान्यपि ॥ १३ ॥

इति सम्यक्त्वरूपोऽयमधिकारः समासिताम् ।
अगमत्तु द्वितीयोऽथ, मिथ्यामतिविभेदकः ॥ १४ ॥

अथ नयप्रमाणाख्यः, प्रारभ्यते तृतीयकः ।
सत्सम्यकत्वपरीक्षायां, भव्यजीवोपकारकः ॥ १५ ॥

नैगमसंग्रहौ ज्ञेयौ, व्यवहारर्जुसूत्रकौ ।
शब्दसमभिरूढैवंभूताः सप्त नयाः स्मृताः ॥ १६ ॥

प्रत्यक्षं च परोक्षं च , प्रमाणं द्विविधं भवेत् ।
सांव्यवहारिकं चाद्यं, स्यादसांव्यवहारिकम् ॥ १७ ॥

इन्द्रियजं मतं पूर्वमिन्द्रियातीतजं परम् ।
मतिः श्रुतं परोक्षं च, प्रत्यक्षं देशसर्वतः ॥ १८ ॥

अवधिज्ञानसंयुक्तं, मनःपर्यायमेव च ।
देशप्रत्यक्षमाख्येयं, केवलं सर्वतो मतम् ॥ १९ ॥

पदार्थोऽनन्तधर्मात्मा, युगपन्नैव भाष्यते ।
स्यादित्यपेक्षया धर्मः, स्याद्वादः स उदाहृतः ॥ २० ॥

यः पुरुषःपिता सूनुः, पुनः स एव कथ्यते ।
भागिनेयो भवेद्यस्तु, मातुलोऽपि स एव हि ॥ २१ ॥

एकान्तेन प्रभुः कोऽपि, कश्चिद्धर्मं न भाषितुम् ।
अपेक्षाकथनात्प्राज्ञैः, स्याद्वादस्तु समर्थितः ॥ २२ ॥

स्याद्वादो यत्र तत्र स्यात् सम्यक्त्वं प्रतिपादितम् ।
एकान्तेनैव मिथ्यात्वं, प्रोक्तं सूत्रकृदागमे ॥ २३ ॥

जैनचैत्यानि निर्ग्रन्थाः, सामायिकागमादयः ।
एषु निःशङ्किताचारा अष्टौ सम्यक्त्वसाधनम् ॥ २४ ॥

निःशङ्कितं भवेदाद्यो, निष्काङ्क्षितं द्वितीयकः ।
दर्शनस्य किलाचारस्तृतीयो निश्चिकित्सितम् ॥ २५ ॥

चतुर्थोऽमूढदृष्टित्वं, गुणिप्रशंसनं वरम् ।
यत्स्थिरीकरणं षष्ठो, वात्सल्यं भक्तिरूपता ॥ २६ ॥

सप्तमस्त्वयमाचारोऽष्टमः प्रभावनामयः ।
आचाराः कथिता अष्टौ, सम्यक्त्वस्यैव निर्मलाः ॥ २७ ॥

श्राद्धानां जिनपूजायां, सामायिके च पौषधे ।
योजनीया यथायोगमाचाराः सकला अपि ॥ २८ ॥

श्राद्धानां प्रथमं पूजा, द्रव्यभावस्तवात्मिका ।
परिग्रहार्तिरौद्राधिबाह्याभ्यन्तररोगहृत् ॥ २९ ॥

भेषजमिव संदिष्टा, विधिवत्परमेश्वरैः ।
प्राक् पौषधोपवासादेराभरणोपमात्पुनः ॥ ३० ॥

सत्सम्यक्त्वपरीक्षायाः, श्रीविबुधविमलसूरिकृता(क्लृप्ता)याः ।
समाप्तिमगमत्तृतीयोऽयमधिकारो मिथ्यात्वभित् ॥ ३१ ॥

नत्वा चैत्यानि जैनानि, स्मृत्वा गुरुक्रमाम्बुजम् ।
सम्यक्त्वसाधनं मुख्यमर्हच्चैत्यार्चनं त्रिधा ॥ ३२ ॥

चतुर्थोऽथाधिकारोऽयं, सम्यक्त्वस्थैर्यकारणम् ।
प्रारभ्यते प्रमोदेन, भव्यानां सुखहेतवे ॥ ३३ ॥

हुण्डावसर्पिणीकाल आगतो भस्मयोगतः ।
भस्मग्रहविकारेणोत्थितं शासनपीडनम् ॥ ३४ ॥

परमिन्द्रादिभावेन, प्रभुवचःप्रभावतः ।
अभूत्तत्कारिणां पीडा, तद् दुःखं कृपया महत् ॥ ३५ ॥

जैनानां जैनचैत्यानि, परं सम्यक्त्वसाधनम् ।
जैनभासमतभ्रान्तैर्निषिध्यन्ते कुयुक्तिभिः ॥ ३६ ॥

ढुण्ढका ग्रथिलप्राया, लुङ्का व्युद्ग्राहिता जडाः ।
उन्मत्तवद् ब्रुवन्त्येवार्हच्चैत्यार्चानिषेधनम् ॥ ३७ ॥

उत्सूत्राण्यष्टपञ्चाशत्सङ्ख्यानि भाषितानि तैः ।
ढुण्ढकैर्ग्रथिलत्वेन, स्वीयसंसारवृद्धितः ॥ ३८ ॥

कलङ्काभावसंयुक्ते, शासने चैत्यशोभिते ।
दुष्टैः कलङ्किते यस्मिन्, ग्राह्यं परीक्ष्य तद् बुधैः ॥ ३९ ॥

स्वर्णोपमं हि सम्यक्त्वं, वह्नितुल्याः कुयुक्तयः ।
ग्राहकैस्तत्र भव्यौघैः, परीक्ष्यतेऽग्नितापने ॥ ४० ॥

त्यक्तस्त्री प्रतिमा जैनी, चापादिशस्त्रवर्जिता ।
दृष्टा भव्यजनैर्भक्त्या, संसारभयभेदिनी ॥ ४१ ॥

परीक्षा प्रथमेत्येषा, निर्विकारितया मता ।
मूर्तिर्दृष्टाऽर्हतां भव्यैरमृतानन्ददायिनी ॥ ४२ ॥

श्रीअर्हत्प्रतिमाराध्या, गणभृत्प्रतिपादिता ।
अनुयोगादिसिद्धान्ते, निक्षेपस्याधिकारतः ॥ ४३ ॥

नाम च स्थापना द्रव्यं, भावश्चेत्यनुयोगके ।
प्रोक्तं निक्षेपचातुष्कं, स्थानाङ्गे तस्य सत्यता ॥ ४४ ॥

श्रीवीतरागबिम्बे स्याच्चैत्यशब्दः प्रवर्तते ।
संज्ञानार्थश्चितीधातुर्घञ्प्रत्ययान्तसंमतः ॥ ४५ ॥

काष्ठपाषाणरूपेषु, यदाकृतिविलोकतः ।
संज्ञानं स्मरणं तेषामुद्बोधकात्प्रजायते ॥ ४६ ॥

चिञ् चयने(इ) तिधातोस्तु, चैत्यशब्दः प्रदर्श्यते ।
अर्हद्यक्षादिगेहेषु, पीठबद्धे तरावपि ॥ ४७ ॥

नैकार्थनाममालायां, त्रयोऽर्थाः प्रतिपादिताः ।
ज्ञानार्थश्चैत्यशब्दश्च, वनवाची तिरस्कृतः ॥ ४८ ॥

स्थानाङ्गे दशधा सत्यं, जनपदादिवाक्यतः ।
संमतं सत्यभेदेन, चैत्यस्यार्थास्त्रयः स्मृताः ॥ ४९ ॥

व्युत्पत्त्या न हि सर्वेऽपि, शब्दाः सर्वत्र सङ्गताः ।
गोशब्दो यदि गत्यर्थः, कीटिकादौ न किं मतः ! ॥ ५० ॥

कदाग्रहवशेनैव, मूर्खेण केनचिन्मुधा ।
व्याकरणादिसूत्रेण, ज्ञानार्थको हि साधितः ॥ ५१ ॥

कुत्रचिन्नाममालायां, ज्ञानार्थको न भाषितः ।
ज्ञेयोऽर्हत्प्रतिमावाची, चैत्यशब्दो बहुस्थले ॥ ५२ ॥

आनन्दकामदेवादिश्राद्धसम्यक्त्वसूत्रके ।
तीर्थकृत्प्रतिमावाची, चैत्यशब्दस्तु निश्चितः ॥ ५३ ॥

सूर्याभादिकदेवानां, सम्यग्दृशां सुसूरिभिः ।
आगमेषूदितं चैत्यार्चनं हितादिकारणम् ॥ ५४ ॥

परीक्षा छेदतुल्येति, द्वितीया चैत्यहेमसु ।
सिद्धान्ताक्षरटङ्कैस्तु, सुधीभिर्विहिता भृशम् ॥ ५५ ॥

परीक्षैव तृतीयाथ, प्रारभ्यतेऽग्नितापवत् ।
श्रमणोपासकानां नो, हिंसा द्रव्यस्तवेऽर्हताम् ॥ ५६ ॥

श्रमणोपासकानां हि, द्रव्यस्तवस्तु मुख्यतः ।
महानिशीथसूत्रोक्तो, भावस्तवोऽपि संमतः ॥ ५७ ॥

रुद्रध्यानप्रमादेन, कृष्णलेश्यादियोगतः ।
प्राणानां व्यपरोपत्वं, हिंसा पञ्चेन्द्रियस्य हि ॥ ५८ ॥

प्राणिनां द्वीन्द्रियादीनां, महारम्भः प्रभाषितः ।
आरम्भो भूतसत्त्वानां, व्यवहाराद्विवक्षितः ॥ ५९ ॥

शास्त्रे हिंसा त्रिधोक्तानुबन्धहेतुस्वरूपतः ।
जिनाज्ञाभङ्गमिथ्यात्वाद्धिंसा स्यात्सानुबन्धिका ॥ ६० ॥

अयतनाप्रवृत्तेश्च, हेतुर्हिंसा प्रकीर्तिता ।
यतनां कुर्वतां पुंसां, हिंसा स्वरूपतो मता ॥ ६१ ॥

हिंसैव सर्वतो दुष्टा, यद्यपि प्रतिपादिता ।
यदुत्सर्गापवादाभ्यां वर्जनीया तथापि च ॥ ६२ ॥

कष्टसाध्यः खलूत्सर्गः, सुखसाध्यापवादता ।
सिद्धान्तवृत्तिकायां च, तयोर्लक्षणमीरितम् ॥ ६३ ॥

ज्ञानदर्शनचारित्राण्येव मोक्षस्य मार्गता ।
जघन्यमध्यमोत्कृष्टादाराध्या पञ्चमाङ्गके ॥ ६४ ॥

उत्कृष्टाराधनोत्सर्गाज्जघन्या चापवादतः ।
मध्योत्सर्गापवादाभ्यां, भगवत्यङ्गनिश्चिता ॥ ६५ ॥

ज्ञानादीनां तु मार्गाणामेकैकाराधना त्रिधा ।
जघन्यमध्यमोत्कृष्टा, सङ्ख्यासङ्ख्यातभेदिका ॥ ६६ ॥

जघन्याराधनाया हि, स्थानान्यप्रमितानि च ।
एवं ज्ञेयानि सर्वत्र, मध्यमोत्कृष्टयोरपि ॥ ६७ ॥

सम्यग्दृष्टिगुणस्थाने, देशव्रतगुणे तथा ।
ज्ञानाद्याराधना प्रोक्ता, जघन्यादिकभेदतः ॥ ६८ ॥

चतुर्थे तु गुणस्थाने, व्रताभावो विशेषतः ।
सम्यक्त्वव्रतिभक्त्यैव, ज्ञानाद्याराधना मता ॥ ६९ ॥

दीक्षासाहाय्यदानेन, चारित्रादिमहोत्सवात् ।
चैत्यप्रासादभक्तेश्च, ज्ञानाद्याराधना भवेत् ॥ ७० ॥

एवं देशगुणस्थाने, प्रत्याख्यानाद्विशेषतः ।
चारित्राराधना प्रोक्ता, भक्तादौ यतना बहुः ॥ ७१ ॥

त्यागोऽनुबन्धहिंसाया, भक्तादिके च दृश्यते ।
हेतुस्वरूपतो हिंसा, ततोऽत्यन्तलघीयसी ॥ ७२ ॥

प्रोक्तानुबन्धहिंसाया, हेतुर्हिंसा लघीयसी ।
तस्याः स्वरूपहिंसापि लघीयसीतरा तथा ॥ ७३ ॥

उपदेशो न हिंसाया, द्रव्यस्तवेऽर्हतां पुनः ।
श्राद्धानामनुबन्धाच्च, हिंसात्यागस्तु पूजने ॥ ७४ ॥

परिग्रहमहारम्भत्यागो द्रव्यस्तवे भवेत् ।
श्रमणोपासकानां च, जिनप्रासादसर्जने ॥ ७५ ॥

यत्साधर्मिकवात्सल्यं, तीर्थयात्राव्रतोत्सवः ।
उद्यापनादिकं ज्ञेयं, सर्वं युक्तं जिनागमे ॥ ७६ ॥

कृष्णश्रेणिकमुख्यानां, ज्ञान्यादिबहुभक्तितः ।
ज्ञानाद्याराधना जाता, ज्ञातादिसूत्रतः श्रुताः ॥ ७७ ॥

अर्थात्कामाच्च धर्माच्च, ये घ्नन्ति मन्दबुद्धिकाः ।
प्रश्नव्याकरणे यत्स्यात्, तत्तु मिथ्यात्वसङ्गमात् ॥ ७८ ॥

अन्यथा किमु साधूनां, वैयावृत्त्यादि कल्पते ।
प्रतिक्रमणमत्र स्याच्चेन्मिथ्यात्वं कथं गतम् ? ॥ ७९ ॥

यत्र चेत्प्राणिनां घातस्तत्र मिथ्यात्वमुच्यते ।
भोश्चित्ते तु तथैवं (तवैवं) स्यात्, सम्यक्त्वं कस्य कथ्यते ? ॥ ८० ॥

धर्मार्थं प्राणिनां घातो, मिथ्यात्वं तत्र मन्यते ।
विहारादौ मुनीनां चेन्मिथ्यात्वं किं न कथ्यते ? ॥ ८१ ॥

चेत्प्रतिक्रान्तितो नैव, मिथ्यात्वं प्रतिपाद्यते ।
प्रायश्चित्तं श्रुते प्रोक्तं, दशधालोचनादिकम् ॥ ८२ ॥

मिथ्यात्वप्रतिपत्तौ च, महाव्रतविघातने ।
यदीर्यायाः प्रतिक्रान्तौ, शुद्धिर्भवति निर्मला ॥ ८३ ॥

चेत्पुनश्चरणारोपो, वृथा सूत्रे निरूपितः ।
विहारादौ न मिथ्यात्वं, मूलच्छेदोऽपि तन्न हि ॥ ८४ ॥

गृहादिप्रतिबन्धस्य निषेधार्थं तपस्विनाम् ।
विहारस्तीर्थकृत्ख्यातो, यतनया नदीजले ॥ ८५ ॥

धनादिप्रतिबन्धस्य, निवारणाय गेहिनाम् ।
जिनपूजा जिनाख्याता, यतनया जिनागमे ॥ ८६ ॥

मुनीनां तु यथेर्यायाः, प्रतिक्रान्तिर्विहारके ।
तथैव जिनपूजायां, प्रतिक्रान्तिः कथं न चेत् ॥ ८७ ॥

ईर्यादिव्यवहारोऽपि, सामायिकादिके पुनः ।
जिनाभिगमसेवादौ, न श्रुतेर्यागतिः कदा ॥ ८८ ॥

अविध्याशातनायाश्च, मिथ्यैवास्तु पुनः पुनः ।
इति सर्वत्र वक्तव्यं, पूजायां भविकैर्जनैः ॥ ८९ ॥

वादीति वचनं श्रुत्वा, पूनर्ब्रूते प्रभाषया ।
विहारस्य च पूजाया, महदन्तरमुच्यते ॥ ९० ॥

विहारादौ तु संकोचोऽनुदीर्णालोचना पुनः ।
प्रायश्चित्तं प्रतिक्रान्तिः साधूनां दूषणं न तत् ॥ ९१ ॥

अत्रानुमोदनादीर्णा, निन्दनालोचना न वा ।
पूजायां कीदृशो धर्मः, श्राद्धानां समुदीरितः ? ॥ ९२ ॥

अनभिज्ञेन केनेति, प्रोक्तं तस्योत्तरं शृणु ।
सुप्रत्याख्यातमाख्यातं, साधूनां सर्वतो व्रतम् ॥ ९३ ॥

यावतां प्राणिनां लोके, सत्त्वादीनां वधे कृतम् ।
प्रत्याख्यानं तु निर्ग्रन्थैस्त्रिधा त्रिधैव दृश्यते ॥ ९४ ॥

प्रत्याख्यानं हि कृत्वैव, वस्तुनो यस्य सर्वथा ।
तस्यैवाचरणं कर्तुं, सङ्कोचः प्रतिपाद्यते ॥ ९५ ॥

वनस्पत्यादिजातिं चेत्, सुप्रत्याख्याय सर्वथा ।
एकाम्रफलभुक्तौ तत्, सङ्कोचस्तस्य कथ्यताम् ॥ ९६ ॥

व्रतभङ्गोऽस्ति चेत्तस्य, साधूनां स कथं न हि ! ।
विहारादौ च सत्त्वादेः, साक्षाद्वधो विलोक्यते ॥ ९७ ॥

एवं सति न सङ्कोचोऽनुदीर्णतापि नो भवेत् ।
न चेर्यापथिकीमात्रात्, पापं नश्यति घातजम् ॥ ९८ ॥

आम्रादिदशजातीनां, वनस्पतिस्वरूपतः ।
श्राद्धेन केनचिल्लब्धं, प्रत्याख्यानं विवेकतः ॥ ९९ ॥

भुञ्ज्यात्पञ्चैव तन्मध्यात्, पञ्चानामभयं यदा ।
तदा वनस्पतीनां च , सङ्कोचः सुखमुच्यते ॥ १०० ॥

श्राद्धानां जिनपूजायां, हिंसासङ्कोच ईरितः ।
उत्तमजातिपुष्पेभ्योऽन्येषां किल निवारणम् ॥ १०१ ॥

स्यादनुबन्धहिंसायास्त्यागोऽत्र सर्वथा पुनः ।
अविधेर्हेतुर्हिंसैव, हिंसा स्वरूपतो विधेः ॥ १०२ ॥

उपयुक्तानगारस्य, पादे प्रमादयोगतः ।
यथोक्ता भगवत्यङ्गे, पक्षिपोतविराधना ॥ १०३ ॥

तत्रेर्यापथिकी प्रोक्ता, क्रिया केवलिनां पुनः ।
स्यात्साम्परायिकी तत्र, गुणस्थानानुरोधतः ॥ १०४ ॥

पूजायां स्थावराणां हि, जन्तूनां च विराधना ।
शुभभावनया भक्त्या, स्वल्पो बन्धः प्रजायते ॥ १०५ ॥

भूयसी निर्जरा ज्ञेया, श्राद्धानां मुनिदानतः ।
यथाधाकर्मिकाहाराधिकारे पञ्चमाङ्गतः ॥ १०६ ॥

वादे पराजयाद्वादी, ब्रूते गौतमवद्यथा ।
विहारो व्रतिनां युक्तः, सिद्धान्तवचनात्पुनः ॥ १०७ ॥

एवं चेत्तर्हि सिद्धान्ते, श्रावकाणां निरूपितम् ।
पूजैवोपासकादौ तत्कारणं निर्वृतेस्तथा ॥ १०८ ॥

पूजायाः सिद्धिलाभश्चेच्चारित्रं तर्हि निष्फलम् ।
प्रध्वरेणाध्वना कश्चित्, प्राप्नुयान्नगरं तु यः ॥ १०९ ॥

वक्रेण नैव मार्गेण, गच्छति स कदाचन ।
एवं चेत्पूजया सिद्धिश्चारित्रं निष्प्रयोजनम् ॥ ११० ॥

लोचादिकष्टसाध्यं स्याच्चारित्रं निष्परिग्रहम् ।
गृह्णाति न कदा कश्चित्, पूजा तु सुखसाधनम् ॥ १११ ॥

वादिवच इति श्रुत्वा, सिद्धान्तिकः प्रभाषते ।
अहो बुद्धिस्त्वदीयात्र, चातुरिका च वर्ण्यते ॥ ११२ ॥

स्थानाङ्गे द्विविधो धर्मोऽगारानगारभेदतः ।
अगारो द्विविधः प्रोक्तः, सम्यक्त्वदेशभेदतः ॥ ११३ ॥

यद्यनगारधर्मस्तु, स्यात् संपूर्णदयामयः ।
मोक्षाङ्गं तर्हि सर्वोऽपि श्राद्धधर्मो निरर्थकः ॥ ११४ ॥

साधुभ्यः शुद्धदानेन, स्यान्महानिर्जरा यदि ।
भगवतीवचः श्रुत्वा, कश्चिद् ब्रूयाद् व्रतेन किम् ? ॥ ११५ ॥

एवं सिद्धान्तसामर्थ्याद्वादी निरुत्तरीकृतः ।
पुनर्ब्रूते प्रवादेन, सेर्ष्यं सन्मुखभाषया ॥ ११६ ॥

एकैव भो दया यत्र, धर्मस्तत्रैव भाषितः ।
श्रावकस्यापि साधोश्चान्यत्तु सर्वं निरर्थकम् ॥ ११७ ॥

पापस्थानानि सन्त्येवाष्टादश दुःखदान्यपि ।
तेषां न भावतो धर्मो, जिनेश्वरैः प्रभाषितः ॥ ११८ ॥

पापस्थानानि वर्त्तन्ते, सप्तदश पराण्यपि ।
तेषामभावतो धर्मः, किं न स्यात्त्वन्मते वद ॥ ११९ ॥

परमस्तु दयाधर्म एक एव भवन्मते ।
मृषावादाद्यभावो हि, धर्मो नास्ति कदाचन ॥ १२० ॥

त्वदीयं कीदृशं ज्ञानमेषा का च विचारणा ।
त्वन्मते तु निगोदेषु, धर्मोऽस्तु नान्यजन्तुषु ॥ १२१ ॥

संसारवासिजीवानां, प्रवृत्तिर्यत्र दृश्यते ।
षट्कायहिंसनं तत्र, साधूनां गृहमेधिनाम् ॥ १२२ ॥

वैयावृत्त्यादिके साधोर्दानाभिगमनादिके ।
प्रवृत्तिः श्राद्धलोकस्य, हिंसा विना क्व दृश्यते ? ॥ १२३ ॥

अशक्यपरिहारादौ, हिंसां नैव प्रभाष्यते ।
साधूनां श्रावकाणां च, वैयावृत्त्यादिसेवने ॥ १२४ ॥

यतनां कुर्वतः साधोः, प्राणिनां च वधे सति ।
हिंसा संभाव्यते नैव, प्रायश्चित्तं पुनः पुनः ॥ १२५ ॥

सुपरिहरणीयैव, हिंसाऽस्ति जिनपूजने ।
सचित्तानां च पुष्पाणां, जलदीपादिवस्तूनाम् ॥ १२६ ॥

यत्र हिंसा न धर्मः स्याद्यदुक्तं च त्वया पुरा ।
स्वमुखेनैव हिंसायां, सत्यां धर्मो निरूपितः ॥ १२७ ॥

आत्मार्थी त्वं च चेद्भद्र !, स्वीयं वचो विचारय ।
यत्र हिंसा न धर्मः स्यादिति सम्यक् स्वचेतसा ॥ १२८ ॥

हिंसा स्यात्ते परप्राणपरित्यागात्मिका मते ।
अशक्यपरिहारत्वं, तत्र नोक्तं त्वया पुरा ॥ १२९ ॥

यत्र हिंसा न धर्मः स्यादशक्यपरिहारतः ।
पूर्वापरविरोधेन, तत्र वाक्यं प्रवर्तितम् ॥ १३० ॥

वरमस्तु मतेऽस्माकमिष्टापत्तिस्तु जायते ।
एवं जानीहि पूजायामशक्यपरिहारताम् ॥ १३१ ॥

मोहनीयं द्विधा कर्म, व्रतसम्यक्त्वघातकम् ।
चारित्रावरणं कर्म, हिंसायाः कारणं मतम् ॥ १३२ ॥

दर्शनमोहनीयस्याभावात्सम्यक्त्वमुद्गतम् ।
ततो भक्तिर्जिनेन्द्रस्य, ततः पुष्पादिपूजनम् ॥ १३३ ॥

चारित्रावरणात्कर्मरूपादारम्भ उच्यते ।
अविरत्युदयाद्भक्तिः, सावद्यैवं स्वरूपतः ॥ १३४ ॥

धर्मद्वयं च पुष्पादौ, सचित्तेऽसारतावधः ।
अशक्यपरिहारोऽस्ति, भक्तौ सारतया पुनः ॥ १३५ ॥

हिंसार्थं न च पुष्पाणामानयनं जिनार्चने ।
पुष्पेषु सारता दृष्टा, सुपुष्पैर्जिनपूजनम् ॥ १३६ ॥

पुष्पादिभ्यः सचित्तेभ्यः, पदार्था बहवो वराः ।
पुजा तैरेव कर्तव्या, किं सचित्तेन वस्तुना ? ॥ १३७ ॥

अविरत्युदयात्पुष्पादिकं ग्राह्यं सुभक्तितः ।
अन्यत्र तस्य पुष्पादे रक्षाकृन्नास्ति कश्चन ॥ १३८ ॥

पुष्पाणां यावतां लोके, स्याद्विषयानुबन्धतः ।
हिंसा संसारिणां भक्त्याऽर्हतां पुष्पार्चने न सा ॥ १३९ ॥

नवकोट्या न तत्त्यागः, श्राद्धानां देशतो व्रतम् ।
